A
COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 339.

गादाधरी

श्रीगदाधरभट्टाचार्यचक्रवर्त्तिविरचिता ।
श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या
श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता ।

GÂDÂDHARÎ

A COMMENTARY ON DÎDHITI THE COMMENTARY
OF TATTVA CHINTÂMANI.

By Gadádhara Bhattâchârya Chakravartin. With Text.

Edited by Nyâyâchârya Vâmâcharana Bhattâchârya
Professor Govt. Sanskrit College, Benares
and Nyâyopâdhyâya Dhundhiraj Shastri,
Professor, D. A. V. Ved Vidyalay,
BENARES.

FASCICULUS XVI-१६.

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBÂ SANSKRIT SERIES OFFICE, BENARES.
AGENTS: PANDITA JYESHTHÂRAMA MUKUNDAJI, BOMBAY:
OTTO HARRASSOWITZ, LEIPZIG: GERMANY.
Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press, Benares.

1925.

मक्ष्यिते, तदा यादृशपक्षसाध्यिकाः पक्षे यादृशयादृशविशिष्टार्थ-
बोधिकाः प्रतिज्ञाः सम्प्रदायप्रसिद्धाः तादृशानां बोधानामन्यत-
मेनाप्यनिवर्त्यस्य संशयस्यानिवर्त्तको यस्तावद्बोधानामन्यतमो
बोधस्तज्जनकत्वं वक्तव्यम् । एवञ्च तादात्म्येन गवि साध्ये पक्षे
गवाभेदस्य संयोगेन समवायेन वा वह्नौ वह्निपदभेदस्य समवा-
येन पाकस्य कृतौ पाककृतिमत्त्वस्य पाककर्त्रभेदस्य विशेषणत-
तयेतरेभ्यो भेदे इतरभेदवत्त्ववत्त्वस्येतरान्याभेदस्येतरभेदवत्त्वस्ये-
तरभिन्नाभेदस्य च बोधा विशिष्य वक्तव्या इति दिक् ।

तावद्बोधानिवर्त्यसंशयानिवर्त्तकतावद्बोधनिवर्त्ययावत्संशय-
निवर्त्तकबोधजनकत्वं वाच्यमित्यपि कश्चित् ॥

(गा०) साध्यतावच्छेदकविशिष्टसाध्यनिवेशप्रयोजनमाह प-
ञ्चम्यर्थेति । हेतुत्वं प्रमेयाद्वाच्यत्ववत्प्रमेयादित्यादौ हेतुजन्यबोधस्य
विभक्त्यर्थहेतुत्वे प्रमेयाद्यात्मकप्रकृत्यर्थवैशिष्ट्यावगाहित्वेऽपि
प्रकृतसाध्यतावच्छेदकविशिष्टवैशिष्ट्यानवगाहित्वान्नातिव्याप्तिरि-
त्यर्थः । पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छे-
दकावच्छिन्नप्रकारताकत्वमेव पर्यवसितार्थः । सम्बन्धविशेष-
श्चैतद्दले न प्रवेश्यः प्रयोजनविरहादतः पञ्चम्यर्थे प्रकृत्यर्थस्य यादृ-
शसम्बन्धेनान्वयस्तस्य वृत्त्यनियामकतया व्यापकत्वाघटकत्वेऽपि
नैतद्व्याप्त्यसङ्गतिः । यदि च जन्यग्रहविषयत्वरूपपञ्चम्यर्थैकदेशज-
न्यत्वे प्रकृत्यर्थस्य हेतुज्ञानस्यान्वयः नतु परम्परासम्बन्धेन तादृशवि-
षयत्वे, तदा जन्यत्वपक्षकोक्तसाध्यहेतुकस्थले व्यावृत्तिर्बोध्या–पक्ष-
मुख्यविशेष्यकत्वपर्यन्तानिवेशात्, न तु तादृशविषयत्वत्वावच्छि-
न्नपक्षकस्थले हेतुजन्यबोधस्य तादृशविशिष्टपक्षे इतरवैशिष्ट्यान-
वगाहित्वात् । तादृशविषयताविलक्षणेति । साध्यतावच्छेदकसम्ब-
न्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छे-
दकावच्छिन्नविषयताविलक्षणेत्यर्थकम् । तद्विलक्षणत्वं च न तद्भि-
न्नत्वं प्रतिज्ञाजन्यबोधीयसाध्यादिविषयतायास्तद्भिन्नत्वेनासम्भवापा-
तात् । तादृशविषयताभिन्नमुख्यविशेष्यताशून्यत्वानिवेशेनासम्भववा-

रणेऽपि निगमनातिव्याप्तितादवस्थ्यात् अन्यूनविषयकत्वदलवैयर्थ्या-च्च। धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादौ हेत्ववयवजन्यबो-धीयहेतुत्वनिष्ठमुख्यविशेष्यतायास्तादृशविषयताभिन्नत्वात् । एतेन तादृशविशिष्टविषयतान्तःपातित्वं, प्रकृतपरामर्शजन्यतानवच्छे-दकत्वं वा तदित्यपि निरस्तम्—उक्तस्थले आलोकाद्यंशे हेतुत्वप्रका-रताया एव तादृशविषयतान्तःपातित्वात्प्रकृतपरामर्शजन्यतावच्छे-दकत्वाच्च हेतुजन्यबोधीयतद्विषयताया अतथात्वात् । न च तथा-विधविषयतावच्छेदककोट्यप्रविष्टधर्मावच्छिन्नविषयताशून्यत्वनिवे-शान्न दोष, इत्यपि न साधु—यत्र प्रमेयसामान्यस्य पक्षतावच्छेदकादि-घटकता तत्र तादृशविषयतावच्छेदककोट्यप्रविष्टाप्रसिद्धेः । विलक्ष-णावच्छेदकतानिवेशेऽपि द्रव्यव्याप्यधूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादिन्यायान्तर्गतनिगमनादावतिव्याप्तेस्तज्जन्यबोधविषयता-वच्छेदकधूमत्वादेस्तादृशविषयतावच्छेदककोटिप्रविष्टत्वानियमात् । अपि तु तादृशविषयताशालिनिश्चयत्वावच्छिन्नानिवर्त्यसंशयानिवर्त्त-कतावच्छेदकत्वमेव तत् निगमनादिजन्यबोधीयज्ञानज्ञाप्यत्वादिवि-षयतायास्तादृशनिश्चयत्वावच्छिन्नानिवर्त्यज्ञानज्ञाप्यत्वादिसंशयनिव-र्त्तकतावच्छेदकतया तद्वारणम् । उक्तहेत्ववयवजन्यबोधनिवर्त्यस्य हे-तुत्वं धूमीयं न वेत्यादिसंशयस्य धूमादिज्ञानज्ञाप्यत्वादिघटितपक्षता-वच्छेदकावच्छिन्नपक्षकसाध्यतावच्छेदकावच्छिन्नप्रकारकनिश्चयनि-वर्त्यतया तादृशबोधविषयतायां न तथाविधविषयताविलक्षणतेत्यन्यू-नपदस्य व्यावृत्तिसङ्गतिः । सर्वेषामेव संशयानां स्वविरोधिविषयकत-थाविधविषयताशालिसमूहालम्बननिश्चयनिवर्तनीयतया तादृशनि-श्चयानिवर्त्यसंशयाप्रसिद्धिरतस्तादृशनिश्चयत्वावच्छिन्नेति । इत्थं च अधिकमवगाहमानेऽपि निगमनजन्यबोधे साध्यतावच्छे-दकावच्छिन्नसाध्यविशिष्टपक्षतावच्छेदकावच्छिन्नपक्षविषयकत्वस्या-क्षततया धूमज्ञानज्ञाप्यत्वादिसंशयस्य तादृशविषयताशा-लिनिश्चयानिवर्त्यत्वानुपपत्तिरित्यपि समाहितम् । अवच्छिन्नत्वं चान्यूनवृत्तित्वं व्यापकत्वपर्यवसितम्, अतो ज्ञानज्ञाप्यत्वं धूमीयं नवेति संशयनिरूपितप्रतिबन्धकतायां धूमज्ञानज्ञाप्यत्वातिरिक्तप्रति-ज्ञाप्रतिपाद्यभागविषयताघटितधर्मस्य स्वरूपसम्बन्धरूपावच्छेदक-त्वविरहेऽपि नान्यूनपदव्यावृत्त्य सङ्गतिः अप्रामाण्यज्ञानास्कन्दितस्य

निगमनादिजन्यबोधस्य संशयाप्रतिबन्धकतया तज्जनकत्वमादायाऽतिप्रसङ्गस्य वारणाय तादृशसंशयानिवर्त्तकत्वमुपेक्ष्य तन्निवर्त्तकतावच्छेदकविषयताशून्यत्वेन बोधो विशेषितः। पक्षतावच्छेदकाद्यनिवेशे तदनवच्छिन्नपक्षादिविषयताशालिनिश्चयसमुदायस्य कमपि संशयं प्रत्यप्रतिबन्धकतया तादृशानिवर्त्याप्रसिद्धिरतस्तन्निवेश इति। इत्थं चानतिरिक्तविषयकत्वघटकसाध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टपक्षतावच्छेदकावच्छिन्नविषयतायां स्वनिष्ठत्वनिवेशेनैव न्यूनविषयकदर्शितहेतुजन्यबोधवारणसम्भवे पृथगन्यूनविषयकत्वविशेषणमनर्थकमित्यपि समाहितम्—तादृशविषयतायां स्वनिष्ठत्वविशेषणे निगमनादिजन्यबोधस्य ज्ञानज्ञाप्यत्वविशेषितसाध्यविशिष्टपक्षविषयताशालित्वनियमात्स्वनिष्ठनिरुक्तविषयताशालिनिश्चयत्वव्यापकप्रतिबन्धकताकज्ञानज्ञाप्यत्वादिसंशयान्यसंशयाप्रतिबन्धकतयाऽनतिरिक्तविषयताकत्वापत्तेर्दुर्वारत्वात् । स्तयन्तस्य न्यायावयवत्वमर्थः। निगमने च पक्षवाचकं पदमनुपज्यत इति तद्वारणमनतिरिक्तपदप्रयोजनमिति मतमनुसृत्य लघुशरीरमनतिरिक्तविषयकत्वं निर्वक्ति प्रकृतेति। प्रकृतहेतुका या प्रकृतसाध्यसिद्ध्यौपयिकी व्याप्तिस्तदविषयकत्वमित्यर्थः । यद्रूपावच्छिन्नविशेषितप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टप्रकृतपक्षतावच्छेदकावच्छिन्नविषयकनिश्चयत्वं प्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यकानुमितिजनकतानतिरिक्तवृत्ति तद्रूपावच्छिन्नाविषयकत्वमिति तु पर्यवसितम् । तादृशं रूपं तद्धेतुतावच्छेदकावच्छिन्नतद्धेतुव्यापकप्रकृतसाध्यसमानाधिकरण्यत्वं तत्तत्साध्यतावच्छेदकावच्छिन्नसाध्याभावव्यापकाभावप्रतियोगितात्वं च । निगमनस्थतत्पदस्य च व्याप्तिपक्षधर्मताविशिष्टहेतुपरतया तज्जन्यबोधस्य तादृशरूपावच्छिन्नविषयकत्वान्नातिव्याप्तिः । अन्वयव्यतिरेकव्याप्त्योर्विशिष्यैकतरानिवेशेऽन्वयिनि व्यतिरेकिणि वा निगमनेऽतिव्याप्तिरिति निरुक्तरूपावच्छिन्नत्वेन द्वयोरनुगमः । यदि च यत्त्वतत्त्वयोर्निवेशान्नानुगमसम्भव इति विभाव्यते, तदाऽभावद्वयमेव बोधे निवेशनीयम् । एतल्लाभायैव चौपयिकान्तामिति ध्येयम् । यद्यप्युदाहरणजन्यबोधस्य न निरुक्तरूपावच्छिन्नविषयकत्वं तथापि सिषाधयिषाधीनन्यायप्रयोगानुपगमेन तत्र पक्षतावच्छेदकविशिष्टे

साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वरूपान्यूनविषयकत्वविरहादेव नातिप्रसङ्गः। हेत्वन्तभागे च सत्यताभावान्नातिव्याप्तिरित्यत्रधेयम्। वह्निव्याप्तिविशिष्टस्यालोकस्य पर्वतत्वावच्छिन्नविशेषणत्वे तद्विशिष्टेऽपि पर्वते तद्वृत्तेरर्थतो लाभेनार्थतस्तत्र प्रकृतसाध्यगमकतालाभान्न हेत्ववयवाभिधानप्रयोजकाकांक्षावसर इत्यतः सधर्मेति। तस्याः—प्रतिज्ञायाः।

नन्वेवमपि यत्र प्रकृतहेतुकप्रकृतसाध्यकव्याप्तिरेवान्तर्भवति पक्षगर्भे तत्रत्यप्रतिज्ञाया असंग्रह इत्याशङ्कां परिहरति वह्नीति। विशिष्टपक्षेति। पक्षतावच्छेदकविशिष्टपक्षेत्यर्थः। तादृशव्याप्तीति। प्रकृतहेतुकप्रकृतसाध्यसिद्ध्यौपयिकव्याप्तीत्यर्थः। उदाहरणेति। यद्यपि दर्शितस्थले विशिष्टपक्षोपस्थापकपदात्प्रकृतहेतौ विशिष्टपक्षवृत्तित्वस्याप्यर्थतः प्रतीत्योपनयादिप्रयोजकाकांक्षाया अप्यनवकाशः, तथापि धूमवत्त्वस्थाने धूमवत्साधर्म्यनिवेशे तस्याः सम्भव इति उदाहरणमात्रोपादानम्। अन्यथा—ऽऽकांक्षाविरहेणाभिधाने। अतिप्रसङ्गात्-हेतुद्वयादेरप्यभिधानप्रसङ्गात्। अत एव-अनाकांक्षिताभिधानादेव। एकदा—एकन्यायप्रयोगदशायाम्। उभयव्याप्तीति। अन्वव्याप्तिव्यतिरेकव्याप्तिद्वयेत्यर्थः। व्याप्तिद्वयस्य क्रमेणैवाभिधातुं शक्यतया प्रथमोपन्यस्तव्याप्तिप्रतीत्यैव समीहितनिर्वाहेण व्याप्त्यन्तराकांक्षानुदयादिति भावः। एतेनान्वयव्यतिरेक्युदाहरणाकांक्षाघटितान्वयव्यतिरेकिहेतुलक्षणानन्तरमपरतल्लक्षणमभिधास्यतो मणिकारस्य प्रथमलक्षणानिर्भरबीजमाविष्कृतम्। अतएव तादृशातिप्रसङ्गस्य पृथगभिधानम्।

वह्न्यादिसाध्यकप्रतिज्ञायामव्याप्त्या यथोपवर्णितलक्षणमाक्षिपति यदि चेति। अत्र चासम्भवाभावमाविष्कर्त्तुं कतिपयप्रतिज्ञाजन्यबोधस्य यथोपवर्णितानुमित्यन्यूनानतिरिक्तविषयकत्वं व्यवस्थापयति मैत्र इत्यादिना। अयं गौरित्यत्र गोत्वस्य साध्यत्वे पक्षे साध्यतावच्छेदकगोत्वत्वविशिष्टप्रकारकज्ञानजनकत्वासम्भवादाह तादात्म्येन गोरिति। ननु भवतु गोसाध्यकप्रतिज्ञा तादृशी तथापि यदि समवायेन गोत्वस्य साध्यत्वेऽपि तथाविधप्रतिज्ञा संप्रदायानुमता तदा तत्साध्यकतादृशप्रतिज्ञाया दर्शितबोधजनकत्वासम्भवात्सामान्यतस्तदाकारप्रतिज्ञायास्तथात्वाभिधानमसङ्गतमि

त्याशङ्कायां तस्या गोत्वादिसाध्यकत्वं निराकरोति गोत्वत्वाद्यनुपस्थित्येति । तादृशप्रतिज्ञावाक्यादित्यादिः । अत्रेति शेषः । अनुपपत्तेरिति । प्रतिज्ञायाः साध्यतावच्छेदकोपस्थापकत्वनियमादन्यथा सुन्दरवह्नित्वावच्छिन्नसाध्यकस्थलेऽपि वह्निमानित्याकारकप्रतिज्ञाप्रसङ्गादिति भावः । यद्यपि समवायेन रक्तत्वविशिष्टदण्डावच्छिन्नसाध्यकरक्तदण्डिमानित्यादिप्रतिज्ञाया न समवायेन रक्तत्वविशिष्टसाध्यतावच्छेदकबोधकत्वसम्भवः, तथापि तत्र साध्यतावच्छेदकघटकसकलपदार्थानामेव विशकलितानां तादृशप्रतिज्ञावाक्यादुपस्थितेस्तदधीनसाध्यतावच्छेदकविशिष्टसाध्यविषयकमानसबोधेनापि तत्र विशिष्टसाध्यसंशयप्रयोज्यजिज्ञासाविषयसिद्धिसम्भवः, प्रकृते तु विशकलितानामपि गोत्वत्वादिघटकपदार्थानां नोपस्थितिरिति विशेषः । गोत्वादेः साध्यत्वे दोषान्तरमाह पदार्थेति । जातेः पदार्थतावच्छेदकत्वं पदार्थान्तरान्वयित्वासम्भवप्रयोजकत्वेनाभिहितम् । इदमुपलक्षणम् । अन्वयितावच्छेदकरूपेणानुपस्थितत्वमपि तथा बोध्यम् ।

ननु पर्वतो वह्निमानित्याद्याकारकप्रतिज्ञा न वह्निसाध्यिका अपि त्वभेदेन वह्निमत्साध्यकैव, तथाच तज्जन्यबोधविषयिताया अभेदेन वह्निमत्साध्यकानुमितिविषयितातो न वैलक्षण्यमतो न तत्राव्याप्त्यवकाश इत्यत आह तथैवेति । तादृशप्रतिज्ञाया वह्निसाध्यकत्वेनैवेत्यर्थः । इत्युपनयसङ्गमात्–इत्याकारस्योपनयस्य तादृशप्रतिज्ञाघटितन्यायान्तर्गतत्वोपपत्तेः । वह्निमतः साध्यत्वे वह्निमद्व्याप्यवानित्याकारस्यैवोपनयस्य सम्भवादिति भावः । शाब्दभाने–वह्निमानित्येतादृशवाक्यजन्यज्ञाने । अभेद इति । भासत इत्यनुषज्यते । न तु वह्नेः संयोग इति शेषः । नामार्थयोर्भेदान्वयस्याव्युत्पन्नत्वादिति हृदयम् । तथाच तादृशप्रतिज्ञाजन्यबोधे निरुक्तमन्यूनविषयकत्वमनतिरिक्तविषयकत्वं च न सम्भवतीति भावः । भेदे–शुद्धे प्रतियोगिविशेषिते वा साध्ये, इत्यादौ–इत्यादिप्रतिज्ञायाम् , आदिपदादितरेभ्यो भिद्यते इतरभिन्नमित्यादिपरिग्रहः । वैलक्षण्यम्–अनुमितिविलक्षणबोधजनकत्वम् । भेदसाध्यकानुमितौ भेदस्यानुयोगितया इतरावच्छिन्नभेदसाध्यकानुमितावनुयोगितया इतरविशेषितस्य तस्य विशेषण भिद्यते इति प्रतिज्ञाजन्ये च बोधे आख्यातान्तोपस्थाप्यस्य भेदाश्रयत्वस्य इतरेभ्यो भिद्यत इत्यादिजन्ये बोधे च पञ्चम्यन्तार्थतरप्र-

तियोगिकत्वविशेषितभेदाश्रयत्वस्य स्वरूपसम्बन्धेन भिन्नमित्यादिजन्ये च निष्ठान्तोपस्थाप्यस्य भेदाश्रयत्वावच्छिन्नस्य इतरेभ्यो भिन्नमित्यादिजन्ये च इतरप्रतियोगिकत्वविशेषितभेदाश्रयत्वावच्छिन्नस्येतराभिन्नमित्यादिजन्ये चाभेदेनेतरप्रतियोगिकाविशेषितभेदाश्रयत्वावच्छिन्नस्येतरेभ्योऽन्यदित्यादिजन्ये चेतरप्रतियोगिकत्वविशेषितभेदावच्छिन्नस्येतरान्यादित्यादिजन्ये चाभेदेनेतरप्रतियोगिकाविशेषितभेदावच्छिन्नस्य भेदेन पक्षांशे विशेषणत्वादिति अनुमितेस्तादृशबोधवैलक्षण्यादिति भावः । इदमुपलक्षणम् । ईदृशादिशा प्रकृते विधेयांशे भान इवोद्देश्यतावच्छेदकांशे भानेऽपि वैलक्षण्यमवसेयम्। गन्धाद्यवच्छिन्नपक्षकानुमितौ गन्धादेः साक्षाद्विधेयधर्मितावच्छेदकत्वात्, गन्धवती इतरेभ्यो भिद्यत इत्याकारकतादृशप्रतिज्ञाजन्यबोधे च गन्धादिसम्बन्धस्यैव तथात्वादिति ॥

उद्देश्यानुमितिपदस्य यादृशविशिष्टार्थबोधः प्रतिज्ञया जन्यते तादृशविशिष्टार्थबोधपरतेत्यभिप्रेत्य समाधत्ते यादृशेति । यादृशरूपावच्छिन्नपक्षकयादृशरूपावच्छिन्नसाध्यकसम्प्रदायसिद्धप्रतिज्ञा यादृशरूपावच्छिन्नपक्षे यादृशयादृशरूपावच्छिन्नप्रकारकबोधजनिका तादृशरूपावच्छिन्ने तादृशरूपावच्छिन्नप्रकारकबोधानिवर्त्यसंशयानिवर्त्तकतादृशबोधान्यतमबोधजनकत्वे सति तादृशरूपावच्छिन्नपक्षकतादृशरूपावच्छिन्नसाध्यकन्यायान्तर्गतत्वं प्रतिज्ञात्वमित्यर्थः । अत्र च जनिकेत्यन्तं बोधविशेषपरिचायकमात्रं न तु तदर्थस्य लक्षणे निवेशः । बोधाश्च विषयविशेषान्निवेश्य विशिष्यैवोपादेयाः न तु प्रतिज्ञाप्रतिपाद्यत्वेन अतो नात्माश्रयशङ्कावकाशः । एवञ्च प्रतिज्ञाप्रतिपाद्यविशिष्टार्थानामननुगमेनैकधर्मावच्छिन्नपक्षसाध्यकनिखिलप्रतिज्ञासाधारणमपि प्रतिज्ञात्वं नैकं सम्भवतीति बोधानामन्यतमत्वेनानुगमस्तेन रूपेण जनकतांश एव बोधानां विशेषणता न तु निवर्त्यत्वांशेऽपीति बोधानामननुगमेपि तादृशतादृशबोधानिवर्त्यत्वाभावकूटघटितधर्मस्यानुगतत्वात् तादृशबोधभेदकूटवद्भिन्नत्वरूपान्यतमत्ववान्निवर्त्यत्वसामान्यभावस्थले तादृशतादृशबोधानिवर्त्यत्वाभावकूटस्यैव लाघवेन निवेशयितुमुचितत्वात् । एवञ्च तादृशाभावकूटानिवेशसूचनायैवान्यतमेनापीत्युक्तम् । एतेन सामान्याभावनिवेशसूचनायापिकार इति व्याख्यानमनादेयम् । विशेष्यदलेऽन्यत-

मत्त्वनिवेशनमपि यत्र प्रतिज्ञार्थानां नानाविधत्वं तत्रैव पर्वतादि-
पक्षकवह्न्यादिसाध्यकस्थले पर्वतादौ वह्न्यादिमदभेदरूपेणैकविध-
बोधस्यैव प्रतिज्ञया जननान्न तत्र तन्निवेशः। एतेनैकमादाया-
न्यतमत्वस्यासम्भवेऽपि न क्षतिः-शब्दाभेदस्याप्यप्रयोजकत्वात्।
वह्नित्वावच्छिन्नसाध्यकप्रतिज्ञया घटवद्भूतलादिघटितधर्मावच्छि-
न्नविशेष्यकः पर्वतत्वावच्छिन्नपक्षकप्रतिज्ञया च तादृशधर्मावच्छिन्न-
प्रकारकोऽपि बोधो जन्यते, तन्निवर्त्यश्च भूतलं घटवन्नवेत्या-
दिसंशयोऽपीति प्रतिज्ञायां प्रकृतपक्षतावच्छेदकावच्छिन्नपक्ष-
कत्वस्य प्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यकत्वस्य वा-
ऽनुपादाने उक्तबाधानिवर्त्यसंशयाप्रसिद्धिरतस्तदुपादानम्।
यत्किञ्चिद्रूपावच्छिन्नपक्षसाध्यकप्रतिज्ञाप्रतिपाद्यतत्तद्विशिष्टार्थबो-
धानिवर्त्यसंशयानिवर्तकबोधजनकत्वस्य यत्किञ्चिद्रूपावच्छिन्न-
पक्षसाध्यकन्यायान्तर्गतत्वस्य निवेशनेऽतिप्रसङ्गः प्रागुपद-
र्शित एवेति यादृशरूपावच्छिन्नपक्षसाध्यकप्रतिज्ञाप्रतिपाद्य-
विशिष्टार्थबोधानिवर्त्यसंशयानिवर्त्तकबोधजनकत्वं तादृशरूपाव-
च्छिन्नपक्षसाध्यकन्यायान्तर्गतत्वं निवेशितम्। अधिकं त्वि-
त्यादिन्यायेन साध्यांशे हेतुज्ञानज्ञाप्यत्वमवगाहमानेऽपि निग-
मनादिजन्यबोधे प्रतिज्ञाप्रतिपाद्यविशिष्टार्थविषयकत्वस्याक्षततया
निगमनाद्यतिव्याप्तिवारणाय तद्रूपावच्छिन्नविशेष्यकतद्रूपावच्छिन्न-
प्रकारकबोधानिवर्त्यसंशयानिवर्त्तकत्वरूपतादृशबोधानतिरिक्तविष-
यकत्वं बोधविशेषणम। इत्थं च प्रतिज्ञाजन्यबोधानिवर्त्यस्य वह्नि-
धूमज्ञानज्ञाप्यो न वेत्यादिसंशयस्य निवर्त्तकतया तादृशबोधवारणम्।

न च प्रतिज्ञाजन्यबोधस्य पर्वतत्वाद्यवच्छिन्नविशेष्यकवह्निमत्त्वाद्य-
वच्छिन्नप्रकारकबोधत्वेनैवोपादेयतया निगमनादिजन्यबोधस्यापि
तथात्वात्तन्निवर्त्यत्वमुक्तसंशयस्याक्षतमेवेति वाच्यम्। अप्रामाण्य-
ज्ञानानास्कन्दिततादृशविशिष्टार्थविषयकनिश्चयत्वावच्छिन्नानिवर्त्य-
त्वस्यैव निवेशनीयत्वादुक्तसंशयस्य धूमज्ञानज्ञाप्यत्वाविषयकव-
ह्निमत्पर्वतनिश्चयानिवर्त्यत्वेन तथाविधनिश्चयत्वावच्छिन्नानिवर्त्य-
त्वाक्षतेः। एतेन सर्वेषामेव संशयानां वह्निमत्पर्वतादिविषयक-
समूहालम्बनात्मकस्वविरोधिनिश्चयनिवर्त्तनीयतया तादृशबोधानि-
वर्त्यसंशयाप्रसिद्धिरित्यपि निरस्तम्। तादृशनिश्चयत्वनिष्ठं निवर्त-

कतावच्छेदकत्वं च न स्वरूपसम्बन्धविशेषः किन्त्वनतिरिक्तवृत्तित्वम्। तेन सम्बन्धी वह्निमान्न वेत्याकारकैकदेशसंशयं प्रति वह्निसम्बन्ध्यभिन्नपर्वतादिनिश्चयत्वेनाप्रतिबन्धकत्वेऽपि तादृशसंशयनिवर्त्तकप्रतिज्ञाजन्यबोधस्य न सङ्ग्रहः। अत एव धूमादालोकवान् पर्वतो वह्निमान्धूमादित्यादौ हेतुजन्यबोधनिवर्त्य-हेतुत्वं धूमीयं न वेति-संशयं प्रति प्रतिज्ञाप्रतिपाद्यविशिष्टार्थविशेषविषयकनिश्चयत्वेनाप्रतिबन्धकत्वेपि न विशेष्यदलवैयर्थ्यम्। वन्हिमत्त्वप्रकारकनिश्चयत्वावच्छिन्ननिवर्त्यस्य पर्वतत्वाद्यवच्छिन्नविशेष्यकनिश्चयत्वावच्छिन्ननिवर्त्यस्य चाप्रसिद्धिरतो विशेष्य प्रकारोभयनिवेशनम्।

यद्यप्यत्र प्रतिज्ञाप्रतिपाद्यस्य विधेयविशिष्टधर्मिण एव यादृशविशिष्टार्थपदेनोपादानसम्भव इति यादृशविशिष्टार्थबोधिका इत्युपेक्ष्य विशेष्यप्रकारयोः खण्डश उपादानसूचनाय पक्षे यादृशविशिष्टार्थवत्त्वबोधिका इत्यभिधानमनुचितम्, तथापि धूमादालोकवान् पर्वतो वन्हिमान् धूमादित्यादौ प्रतिज्ञार्थहेत्वर्थविषयकसमूहालम्बनबोधजनके हेत्वन्ते हेतौ वा न्यायावयवत्वं परित्यज्य न्यायान्तर्गतत्वनिवेशपक्षे प्रतिज्ञाजन्यबोधनिष्ठएकदेशविषयकबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतामादायैकदेशे चातिप्रसङ्गवारणाय विशिष्टार्थविषयकबुद्धित्वावच्छिन्नजन्यताप्रतियोगिकजनकत्वनिवेशे पर्वतो वह्निमानित्यादिप्रतिज्ञाया असङ्ग्रहः, वह्न्यादिशून्यपर्वतादौ वह्निमत्त्वाद्यवगाहिभ्रमात्मकशाब्दबोधसाधारण्यानुरोधेन तत्तत्पदार्थानां परस्परमुपश्लेषावगाहित्वस्यैव तादृशप्रतिज्ञाजन्यतावच्छेदकत्वोपगमात् तत्तद्विशिष्टार्थविषयकत्वस्यातथात्वादिति अनतिरिक्तविषयकबोधनिष्ठतादृशपरस्परोपश्लेषावगाहित्वावच्छिन्नजन्यताप्रतियोगिकजनकताया निवेशसूचनाय तथाभिधानम्। तादृशपरस्परोपश्लेषावगाहिशाब्दत्वे जन्यतावच्छेदकतापर्याप्त्यनिवेशान्नानतिरिक्तविषयकत्वदलवैयर्थ्यमित्यवधेयम्। भेदादिसाध्यकस्थले पृथिवी इतरेभ्यो भिद्यत इत्यादिप्रतिज्ञाप्रतिपाद्यभेदाश्रयत्वादिरूपयत्किञ्चिदेकार्थनिश्चयाप्रतिबध्यभेदादिकोटिकसंशयं प्रति पृथिवी नेतराणीत्यादिप्रतिज्ञाजन्यभेदादिप्रकारकनिश्चयस्य प्रतिबन्धकतया न कस्याश्चिदपि प्रतिज्ञायास्तादृशसंशयानिवर्त्तकबोधजनकत्वमतस्तद्विशिष्टार्थविषयकनिश्चयनिवर्त्यत्वाभावकूटानिवेशनम्। प्रतिज्ञाजन्य-

बोधस्य स्वसमानाकारानुमितौ सिद्धिविधया प्रतिबन्धकत्वात्तादृशा-
नुमितेश्च सिषाधयिषाकालीनतादृशबोधाप्रतिबध्यतया तादृशाप्रा-
माण्यज्ञानानास्कन्दितप्रतिज्ञाप्रतिपाद्यविशिष्टार्थविषयकनिश्चयत्वाव-
च्छिन्नप्रतिबन्धकताकान्यत्वादसम्भव इत्यतो ज्ञानसामान्यमुपेक्ष्य
संशयपर्यन्तानुधावनम् । न चानुमितेस्तादृशनिश्चयत्वावच्छिन्नप्रति-
बन्धकताकान्यत्वेऽपि तदप्रतिबन्धकासिषाधयिषाकालीनबोधजनक-
त्वमादाय प्रतिज्ञायां लक्षणसमन्वयः सम्भवतीति संशयपदमनर्थकं
स्वरूपयोग्यतारूपजनकताया एव निवेशनीतयाऽव्याप्तेरप्यनवकाशा-
दिति वाच्यम् । अनिवर्त्तकत्वं हि प्रतिबन्धकतावच्छेदकीभूतविषयि-
ताशून्यत्वं न तु प्रतिबन्धकत्वाभावः तथासत्यप्रामाण्यज्ञानास्क-
न्दिततादृशबोधमादाय निगमनातिव्याप्तितादवस्थ्यात्, तथाच सि-
षाधयिषाकालीनसिद्धेरप्रतिबन्धकत्वेऽपि प्रतिबन्धकतावच्छेद-
कीभूतविषयिताशालित्वेनानुमित्यनिवर्त्तकत्वासम्भवात् । न च सि-
द्धेः पूर्वं परतो वा सिषाधयिषाया उत्पादस्थले द्वितीयक्षणे प्रथ-
मक्षणे वा सिषाधयिषाविरहविशिष्टत्वमक्षतमेवेति सिषाधयिषा-
विशिष्टाया अपि सिद्धेरनुमितिप्रतिबन्धकत्वमक्षतमेवेति कथं
तस्या अप्रामाण्यज्ञानानास्कन्दिततादृशविशिष्टार्थनिश्चयत्वावच्छि-
न्नप्रतिबन्धकताकान्यत्वमिति वाच्यम् । यादृशसिद्धेः पूर्वं परतश्च सि-
षाधयिषाया उत्पादस्तादृशसिद्धेरेवाप्रतिबन्धकत्वात् । प्रत्यक्षनिश्चये
विशेषदर्शनकालीनविपरीतनिश्चयस्याप्रतिबन्धकतामते तस्यापि प्र-
तिज्ञार्थनिश्चयत्वावच्छिन्नप्रतिबध्यतयोक्तदिशाऽसम्भव इति प्रत्यक्ष-
सामान्यमुपेक्ष्य संशयपर्यन्तानुधावनम् । अत्र च तत्तद्विशिष्टार्थवि-
षयकनिश्चयत्वानवच्छिन्नसंशयप्रतिबन्धकत्वशून्यत्वस्य ज्ञानविशे-
षणत्वोपगमेनैवातिरिक्तविषयकस्य हेत्वन्तादिभागजन्यबोधस्य तथा-
विधधूमज्ञानज्ञाप्यत्वादिसंशयप्रतिबन्धकताश्रयस्य वारणसम्भवात्
तादृशप्रतिबन्धकतात्वेनैव तथाविधनिश्चयत्वावच्छिन्नप्रतिबन्धकता-
कान्यसंशयप्रतिबन्धकतानिवेशः न तु तथाविधनिश्चयत्वावच्छिन्न-
प्रतिबन्धकताकान्यसंशयप्रतिबन्धकतात्वेन गौरवादित्यवधेयम् ।
उक्तहेतुवारणाय तादृशबोधान्यतमेति । प्रकृतप्रतिज्ञाजन्यतावच्छे-
दकीभूतं यादृशयादृशबुद्धित्वं तादृशतादृशबुद्धित्वावच्छिन्नान्यतम-
जन्यतानिरूपितजनकतापर्यन्तस्य विवक्षणीयतयोक्तसमूहालम्बनबो-

धमादाय न तत्रातिप्रसङ्ग इत्युक्तप्रायम् ॥

गवाभेदस्येत्यादि सकलषष्ठ्यन्तैः समं बोधा विशिष्य धर्त्तव्या इत्यग्रिमस्यान्वयः। यद्यपि तादात्म्येन गोःसाध्यकस्थलेऽनुमित्यन्यूनानतिरिक्तविषयकबोधजनकत्वं प्रतिज्ञायाः सम्भवतीति प्रागभिहितं तावतैव च गवाभेदः प्रतिज्ञाप्रतिपाद्य इत्यस्य लाभात्तत्र तादृशबोधमादाय लक्षणं कर्त्तव्यमिति स्फुटमेव, तथापि तत्र तादृश एव बोधो लक्षणघटको न त्वन्यविधो बोध इति स्फुटीकर्त्तुं तदुपादानम्। तादात्म्येन वह्नौ साध्येऽयं वह्निरित्येव प्रतिज्ञा जायते तत्र च न वह्निमद्भेदबोधो लक्षणघटक इत्यतः संयोगेन समवायेन वेति। तादात्म्यातिरिक्तसम्बन्धेनेत्यर्थः। वह्नौ इत्यादि सप्तम्यन्तत्रयं साध्य इति प्राक्तनेनान्वितम्। वह्निमदभेदस्येति।अत्राप्येतादृशबोधस्य तादृशप्रतिज्ञाजन्यतायाः प्रागुपदर्शितत्वेऽप्यन्यविधबोधासम्भवमाविष्कर्त्तुमतदुपादानम्। पाककृतिमत्त्वस्येति। पाककृतिसमवायस्येत्यर्थः। पचतीति प्रतिज्ञातस्तद्बोधादिति भावः। पाककर्त्रभेदस्येति। पाककृत्यवच्छिन्नाभेदस्य पाककृतिमत्त्वावच्छिन्नाभेदस्य चेत्यर्थः। पक्ता पाककृतिमानित्यादिप्रतिज्ञातस्तद्बोधादिति भावः। इतरभेदवत्त्वस्येति। इतरभेदाश्रयतासम्बन्धस्येत्यर्थः। इतरेभ्यो भिद्यत इत्यादितस्तादृशबोधादिति भावः। इतरान्याभेदस्येति। इतरभेदावच्छिन्नाभेदस्येत्यर्थः। इतरान्येति प्रतिज्ञातस्तद्बोधादिति भावः। इतरभेदवत्त्वस्येति। इतरभेदसंसर्गस्येत्यर्थः। नेतराणीत्यतस्तद्बोधादिति भावः। इतरभिन्नाभेदस्येति। इतरभेदाश्रयत्वावच्छिन्नाभेदस्येत्यर्थः। इतरभिन्नेति प्रतिज्ञातस्तद्बोधादितिभावः॥

अनतिरिक्तविषयकत्वार्थः पूर्ववदेव। अन्यूनविषयकत्वं तु तावद्बोधनिवर्त्ययावत्संशयनिवर्तकत्वम्, दर्शितहेतुजन्यबोधस्य ज्ञानज्ञाप्यत्वं धूमीयं नवेत्यादिप्रतिज्ञाजन्यबोधानिवर्त्तनीयसंशयप्रतिबन्धकत्वेऽपि तादृशयावत्संशयान्तर्गतपर्वतो वह्निमान्न वेत्यादिसंशयानिवर्त्तकत्वेन वारणसंभवादिति वदतो मतमाह तावदिति। तत्तद्विशिष्टार्थविषयकेत्यर्थः। तावद्बोधनिवर्त्ययावत्संशयेति। तत्तद्विशिष्टार्थबोधान्यतमयत्किञ्चिद्बोधनिवर्त्ययावत्संशयेत्यर्थः। तेन भेदादिसाध्यकस्थले भेदतदाश्रयत्वादिकोटिकनानाविधसंशयानामेव प्रकृतसाध्यपक्षकप्रतिज्ञार्थबोधनिवर्त्यतया यावत्संशयान्तर्गततयातावत्संशयनिवर्त्त-

क(१)(तायाः पृथिवी नेतराणि पृथिवीतरेभ्यो भिद्यत इत्यादिप्रतिज्ञा-
जन्यबोधेऽसत्त्वेऽपि तादृशसकलवाक्यजन्यसमूहालम्बनबोधस्य
तावत्संशयानिवर्त्तकत्वात्तत्र च निरुक्तानतिरिक्तविषयकत्वसत्त्वात्
तज्जनकत्वमादायैव प्रत्येकप्रतिज्ञासु लक्षणसमन्वयो बोध्यः।) अत्र च
स्वमतापेक्षया गौरवमेवास्वरसबीजं बोध्यम् ॥

(दी०) चैत्रः पचति घटो नेतराणीति प्रतिज्ञायां साध्ये
विषयित्वानुयोगित्वयोः सम्बन्धविधयैवानुप्रवेशाद्यथोपदर्शित-
साध्यगमकतौपयिकव्याप्तिविशिष्टहेतुमत्त्वस्य च पक्षे उपनेयत्वात्
तथा चायमित्याकारः सुवच एव प्राचामुपनयः । नव्यानां पुन-
रनन्यगतिकतया तद्व्याप्यहेतुमांस्तद्वान् वेत्याकारः, योग्यतावशाच्च
तदा साध्यस्य तद्व्याप्यस्य वा परामर्शः ।

केचित्तु वह्निमान्नवेति विप्रतिपत्तौ तदधीनसंशये च वह्नि-
मत्तदन्योन्याभावयोस्तादात्म्यविशेषणत्वाभ्यां कोटित्वेन जिज्ञा-
सितत्वात्तादात्म्येन वह्निमानेव साधयितुमुचितो न तु वह्निः-अजि-
ज्ञासितत्वात्, तथा च तथा चायमित्याकारो वह्निमद्व्याप्यो धूम-
वांश्चायमित्याकारो वा उपनयो, न तु वह्निव्याप्यधूमवांश्चायमि-
त्याकारोऽर्थान्तरत्वादिति प्राहुः ।

यत्र चान्तरा तादृशबोधो न जातस्तत्रापि तादृशाकाङ्क्षायो-
ग्यतादिशालित्वरूपं तज्जननयोग्यत्वमक्षतम् । तल्लाभश्च जातिविशे-
षोपस्थापकशाब्दवाक्यशब्दयोरुपसन्दानादेवेति ।

(गा०)ननु विषयितादिसम्बन्धेन पाकाद्यवच्छिन्नकृत्यादेः यत्र सा-
ध्यता तत्र कीदृश उपनयः? न तावत्पाककृतिव्याप्यवानित्याकारकः-तत्र
तत्पुरुषघटकपाकादिपदस्य पाकविषयकादिलाक्षणिकतया पाकविष-
यकाभिन्नकृतित्वाद्यवच्छिन्ननिरूपितव्याप्तेरेव लाभात्, प्रकृतसाध्यता-
वच्छेदकावच्छिन्ननिरूपिताया व्याप्तेरलाभेनार्थान्तरप्रसङ्गादित्यत

(१) त्वं न कस्यापि बोधस्येत्यतिव्याप्तिरिति निरस्तम्-अत्रचेति
पाठान्तरम् ।

आह चैत्र इति । साध्ये–विशिष्टसाध्यशरीरे । विषयितानुयोगित्वयोरिति । कृतिभेदांश इत्यादिः । सम्बन्धविधयैवेत्येतत्प्रकारेण विशेषणत्वव्यवच्छेदः विषयित्वाद्युपस्थापकपदाभावेन तयोर्विशेषणत्वासंभभवादिति भावः । निपातार्थेन नामार्थस्य भेदान्वयधियो व्युत्पत्त्यविरुद्धतया नेतराणीत्यादौ प्रथमाया अनुयोगितार्थकत्वमसिद्धमिति हृदयम् । यथोपदर्शितेति। प्रतिज्ञोपस्थापितेत्यर्थः । उपनेयत्वात्–उपनयबोधनीयत्वात् । तादृशव्याप्तेरेवाकांक्षितत्वेन यः पाककृतिसामग्रीमान् स पचतीत्युदाहरणेन प्रतिपादनात्तादृशव्याप्तिविशिष्टस्य पक्षधर्मताकाङ्क्षयैवोपनयप्रयोगादिति भावः । सुवच एवेति । तथाशब्देन तादृशव्याप्तिविशिष्टहेतुमत एवोपस्थापनादिति भावः ।

ननु मणिकृता थाल्प्रत्ययार्थं वितर्क्य तस्मात्तथेतिनिगमनस्य निराकरणीयतया तथापदघटितोपनयेऽपि तद्दोषग्रास इत्यस्याननुमतस्तादृशोपनय इत्येतन्मतमनुसृत्याह नव्यानामिति । तत्पदेन यथोपदर्शितसाध्यस्येव तादृशसाध्यव्याप्तिविशिष्टहेतोरपि परामर्शसम्भव इति व्याप्त्यादिपदप्रयोगवैयर्थ्यमित्याशयवानाह तद्वान्वेति । ननु पक्षादेरपि प्रक्रान्तत्वात्तस्यैव कथं नोपनयस्थतच्छब्देन परामर्श इत्यत आह योग्यतेति । तात्पर्यवशादित्यर्थः । व्याप्तिविशिष्टहेतुमत्त्वस्यैवाकांक्षितत्वेन तत्परताया एव तत्र ग्रहादिति भावः । तदा–तच्छब्देन । साध्यस्येति प्रथमकल्पं तद्व्याप्यस्येति द्वितीयकल्पमभिप्रेत्य ।

पर्वतो वह्निमानित्यादिन्यायस्य वह्निसाध्यकत्वं निराकृत्य वह्निव्याप्यधूमवांश्चायमित्याकारकोपनयं निराकुर्वतां मतमाह केचित्त्विति। विप्रतिपत्तौ कोटित्वं तज्जन्यस्मृतिविषयत्वं तज्जन्यप्रत्येकशाब्दबोधप्रकारत्वं वा न तु तदधीनसंशयप्रकारत्वमतो न संशये चेत्यस्य वैयर्थ्यम्, तत्प्रदर्शनं च संशयकोटितानिर्वाहकत्वेन तस्य स्वतो जिज्ञासायामतन्त्रत्वादित्यवधेयम । यद्यपि वह्निमत उपस्थितिदशायां वह्नेरप्युपस्थिततया तादृशविप्रतिपत्तिवाक्याद्वह्निकोटिकोऽपि संशयो भवितुमर्हति तथापि स्वातन्त्र्येण कोट्युपस्थितिः संशयप्रयोजकेत्यभिप्रायेणेदमित्यवधेयम्। अथवा विप्रतिवाक्याच्छाब्द एव संशय इति मतानुसारेणेदम् ।

वस्तुतो वह्न्यभावस्य कोटितायामेव वह्निकोटिकसंशयतोपपद्यते न तु वह्निमद्भेदस्य स्वस्वाभावप्रकारस्यैव स्वसंशयत्वात्प्रकृते च

वह्न्यभावो नोपस्थितः, अपि तु तद्वद्भेद एवेति वह्न्यभावस्य को-
टित्वासम्भवाद्वह्निसंशयो न सम्भवतीत्यभिप्रायः । एतत्सूचनायैव
च वह्निमद्भेदस्य कोटित्वमभिहितं तदभिधानस्य प्रयोजनान्तरा-
भावात् ।

यद्वा धर्मिणि तत्प्रकारबोधौपयिकाकाङ्क्षावत्पदजन्यतदुपस्थि-
तिरेव धर्मिणि तत्कोटिकसंशयजनिका पर्वतो वह्निरभाव इत्यादितो
वाक्याद्वह्न्याद्युपस्थितौ पर्वतादौ वह्निसंशयानुदयात् । तथाच पर्व-
तो वह्निमानित्यादिवाक्यस्थवह्न्यादिपदमपि न पर्वतादौ वन्ह्यादे-
र्भेदान्वयौपयिकाकांक्षावादिति न तादृशविप्रतिपत्तिवाक्याद्वन्ह्या-
दिकोटिकसंशयः इति परमार्थः ।

नवीनमतमनुसृत्याह वह्निमद्यावेति । प्राहुरिति प्रशब्देनात्रा-
स्वरसभावः सूचितः ।

फलोपधायकतारूपजनकतारूपनिवेशशङ्कया प्रसक्तां तादृश-
शाब्दबोधानुपधायकप्रतिज्ञायामव्याप्तिं योग्यताविवक्षया निराक-
रोति यत्र चेति । अन्तरेति । हेत्वर्थादिविषयकशाब्दबोधसामग्र्य-
नुत्तरमित्यर्थः । एतेन फलोपधानविवक्षणे अवयवान्तरार्थविषय-
कशाब्दबोधमात्रोपधायकप्रतिज्ञायामप्यव्याप्तिः प्रसज्यते अनति-
रिक्तविषयशाब्दबोधानुपधायकत्वादिति सूचितम् । तादृशेति । तादृ-
शशाब्दबोधजनकज्ञानविषयेत्यर्थः । आकांक्षानिवेशात्पर्वतो वह्निः
सम्बन्धीत्यादिनिराकांक्षवाक्यव्युदासः । न च पर्वतो वह्निमानि-
त्यादिशाब्दबोधं प्रति निराकांक्षतादृशवाक्यविषयकज्ञानत्वेनाजन-
कत्वात्तादृशशाब्दबोधजनकतावच्छेदकविषयिताकत्वनिवेशनेनैवोप-
पत्तावाकांक्षानिवेशनमफलमिति वाच्यम् । पर्वतो वह्निमानित्यादिवा-
क्यानुपूर्वीप्रकारकभ्रमात्मकतादृशनिराकांक्षविषयकज्ञानस्यापि त-
थाविधशाब्दधीजनकतया तदीयविषयिताया अपि तज्जनकताव-
च्छेदकत्वेन तज्जनकतावच्छेदकप्रकारताश्रयानुपूर्वीरूपाकांक्षाशालि-
त्वनिवेशस्यावश्यकत्वात् । तच्छालित्वं च तद्घटकवर्णसमुदायत्वम् ।
तज्जनकतावच्छेदकीभूतभ्रमान्ययत्किञ्चिज्ज्ञानवृत्तिविषयतानिरूपक-
वर्णसमुदायत्वमिति तु पर्यवसितोऽर्थः । ह्रदो वह्निमानित्यादिभ्रमा-
नुमितिसमानविषयकतादृशबोधजनकवाक्यस्य वारणाय योग्यतानि-
वेशनम् । योग्यत्वं चाबाधितार्थकत्वम् । प्रकृतसाध्यविशिष्टप्रकृतपक्ष-

बोधकत्वमिति यावत्। वैशिष्ट्यं च वास्तवं न तु वैज्ञानिकम्। यद्यपि स्वातन्त्र्येण योग्यतानिवेशो निरर्थकः-अन्यूनविषयकत्वावच्छिन्नजन्यताप्रतियोगिकजनकताया अवश्यं विवक्षणीयतया वास्तववैशिष्ट्यघटितसाध्यविशिष्टपक्षविषयकत्वरूपान्यूनविषयकत्वनिवेशासम्भवेऽप्ययोग्यवाक्यप्रतिपाद्यविशिष्टार्थाप्रसिद्ध्या सम्प्रदायसिद्धप्रतिज्ञाप्रतिपाद्यविशिष्टार्थबोधानिवर्त्यसंशयानिवर्त्तकत्वरूपानतिरिक्तविषयकत्वघटितलक्षणस्य तत्रातिव्याप्त्यप्रसक्तेः, तथापि वास्तववैशिष्ट्यघटितानतिरिक्तविषयकत्वसूचनाय योग्यतोपादानाम्। आदिपदात्तात्पर्यविशेषपरिग्रहः। तेन निस्तात्पर्यकस्य शुकाद्युच्चारितप्रतिज्ञासमानाकारवाक्यस्यार्थान्तरपरतादृशवाक्यस्य च व्युदासः।

नन्वाकांक्षादिनिवेशे शाब्दवाक्यपदयोर्वैयर्थ्यम्-आकांक्षादेर्ज्ञानान्तरोपयिकत्वविरहाद्वाक्यातिरिक्तेऽसत्त्वाच्चानुमितिजनकपरामर्शादौ शाब्दधीजनकयोग्यताज्ञानादावतिप्रसङ्गानवकाशादित्यत आकांक्षादिमत्त्वलाभार्थकतया तादृशपदोपादानं सार्थकयति तल्लाभश्चेति। तल्लाभः-शाब्दबोधं प्रति आकांक्षादिमत एव वाक्यस्य जनकतया आकांक्षादिमत्त्वलाभः। तादृशपदद्वयोपादानादित्यर्थः। शाब्दपदस्य योगेन शब्दजन्यार्थकत्वेन तल्लाभः आकांक्षादिरहितस्यापि शब्दस्य शब्दजन्यस्मृतिहेतुत्वादतो जातिविशेषोपस्थापकेति। रूढ्यानुभवनिष्ठशाब्दत्वरूपजात्यवच्छिन्नोपस्थापकार्थकम्। शाब्दबोधं प्रति आकांक्षादिरहितस्यापि योग्यताज्ञानादेर्हेतुतया वाक्यपदानुपादाने केवलशाब्दपदान्न तल्लाभ इति वाक्यपदोपादानापेक्षेति भावः।

यत्तु-तल्लाभश्चेति अन्यूनविषयकशाब्दत्वावच्छिन्नौपयिकाकांक्षादिमत्त्वलाभश्चेत्यर्थः। शाब्दपदस्यावयवशक्त्या शब्दजन्यज्ञानत्वावच्छिन्नार्थकत्वे शब्दजन्यतावच्छेदकजातिविशेषानुपस्थित्या तदवच्छिन्नजन्यताप्रतियोगिकजनकतालाभो न भवतीत्यत उक्तं जातिविशेषोपस्थापकेति। तथाच कार्यदिशि शाब्दपदेन शाब्दत्वजातेः कारणदिशि च वाक्यपदेनाकाङ्क्षादिमत्त्वस्य लाभात्तादृशशाब्दत्वावच्छिन्नौपयिकाकाङ्क्षादिमत्त्वलाभ इति-व्याख्यानम्, तदसत्-अवच्छेदकतापर्याप्त्यनिवेशान्निरुक्तान्यूनविषयकत्वावच्छिन्न-

जन्यतानिवेशमात्रेणोपपत्त्या शाब्दत्वानिवेशने प्रयोजनाभावात्तदु-
पस्थितेरप्रयोजकत्वात् ।

न च तदर्थविषयकत्वस्य शाब्दत्वनिष्ठजन्यतावच्छेदकतायामे-
वावच्छेदकतया जन्यतायां तदवच्छिन्नत्वविरहात् अन्यूनविषयक-
शाब्दत्वावच्छिन्नत्वेनैव जन्यता निवेशनीयेति वाच्यम् । विनिगम-
नाविरहेण शाब्दत्वविशिष्टतत्तदर्थविषयकत्वस्यापि जन्यतावच्छे-
दकत्वात् ॥

(चिं०) अन्यूनानतिरिक्तपदं विहाय लिङ्गाविषयक-
त्वं वा ज्ञानविशेषणम्, तेनोदाहरणादिव्युदासः । निग-
मनञ्च न परामर्शहेतुः—अबाधितासत्प्रतिपक्षत्वज्ञानज-
नकत्वात् ।

(दी०) अन्यूनेत्यादि । तथा चोद्देश्यानुमितिसमानवि-
षयकशाब्दज्ञानजनकन्यायावयवत्वमर्थः । व्यतिरेकिणि ह्रदो
निर्धूम इत्यादौ निर्वह्नित्वहेतुके यथा ह्रदभिन्नमित्यादिदृष्टान्त-
वतो ह्रदावृत्तिधर्मशून्यत्वादिहेतुके चोदाहरणस्य वारणाय स-
मानविषयकान्तं पक्षविशेष्यकार्थकम् । उपनयवारणाय लिङ्गा-
विषयकेति ।

यद्यपि प्रकृतलिङ्गाविषयत्वं पृथिवीतरेभ्यो भिद्यते पृथिवी-
त्वात् गन्धवती तथा गन्धादित्यादावव्यापकम् । न चात्रोपनया-
सम्भवः इदमा गन्धवत्त्वेन परामृष्टे हेतुभूतगन्धवत्त्वान्वयायोगा-
दिति वाच्यम् । साध्याभावव्यापकगन्धाभावाभावत्वेनान्व-
यात् । अत एव व्यतिरेकिणि न च नेयं पृथिवीत्यादिकः प्रा-
चां प्रयोगः । यदि च दण्डवान् रक्तदण्डवानित्यस्यान्वयो नानु-
पपन्नस्तद्विशिष्टे शुद्धतद्विशिष्टान्वयस्यैवाव्युत्पन्नत्वादित्युच्यते,
तदा नानुपपत्तिगन्धोऽपि । पक्षाविशेषणत्वेन तदविषयत्वञ्चायं
वह्निसामग्रीमान् वह्नेरित्यादौ पक्षाविशेषणत्वेन साध्याविशेषण-

त्वेन च तदविषयत्वम् दधि द्रव्यं दध्नः प्रमेयत्वमभिधेयं प्रमेय-त्वात् गोत्वभावो न सास्नादिमान् गोत्वाभावादित्यादावव्याप-कमतिव्यापकञ्चोपनयस्य । तथापि पक्षतावच्छेदकविशिष्टपक्षे यत्साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वं तद्बहिर्भावेन लिङ्गविषयत्वस्याभावो वाच्यः ॥

(गा०) नन्वन्यूनानतिरिक्तपदपरित्यागे अनुमितिविषयकशाब्द-धीजनकमित्यवशिष्यते, तथा च पर्वतो वह्निमानित्यादिप्रतिज्ञावाक्य-स्यानुमित्यबोधकतयाऽव्याप्तिरित्याशङ्कां परिजिहीर्षुरनुमितिविषयो विषयो यस्येति मध्यमपदलोपिसमासाभिप्रायेण समुदितलक्षणप-र्यवसितार्थं व्याचष्टे तथा चेति । दृष्टान्तवत इति । अस्याग्निमतो-दाहरणस्येत्यादिनाऽन्वयः । अन्वय्युदाहरणस्य लिङ्गबोधकत्वाद्व्यति-रेकिपर्यन्तानुधावनम् । यो यो धूमवान्स स वह्निमानितिव्यतिरेक्युदा-हरणस्य वन्ह्यभावादिरूपलिङ्गाबोधकत्वात्पक्षाविषयकत्वमात्रनिवेश-नेनैव तादृशोदाहरणवारणसम्भवेन पक्षमुख्यविशेष्यकत्वपर्यन्तस्य विवक्षणीयस्य व्यावृत्तिदानाय यथा ह्रदभिन्नमित्यादिदृष्टान्तघटि-ततदनुसरणम् । दृष्टान्ताघटितेऽप्युदाहरणे व्यावृत्तिमाह ह्रदावृत्तीति । उपनयवारणायेति । पक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकत्वानिवेश-स्य प्रयोजनान्तराविरहेऽप्येतदर्थमेव तन्निवेशेऽननुषङ्गपक्षे निगमनाति-व्याप्तिर्न सम्भवतीत्यभिप्रायेण निगमनोपेक्षा । तस्मादितरेभ्यो भिद्यत इत्यादिनिगमनस्य पक्षविशेष्यकबोधजनकत्वाभावान्निगमनसा-मान्ये नातिव्याप्तिसम्भव इत्यभिप्रायेण वा । वस्तुतः पक्षमुख्यविशे-ष्यकत्वनिवेशेऽपि गोत्व सास्नाभाववद्गोत्वाभावादित्यत्र यत्र सा-स्ना तत्र गोत्वमित्युदाहरणे पक्षमुख्यविशेष्यकबोधजनकेऽतिव्याप्ति-दुर्वारैव पक्षमात्रमुख्यविशेष्यकत्वनिवेशे च विश्वपक्षकस्थले मा-त्रार्थाप्रसिद्ध्याऽव्याप्तिरिति पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्य-त्वानिरूपकत्वमेव विवक्षणीयम् । तथा च निगमनेऽननुषङ्गपक्षेऽति-व्याप्तिर्न सम्भवत्येवेति ध्येयम् ।

लिङ्गत्वस्य केवलान्वयितया सामान्यतो लिङ्गाविषयकत्वं ज्ञाने-ऽप्रसिद्धमिति प्रकृतलिङ्गाविषयकत्वं विवक्षणीयम्, तथापि न निस्तार इत्याशयेनाह यद्यपि प्रकृतेति । लिङ्गतावच्छेदकावच्छिन्नाविषयक-

त्वविवक्षणे पृथिवीतरेभ्यो भिद्यत इत्यादिप्रतिज्ञाया नासङ्ग्रहः—न-
ज्ञन्यबोधे स्वरूपत एव पृथिवीत्वादिलिङ्गभानादित्याशयेन स्थला-
न्तरे दोषमाह गन्धवती तथेति । तथा—इतरेभ्यो भिद्यते । न चात्र
उपनयासम्भव इति । तथाच तादृशप्रतिज्ञाघटतन्याय एव न स-
म्भवतीति काव्यातिशङ्कीति भावः । इदमा—इदम्शब्देन । गन्धवत्त्वे-
नेति । उपनयस्थेदंशब्दस्य प्रतिज्ञोपदर्शितपक्षतावच्छेदकावच्छि-
न्नपरत्वादिति भावः । गन्धवत्त्वान्वयेति । गन्धवद्भेदान्वयस्येत्य-
र्थः । अयोगादिति । उद्देश्यत्वाविधेयत्वयोरवच्छेदकयोरैक्येऽभेदा-
न्वयबोधप्रसङ्गादिति भावः । साध्याभावेति । साध्याभावव्याप-
को यो गन्धाभावस्तदभावत्वेनेत्यर्थः । तथाच भिन्नरूपेण गन्धा-
देरुद्देश्यत्वविधेयत्वावच्छेदकगर्भान्तर्भावान्नान्वयबोधानुपपत्तिरिति
भावः ।

ननु हेत्वभावाभावत्वेन हेतूपस्थापकपदाभावात्कथमुपनयवा-
क्यात्तेन रूपेण पक्षे हेतुभानमत आह अत एवेति । साध्याभाव-
व्यापकतावच्छेदकहेत्वभावत्वाद्यवच्छिन्नाभावत्वेन हेत्वन्वयानुरोधा-
देवेत्यर्थः । न च नयं पृथिवीति । नञ्द्वयेनाभावाभावत्वेन हेतुबोध-
नादिति भावः ।

यद्यपि पृथिवीत्वहेतुकस्थले तादृशोपनयप्रयोगो न युज्यते पृ-
थिवीपदार्थतावच्छेदकस्य नञर्थाभावेऽन्वयासम्भवेन हेत्वभावाभा-
वत्वेन हेत्वलाभात् । न च हेतुमद्भेदाभावोऽपि हेतुरेवान्योन्याभावा-
भावस्य प्रतियोगितावच्छेदकरूपत्वात्, एवं हेतुमद्भेद एव साध्या-
भावव्यापकता यत्र नेतरभेदस्तन्न पृथिवीत्युदाहरणेन बोध्यत इति
पृथिवीभेदाभावत्वेन पृथिवीत्वबोधकस्तादृशोपनयो युज्यत इति
वाच्यम् । एवमपि पृथिवीत्वादिति हेतुवाक्योपस्थितपृथिवीत्वत्व-
विशिष्टहेतुकानुमित्यौपयिकतद्रूपविशिष्टवद्भेदत्वावच्छिन्ने साध्या-
भावव्यापकताया एवाकांक्षिततया तस्या एव यत्रेतरभेदाभावस्त-
न्न पृथिवीत्ववदिति उदाहरणेनोपदर्शनीयतया तद्रूपविशिष्टवद्भे-
दत्वावच्छिन्नाभावत्वेन हेतुमत्ताया एव उपनेयत्वात्तादृशोपन-
यासङ्गतेः, अन्यथा पृथिवीतरेभ्यो भिद्यते गन्धसमवायिकारणताव-
च्छेदकरूपवत्त्वादित्यादावपि तथोपनयप्रयोगापत्तेरिति । तथापि
लाघात्म्येन पृथिवीहेतुकस्थलाभिप्रायेणेदम् । आदिपदान्न च नेयं ग-

न्धवतीत्याद्याकारकस्य न च नात्र गन्ध इत्याद्याकारकस्य वोपनयस्य परिग्रहः। अत्र हेत्वभावादौ साध्याभावव्यापकत्वाभानेऽपि न क्षतिः। प्राचीनमते उदाहरणादेव व्याप्तिलाभेन पक्षधर्मतामात्रस्योपनेयत्वात् अत एव प्राचामत्युक्तम्। साध्याभावव्यापकेत्यादौ च व्यापकान्तमुपलक्षणार्थकम्।

ननु न च नेयं पृथिवीत्यादिकः प्राचीनानुमत उपनयोऽसङ्गतः—नञर्थाभावस्य प्रतियोग्यनुयोग्युपरागेणैव शाब्दानुभवे भानात् अन्योन्याभावबोधे समानविभक्तिकप्रतियोग्यनुयोगिवाचकपदसमभिव्याहारस्य संसर्गाभावबोधे च सप्तम्यन्तानुयोगिवाचकपदसमभिव्याहारस्यापेक्षितत्वात्प्रकृते चानुयोगिवाचकपदाभावेन पृथिवीभेदगन्धाभावादिबोधासम्भवादिति नवीनानुमत इतरत्वव्यापकीभूताभावप्रतियोगिगन्धवती चेयमित्याद्याकारकोपनय एवादरणीयः। तथाच हेतोः पक्षतावच्छेदकत्वे दर्शितव्युत्पत्तिविरोधो दुष्परिहर एवेत्यालोच्य नव्यमते समाधानमाह यदि चेति। उच्यते इत्यग्रिमेणान्वयः। तद्विशिष्ट इति। तद्धर्मं धर्मितावच्छेदकीकृत्येतराविशेषिततद्धर्मावच्छिन्नाभेदान्वयबोधस्यैव व्युत्पत्तिविरुद्धत्वादित्यर्थः। नानुपत्तीति। प्रकृते उद्देश्यतावच्छेदकाघटकव्याप्तेविधेयतावच्छेदकघटकतया भानादिति भावः। तथाच गन्धवतीतरेभ्यो भिद्यते गन्धादित्यादिन्यायस्यापि निष्प्रत्यूहतया लिङ्गविषयकतादृशन्यायान्तर्गतप्रतिज्ञायामव्याप्तिर्दुर्वारैवेति भावः।

ननु पक्षाविशेषणतया यल्लिङ्गविषयत्वं तच्छून्यत्वं विवक्षणीयमतो नोक्ताव्याप्तिरुक्तस्थले पक्षविशेषणतयैव लिङ्गविषयतासत्त्वेन विशिष्टाभावसत्त्वादित्यत आह पक्षाविशेषणत्वेनेति। अयं वह्निसामग्रीमान्वह्नेरित्यादाविति। अव्यापकमित्यग्रिमेणान्वयः।

अथ पक्षाविशेषणत्वं पक्षनिरूपितविशेषणताभिन्नत्वम्, तस्य लिङ्गविषयताविशेषणत्वे चायं वह्निसामग्रीमान्वह्नेरित्यादावव्याप्त्याशङ्कानवकाशः—तत्रापि पक्षांशे विशेषणतापन्नसाध्यनिरूपितविशेषणतात्मकलिङ्गविषयतायाः परंपरया पक्षनिरूपितत्वाद्गन्धवतीतरेभ्यो भिद्यते इत्यादावपि मत्वर्थसम्बन्धांशे विशेषणीभूतगन्धविषयताया गन्धसमानकालीनरूपवती पृथिवी इतरेभ्यो भिद्यत इत्यादौ तद्विषयतायाः साक्षात्पक्षनिरूपितविषयतानात्मकत्वेन सा-

क्षात्परंपरासाधारणनिरूपितत्वस्यैव निवेशनीयत्वादिति चेन्न। पक्षा-
विशेषणत्वं यद्युक्तार्थकं तदा निगमनातिव्याप्तिः । न च निगमनेऽयं-
पदाननुषङ्गपक्षे उक्तयुक्त्या पक्षतावच्छेदकानवच्छिन्नमुख्यविशेष्य-
ताकान्यत्वस्य विषयकान्तार्थस्य विवक्षणीयतया नातिव्याप्तिरिति
वाच्यम् । एवमप्यनुषङ्गपक्षे तत्रातिव्याप्तेर्दुर्वारत्वात् । अतः पक्ष-
तावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितप्रकारतान्यत्वमेव त-
दर्थो वाच्यः। पक्षतावच्छेदकप्रकारतान्तःपातिनी सर्वैव प्रकारता
तादृशविशेष्यनिरूपिता । इयांस्तु विशेषः-'काचित्साक्षात्काचित्प-
रंपरया तथेति। विधेयकोटिप्रविष्टपदार्थीयप्रकारता च न धर्मिता-
वच्छेदकप्रकारतानिरूपितविशेष्यतानिरूपिता विधेयनिरूपितवि-
शेष्यतायाः धर्मितावच्छेदकावच्छिन्नतया धर्मितावच्छेदकप्रकारता-
निरूपितविशेष्यतायाश्च स्वस्य स्वधर्मितानवच्छेदकत्वेन तदनव-
च्छिन्नतया विधेयतद्धर्मितावच्छेदकप्रकारतानिरूपकविशेष्यतयोर्भे-
दादिति निगमनादिजन्यबोधीयविधेयकोटिप्रविष्टलिङ्गविषयता न
पक्षतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितविशेषणतात्मि-
केति न निगमनाद्यतिव्याप्तिः। एवं च वह्निसामग्रीमान् वह्नेरित्या-
दावव्याप्तिः प्रसज्यत एवेति' ।

एतेन पर्वतो वह्निमान्धूमादित्यादौ प्रसिद्धन्यायान्तर्गतोपनये-
ऽतिव्याप्तिप्रसंजकत्वेन नैतद्विलक्षणं शंकापथमारोहति । न चायं
दोषो'ऽतिव्यापकं चोपनयस्ये'त्यनेन स्वयमेव वक्ष्यत इति नानुपपत्ति-
रिति वाच्यम्। उपनयवारणार्थकतयैव लिङ्गाविषयकत्वविशेषणस्य
स्वयं प्राग्व्याख्याततया उपनयमात्र एव यादृशविवक्षायामतिव्या-
प्तिस्तदाशङ्कायां सन्दर्भविरोधस्य जागरूकत्वादित्यपि समाहितम्।

न 'चैवमतिव्यापकं चोपनयस्येति' ग्रन्थासङ्गतिः-तादृशग्रन्थस्य
धूमवान् वह्निमान् धूमादित्यादिन्यायान्तर्गतोपनयविशेषपरत्वात्तत्र
हेतोरेव पक्षतावच्छेदकतया पक्षतावच्छेदकावच्छिन्नांशे यद्विशेष-
णत्वं तस्यापि पक्षतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपित-
त्वात्। एवं व्यापकत्वनिरूपकतया हेतुविषयताया अपि स्वात्म-
कपक्षतावच्छेदकप्रकारतानिरूपिताधिकरणनिष्ठविशेष्यतानिरूपित-
प्रकारतात्मकतयाऽतिव्याप्तिसङ्गतिः ।

यत्तु-पक्षतावच्छेदकहेतुकव्यतिरेक्युपनयपर्यन्तपरतया तादृ-

शाग्रन्थसङ्गमनम् अन्वय्युपनये तज्जन्यबोधे व्याप्तिघटकतया लिङ्गविषयकत्वसत्त्वेनातिव्याप्तिर्न सम्भवतीत्यभिमानेन केषांचिन्मतं-तदेतेनाश्रद्धेयम् ।

पक्षाविशेषणत्वेन साध्याविशेषणत्वेन चेति । पक्षतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितप्रकारताभिन्नत्वे सति साध्यतावच्छेदकप्रकारतानिरूपितविशेष्यतानिरूपितप्रकारताभिन्नं यल्लिङ्गविषयकत्वं तच्छून्यत्वमर्थः । साध्याविशेषणतयेत्यस्य यथाश्रुतार्थकत्वे निगमने परम्परया साध्यविशेषणतयैव लिङ्गभानादतिव्याप्त्यापत्तेः । न चैवमपि ज्ञानविषयवान् धूमादित्यादिन्यायान्तर्गतनिगमनातिव्याप्तिस्तदवस्थैव ज्ञानविषयत्वरूपसाध्यतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितत्वरूपसाध्यतावच्छेदकस्य हेतुप्रकारतायां सत्त्वादि(१)ति वाच्यम् । शुद्धसाध्यतावच्छेदकप्रकारतानिरूपकविशेष्यताया एव विवक्षणीयत्वात् ।

ननु पक्षधर्मलिङ्गाविषयकत्वाविवक्षणे दधि द्रव्यं दध्न इत्यादौ नाव्याप्त्यवकाशः दधि द्रव्यमित्याकारकबोधस्य दधिद्व्यणुकविषयकस्य दधिसमवेतद्रव्यविषयकत्वसम्भवात् अतः स्थलान्तरमाह प्रमेयत्वमिति । ननु प्रमेयत्वं प्रमाविषयत्वं, तच्च विषयभेदाद्भिन्नम्, एवञ्च घटादिनिष्ठप्रमेयत्वाविषयकस्य प्रमेयत्वमभिधेयमिति बोधस्य प्रमेयत्वरूपपक्षानिष्ठप्रमेयत्वाविषयकस्य सम्भवान्नात्राव्याप्तिरतः स्थलान्तरमनुसरति गोत्वाभाव इति । ननु पक्षतावच्छेदकविशिष्टपक्षविषयतानन्तःपातिलिङ्गविषयताशून्यत्वनिवेशेनोपदर्शितहेतुपक्षकप्रतिज्ञाया असङ्ग्रहः । तदन्तःपातित्वं च पक्षतावच्छेदकप्रकारतानिरूपितसंसर्गतानिरूपकत्वं पक्षतावच्छेदकप्रकारतापक्षविशेष्यतासाधारणमित्यालोच्यातिव्याप्तिमाह आतव्यापकं चेति॥

पक्षतावच्छेदकविशिष्टेति । पक्षतावच्छेदकावच्छिन्नपक्षविशेष्यता-

---

(१) त-एवं वाह्नसाध्यकनिगमनजन्यबोधीयहेतुज्ञानज्ञाप्यत्वविशिष्टवाह्नत्वादिप्रकारघटकाविषयतायाः साध्यतावच्छेदकावच्छिन्नादिनिरूपितप्रकारतात्वस्याधिक त्वित्यादिन्यायेनाक्षततया तादृशप्रकारघटकाविषयतायाः निरुक्तविशेष्यतानिरूपितप्रकारतान्यत्वविरहा-त्तत्रातिव्याप्तितादवस्थ्यमिति पाठोऽधिकः पुस्तकान्तरे ।

निरूपिता या साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारतानिरूपितवै-
शिष्ट्यविषयता तद्बहिर्भूतलिङ्गविषयताशून्यत्वमित्यर्थः।

अथ तद्बहिर्भूतत्वं न साक्षात्परंपरासाधारणतन्निरूपकत्वशून्य-
त्वं-पक्षतावच्छेदकप्रकारताया उक्तयुक्त्या तदनिरूपकत्वात्। कथं-
चित्तन्निरूपकत्वोपपादनेऽपि यत्र संयोगेन वह्नेः साध्यत्वं वह्निसंयोग-
त्वेन हेतुता तत्रत्यप्रतिज्ञायामव्याप्तिः-हेतुभूतवैशिष्ट्यविषयतायाः
स्वनिरूपकत्वविरहात्। एवं साक्षात्परंपरासाधारणानुगतनिरूप्य-
निरूपकभावोऽपि दुर्वचः-परंपरया निरूपितत्वस्य तन्निरूपितनिरू-
पितत्वाद्यात्मकत्वात्। एतेन तादृशवैशिष्ट्यविषयतानिरूपकविष-
यत्वानिरूपितत्वं तादृशविषयताबहिर्भूतत्वम्, तच्च वैशिष्ट्यवि-
षयतासाधारणं तन्निरूपकप्रकारताविशेष्यतानिरूपितत्वमादाय त-
न्निरूपकप्रकारतासाधारणं चेत्युक्तावपि न निस्तार इति चेत्। न।

तथाविधवैशिष्ट्यविषयताशालिनिश्चयत्वसमनियत(व्यापक)प्रति-
बन्धकतानवच्छेदकत्वमेव तद्बहिर्भूतत्वम्। निगमनजन्यबोधीयहेतु-
विषयता च यादृशप्रतिबन्धकतावच्छेदककोटौ निवेश्यते न तादृशी का-
पि प्रतिबन्धकता तादृशनिश्चयत्वव्यापिका हेत्वविषयकतादृशवैशिष्ट्य-
विषयताशालिज्ञानासाधारण्यात्, अतस्तथाविधहेतुविषयतायास्तद्ब-
हिर्भूतत्वोपपत्तिरित्यनुषङ्गपक्षेऽपि न निगमनातिव्याप्तिः। तादृशनि-
श्चयत्वव्यापकत्वमात्रस्य प्रतिबन्धकताविशेषणत्वे धूमादालोकवान्
पर्वतो वह्निमान्धूमादित्यत्र हेत्ववयवेऽतिव्याप्तिः तादृशहेतुनिष्ठाया
हेतुत्वं धूमीयं न वेति संशयप्रतिबन्धकतावच्छेदकतादृशबोध-
विषयताया निरुक्तविषयताबहिर्भूतत्वानुपपत्तेरतस्तादृशनिश्चय-
त्वव्याप्यत्वमपि प्रतिबन्धकताविशेषणम्। न च पक्षतावच्छेदकाव-
च्छिन्नमुख्यविशेष्यतानिवेशस्यावश्यकतया नैतादृशातिव्याप्तिसं-
भावनेति व्यर्थं व्याप्यत्वनिवेशनमिति वाच्यम्। तथाप्यनुषङ्ग
पक्षे धूमाद्वह्निमतस्सधर्मा पर्वतो वह्निमान्धूमादित्यादिस्थलीय-
निगमने हेतुत्वं प्रमेयाद्वाच्यत्ववत्प्रमेयादित्यादिस्थलीयहेत्ववयवे
चातिव्याप्तेर्दुर्वारत्वात्तन्निवेशस्यावश्यकत्वादिति। न च धर्मितावः-
च्छेदकनिष्ठं प्रकारत्वं न प्रतिबन्धकतावच्छेदकमपि तु तन्निष्ठविशे-
ष्यतावच्छेदकत्वमेव तथा च गन्धवतीतरेभ्यो भिद्यत इत्यादिप्रति-
ज्ञाजन्यबोधीयहेतुप्रकारतायास्तद्बहिर्भूतत्वादव्याप्तिरिति वाच्यम्।

विशेष्यतावच्छेदकताया एव प्रकारतात्वोपगमेन तादृशबोधे तदन्य-प्रकारतानभ्युपगमात्। एवं चातिप्रसक्तस्य भूतलं घटवदित्यादि-ज्ञानस्य भूतलत्वांशे तद्धर्मितावच्छेदकत्वस्य प्रकारान्तरेण वारण-सम्भवात्। अस्तु वा विशेष्यतावच्छेदकताख्यविषयता प्रकारतातोऽन्यैव तथापि न क्षतिः। तादृशविषयताबाहिर्भूतविषयताशून्यत्वं ज्ञान-विशेषणमुपेक्ष्य तादृशविषयताबाहिर्भूतविषयतानवच्छिन्नजन्यतानि-रूपितजनकताया वाक्यविशेषणत्वोपगमेन विशेष्यतावच्छेदकताभि-न्नगन्धादिविषयतायाः प्रतिज्ञाजन्यबोधे सत्त्वेऽपि तस्याः प्रतिज्ञाज-न्यतावच्छेदककोटिनिवेशे प्रयोजनाभावेन तन्निष्ठधर्मितावच्छेदकता-या एव तत्र निवेशनीयतयाऽव्याप्त्यनवकाशात्। तादृशबहिर्भूतविष-यतासामान्यशून्यत्वनिवेशेऽनुमितिसमानविषयकत्वनिवेशनस्य मू-लोपात्तस्य वैयर्थ्यप्रसङ्ग इति तादृशलिङ्गविषयतासामान्यशून्यत्व-निवेशनमिति अखण्डाभावघटकतया न लिङ्गांशवैयर्थ्यम्॥

(दी०) वस्तुतो लिङ्गं-लिङ्गत्वं, तथाच प्रकृतहेतुतावच्छेद-कावच्छिन्नस्य प्रकृतसाध्यतावच्छेदकावच्छिन्नगमकतौपयिकं य-द्व्याप्तिविषयत्वं तच्छून्यत्वमर्थः। तच्च हेतौ साध्यव्याप्यतावग-गाहित्वम् हेतुभूताभावप्रतियोगितावच्छेदकावच्छिन्ने साध्या-भावव्यापकतावगाहित्वञ्च। द्रव्यत्वव्याप्यसंयोगवद्वृत्तिधर्मवा-नयं द्रव्यत्ववान् गुणात् गुणव्याप्यरूपवानयं स्पर्शवान् रूपादि-त्यादौ प्रतिज्ञासंग्रहायावच्छेदकद्वयोपादानम्।

अन्यूनानतिरिक्तपदमिति च मूलमुद्देश्यानुमित्यन्यूनानति-रिक्तविषयभागपरम्। हेतुत्वमभिधेयं मेयत्वादित्यादौ पञ्चम्यर्थ-पक्षकहेतुवारणाय पञ्चम्यन्तान्यत्वस्य हेत्वन्यत्वस्य वाऽवश्यं वा-च्यत्वात्। संख्यातिरिक्तसुवर्थस्य प्रातिपदिकार्थे विशेष्यत्वेनैवान्व-यात्। प्रातिपदिकार्थयोः क्रियाप्रातिपदिकार्थयोश्च भेदेन साक्षाद-न्वयस्याव्युत्पत्तेर्वक्ष्यमाणत्वात्। चैत्रस्येदं न मैत्रस्य मैत्रस्येदं न चैत्रस्य द्वयोरिदं नेदमेकस्यापीत्यादौ चैत्रादिसम्बन्धाभावबोधस्य

विना विभक्त्यर्थविशेष्यतामनुपपत्तेः चैत्रो न पचतीत्यादौ तिङ·
र्थस्येव विनाप्यनुयोगिनि सप्तमीं सुबर्थस्याप्यभावान्वयात् ।

हेतुविषयकज्ञानजनकत्वव्याप्यावयवावच्छेदकरूपशून्यत्वे
सत्युदाहरणान्यन्यायावयववत्त्वं तत्त्वम्, तादृशश्चावच्छेदकं हेतुत्वा·
दिकमिति केचित् ।

(गा०) उक्तरीत्या बहिर्भूतत्वनिर्वचनायासविद्वेषात्कल्पान्तरमा·
श्रयते वस्तुतस्त्विति । लिङ्गत्वमिति । व्याप्तिरित्यर्थः । नन्वत्रानु·
गतयोरन्वयव्यतिरेकव्याप्त्योस्तद्घटकव्यापकत्वयोर्वा एकतरमात्र·
विषयताया उपादानेऽन्यतरबोधकोपनयादावतिव्याप्तिरित्याशङ्क्या
तादृशव्याप्तिघटकव्यापकताद्वयविषयतयोरनुगतरूपेणाभावं निवेशय·
ति तथाचेति । प्रकृतहेतुतावच्छेदकावच्छिन्नस्येति गमकत्वान्वितम् ।
व्याप्तिविषयकत्वमित्यत्र व्याप्तिपदं व्यापकत्वाविषयतानिष्ठसाध्यताव·
च्छेदकादिविषयताव्यावृत्तविलक्षणौपयिकतानिवेशसूचनाय ॥

अथ किमिदं तादृशगमकतौपयिकत्वं ? न तावत्प्रकृतहेतुताव·
च्छेदकावच्छिन्नहेतुकप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यकानुमि·
तित्वावच्छिन्नजनकतावच्छेदकत्वम्–पक्षधर्मत्वाविषयकोदाहरणज·
न्यबोधीयव्यापकत्वादिविषयताया अनुमितिजनकतावच्छेदकको·
ट्यप्रविष्टतया तत्रातिव्याप्तेः । न च हेतुव्यापकत्वादिविषयतात्वेनैव
तद्विषयताया जनकतावच्छेदककोटौ निवेशादनुमित्यजनकस्यापि
तादृशज्ञानस्य विषयतानां तादृशरूपाक्रान्तानां तथात्वमक्षतमेवेति
वाच्यम् । तादृशविषयतात्वेन पक्षविशेषणतापन्नहेतुविशेषणतापन्न·
सामानाधिकरण्यविशेषणतापन्नसाध्यादिविषयतानिरूपितव्यापकत्व-
विषयताया एव कारणतावच्छेदकघटकत्वादतादृश्या तदवच्छेदक·
त्वाभावात् । यद्रूपावच्छिन्नविषयता जनकतावच्छेदिका तद्रूपावच्छि·
न्नविषयताशून्यत्वनिवेशे च साध्यतावच्छेदकाद्यवच्छिन्नविषयताया
अप्यनुमितिजनकतावच्छेदककोटिप्रविष्टतया तादृशविषयताशून्य-
त्वस्य प्रतिज्ञाजन्यबोधेऽप्यसत्त्वादसम्भवः । यद्रूपावच्छिन्नानिरूपि·
तव्यापकत्वविषयता जनकतावच्छेदिका तद्रूपावच्छिन्नव्यापकतान-
वगाहित्वनिवेशे च किञ्चिद्रूपावच्छिन्नव्यापकत्वं साध्यस्य पक्ष·

स्य वा घटकं यत्र तत्स्थलीयप्रतिज्ञाया असङ्ग्रहः, यत्त्वतंत्त्वनिवेशादनुगमानवकाशश्चेति चेन्न। पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिरूपितविषयतानिरूपिता या विषयता तन्निरूपितविषयतानिरूपितविषयतायां विशेषणविधया प्रकृतानुमितिजनकतावच्छेदकतावच्छेदकतायाः पर्याप्त्यधिकरणधर्मवत्त्वेन हेतुव्यापकताविशिष्टसाध्यविषयत्वसाध्याभावव्यापकताविशिष्टहेत्वभावविषयत्वे अनुगमय्य तादृशधर्मावच्छिन्नतदभावस्य निवेशनेनानुपपत्त्यभावात्। तथाहि—प्रकृतानुमितिजनकतावच्छेदिकायां अन्वयिपरामर्शीयहेतुव्यापकतावच्छिन्नसाध्यविषयताया पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितहेतुविषयतानिरूपिताधेयत्वविषयतानिरूपिताधिकरणविषयतानिरूपितत्वात्, व्यतिरेकिपरामर्शीयसाध्याभावव्यापकत्वावच्छिन्नहेत्वभावविषयताया अपि तादृशविशेष्यतानिरूपितसांसर्गीयविषयतानिरूपितहेतुविषयतानिरूपितप्रतियोगित्वविषयतानिरूपितत्वेन साध्याभावव्यापकताविशिष्टहेत्वभावविषयतात्वस्यापि हेतुव्यापकताविशिष्टसाध्यविषयतात्ववन्निरुक्तविषयत्वविशेषणविधया अनुमितिजनकतावच्छेदकतायाः पर्याप्त्यधिकरणत्वात्।

यद्यपि यथा परंपरया पक्षविशेष्यतानिरूपितोदाहरणजन्यबोधीयहेतुव्यापकताविशिष्टसाध्यादिविषयता नानुमितिजनकतावच्छेदिका तथा तन्निरूपितव्यापकत्वादिविषयतापि न तथेति तदीयसाध्यादिविषयताविशेषणतया व्यापकत्वादिविषयतानिरूपितत्वस्यानुमितिजनकतावच्छेदकतावच्छेदके प्रवेशो न सम्भवति जनकतावच्छेदकविषयतावृत्तेरेव धर्मस्य तादृशविषयताविशेषणतया जनकतावच्छेदकतावच्छेदकत्वसम्भवादिति निरुक्तपक्षाविषयतापञ्चमविषयतांशे विशेषणविधया अच्छेदकतावच्छेदकत्वपर्याप्त्यधिकरणं यत्साधनादिव्यापकत्वविषयतानिरूपितत्वसहितं साध्यादिविषयतात्वं तन्नोदाहरणजन्यबोधीयसाध्यादिविषयतासाधारणं तथाचोदाहरणेऽतिव्याप्तिर्दुर्वारैव, तथापि निरुक्तजनकतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नविषयतावच्छिन्ना या प्रतिबन्धकता तदवच्छेदकविषयतात्वेनोदाहरणबोधीयहेतुव्यापकसाध्यादिविषयतायाः संग्रहो बोध्यः। अनुमितिजनकतावच्छेदकपरामर्शीयसाध्यादिविषयताया हेतुव्यापकत्वादिविषयतानिरूपित-

साध्यादिविषयतात्वेन साध्यं हेतुव्यापकं न वेत्यादिसंशयप्रतिबन्धकतावच्छेदकत्वात्, तादृशप्रतिबन्धकतायां तादृशरूपेणोदाहरणजन्यबोधीयसाध्यादिविषयताया अप्यवच्छेदकत्वात् । मुख्यविशेष्यतानिवेशाद् गोत्वाभावः प्रमेयत्वव्यापकवाच्यत्ववत्सास्नाभाववान् गोत्वाभावादित्यत्र तादृशविशिष्टसाध्यकप्रकृतानुमितिजनकपरामर्शीयस्वात्मकपक्षविशेषणतापन्नगोत्वाभावविषयतानिरूपिताधेयत्वविषयतानिरूपिताधिकरणविषयतानिरूपितसास्नाभावविषयतानिरूपितवाच्यत्वविषयतांशे विशेषणविधयाऽवच्छेदकतावच्छेदकतायाः पर्याप्त्यधिकरणधर्मवत्प्रमेयत्वव्यापकवाच्यत्वविषयतात्ववद्विषयतायाः प्रतिज्ञाजन्यबोधे सत्त्वेऽपि न क्षतिः । जनकता च साध्यव्याप्यत्वावच्छिन्नधर्मिताकान्यपरामर्शीया ग्राह्या तेन तद्धर्मिकपरामर्शमादायापि नोक्तप्रतिज्ञायामव्याप्तिः । न च साध्याभावव्यापकहेत्वभावप्रतियोगिहेतुमानितिपरामर्शीयपक्षविशेष्यतानिरूपितहेतुविषयतानिरूपितप्रतियोगित्वविषयतानिरूपिताभावविषयतानिरूपितव्यापकत्वविषयताया अपि निरुक्तविषयतात्वात्तादृशविषयत्वविशेषणतयाऽवच्छेदकीभूतं साध्याभावव्यापकताविषयतात्वमपीति वह्न्यभावव्यापकमेयत्ववान् पर्वतो वह्निमानित्यादिप्रतिज्ञायामव्याप्तिरिति वाच्यम् । किंचित्व्यापकत्वविशिष्टविषयतांशे विशेषणतया अवच्छेदकतावच्छेदकत्वस्यैव निवेशनीयत्वात्, व्यतिरेकिपरामर्शीयपक्षविषयतापन्नमव्यापकत्वविषयतायाश्चातथात्वात् ।

वस्तुतस्तु चतुर्थविषयतायामभावनिष्ठप्रकारताभिन्नत्वस्य निवेशनीयत्वान्न कोपि दोषः । अन्वयव्यतिरेकव्याप्तिघटकव्यापकताद्वयविषयताया विशिष्टाभावद्वयनिवेशपरोऽयं ग्रन्थः । तथासति हेतुतावच्छेदकेत्याद्यनुगतशब्देनोभयोत्कीर्तनवैयर्थ्यापातात । विशिष्यापि तदुभयावगाहित्वस्य तच्चेत्यादिना दर्शनीयतया प्रथमत एव विशिष्य तदुभयानवगाहित्वार्थकत्वोपवर्णनानौचित्यात् ।

तच्चेति । तादृशगमकत्वौपयिकत्वं चेत्यर्थः । हेताविति । हेतुव्यापकताविशिष्टसाध्यविषयकत्वमर्थः । अतो नोक्तानुगमाविरोधः । हेतुभूताभावप्रतियोगितावच्छेदकेति । तादृशप्रतियोगितावच्छेदकं च धूमादिभावहेतुकस्थले धूमाभावत्वादिकं वह्न्यभावादिहेतुकस्थले च वह्नित्वादिकम् । एतदसंग्रहभयेनैव हेत्वभावत्वावच्छिन्न इति नोक्तम्,

तथासति अयं निर्धूमो निर्वह्नित्वादित्यादौ यत्र धूमस्तत्र वह्निः धूमव्यापकवह्न्यभाववांश्चायमित्याद्याकारकयोरेवोदाहरणोपनययोः प्रयोगाद्वह्नित्वाद्यवच्छिन्न एव साध्याभावव्यापकतायास्ततः प्रतीतिर्न तु वह्न्यभावाद्यभावत्वावच्छिन्न इति तत्रातिव्याप्त्यभावाप्रतिपादनेन न्यूनतापत्तेः । हेतुतावच्छेदकसाध्यतावच्छेदकनिवेशप्रयोजनमाह द्रव्यत्वेति । प्रतिज्ञासंग्रहायेति । प्रथमोपदर्शितप्रतिज्ञाविषयसंयोगत्वावच्छिन्ननिरूपितव्यापकताया अपि संयोगत्वेन गुणहेतुकद्रव्यत्वत्वाद्यवच्छिन्नानुमितेः द्वितीयप्रतिज्ञाविषयगुणत्वाद्यवच्छिन्नव्यापकतायाः गुणत्वेन स्पर्शसाध्यकरूपत्वावच्छिन्नहेतुकानुमितेः प्रयोजकत्वयाऽवच्छेदकद्वयानुपादाने तत्रतत्राव्याप्तेरिति भावः ।

नन्वेवं लिङ्गत्वाविषयकत्वविशेषणेनैवोदाहरणस्यापि वारणे पूर्वोक्तानुमितिसमानविषयकत्वविशेषणस्य व्यावृत्तिर्न सङ्गच्छते इति सत्यन्तोत्तरविषयान्तभागपरित्यागस्यैवावश्यकत्वेनान्यूनानतिरिक्तपदमात्रपरित्यागपरमूलविरोध इत्यालोच्य तादृशमूलस्य तथाविधसमुदायपरित्यागपरत्वमेवाह अन्यूनेति । नन्वेतत्कल्पे हेतुवारणायैव पक्षविशेष्यकत्वपर्यवसिततादृशविशेषणोपादानमावश्यकम्-तज्जन्यबोधस्य व्यापकत्वाविषयकत्वेन लिङ्गत्वाविषयकत्वदलेनावारणादिति कथं समुदायपरित्याग इत्यत आह हेतुत्वमिति । पञ्चम्यर्थपक्षक इति । तथाच पक्षमुख्यविशेष्यकत्वमपि तादृशहेतुजन्यबोधेऽक्षतमिति न तेन तद्वारणसम्भव इति भावः । पञ्चम्यन्तान्यत्वस्य निवेशे घटो दण्डात्पटो न दण्डादित्यादिपञ्चम्यन्तप्रतिज्ञानामसंग्रहमालोच्य कल्पान्तरमाह हेत्वन्यत्वस्येति । अवश्यं वाच्यत्वादिति । तथाच तत एव सकलहेतुवारणे उक्तसमुदायदलपरित्यागो न क्षतिमावहतीति भावः ।

ननु ज्ञापकत्वं पञ्चम्यर्थः, स च प्रकृत्यर्थस्य विशेषणतयैव भासते न तु विशेष्यतया, तथाच कथं पञ्चम्यर्थपक्षकन्यायान्तर्गतहेतोः पक्षमुख्यविशेष्यकबोधजनकत्वमत आह संख्येति । विभक्त्यर्थस्यैकत्वादेः प्रकृत्यर्थविशेषणतया बोध अनुभाविकः तस्य विशेष्यत्वे घटमित्यादित एकत्वं कर्मत्वं च घटीयमित्याकारकसर्वानुभवविरुद्धसमूहालम्बनबोधस्यापत्तेरतः संख्यातिरिक्तेति सुबर्थविशेषणम् । लिङर्थस्येष्टसाधनत्वादेः प्रकृत्यर्थविशेषण-

तया भानात्प्रत्ययार्थसामान्योपेक्षा । विशेष्यत्वेनैवेत्यत्र युक्तिमाह प्रातिपदिकार्थयोरिति । समानविभक्तिकनामार्थयोः क्रियाविशेषणी-भूतद्वितीयान्तनामार्थधात्वर्थयोश्चाभेदान्वयबोधोत्पत्त्या भेदेनेति । तयोरपि विभक्त्यर्थमन्तराकृत्य परंपरया भेदान्वयबोधात्साक्षादि-ति । अव्युत्पत्तेर्वक्ष्यमाणत्वादिति । भूतलं घट इत्यादावाधाराधे-यभावादिसम्बन्धेन घटभूतलयोः तण्डुलः पचतीत्यादौ च क्रियाक-र्मादिभावसम्बन्धेन तण्डुलपाकाद्योरन्वयबोधानुदयादिति भावः । त-थाच सुवर्थस्य प्रातिपदिकार्थविशेषणत्वे विभक्त्यर्थस्यान्तरा-भानेन प्रातिपदिकार्थस्य भूतलतण्डुलादेः घटपाकादौ आधारा-धेयत्वकर्मत्वादिसम्बन्धेन साक्षादेवान्वयबोधस्य भूतले घटः तण्डुलं पचतीत्यादितः स्वीकरणीयतया तादृशव्युत्पत्तिविरोध इत्याशयः । न च भूतले घट इत्यादौ घटाधिकरणं भूतलमित्या-द्याकारक एवान्वयबोध उपेयते नातो दर्शितव्युत्पत्तिविरोध इति वाच्यम् । तथासति शाब्दबोधे अनुभवसिद्धस्य प्रथमान्तार्थमुख्य-विशेष्यकत्वस्य भङ्गप्रसङ्गात् ।

ननु विभक्त्यर्थः संसर्गतयैव भासते न तु विशेष्यतया घटादा-वाधेयत्वादिसम्बन्धेन भूतलादिप्रकारकबोधे च सप्तम्यादिविभ-क्त्यन्तभूतलादिवाचकपदसमभिव्याहारस्य नियामकत्वान्नोक्ताति-प्रसङ्गः । न चैवं भूतले धूमादित्यादिभागमात्रस्याननुभावकत्वप्रस-ङ्गः, इष्टत्वात् । अस्तु वा विभक्त्यर्थाधिकरणत्वज्ञापकत्वादिविशेषि-तस्यैव प्रकृत्यर्थस्य तुल्यवित्तिवेद्याधेयत्वज्ञाप्यत्वादिसम्बन्धेनान्वय इत्यतो विभक्त्यर्थस्याविशेष्यत्वे नेदं मैत्रस्येत्यादौ मैत्रादिविशेषित-स्वत्वादिरूपस्याभावप्रतियोगिनोऽवान्तरवाक्यादनुपस्थितया नञ-र्थान्वयबोधानुपपत्तिमाह चैत्रस्येदमिति । मैत्रादेरेवाभावो नञा बो-ध्यते न तु स्वत्वस्येत्याशङ्कां निराचिकीर्षुणा तदुपगमे चैत्रीयधने-ऽपि संयोगसमवायादिना चैत्राद्यभावसत्त्वेन यत्र चैत्रस्येदमिति व्य-वहारः तत्र न चैत्रस्येदमित्यपि व्यवहारः स्यादिति सूचयितुं चैत्रस्ये-त्युक्तम् । न च स्वत्वादिसम्बन्धेनैव प्रकृत्यर्थस्याभावो दर्शितस्थले नञा बोध्यते, तथा च नोक्तातिप्रसङ्ग इति वाच्यम् । वृत्त्यनियामकत-या स्वत्वादेरभावप्रतियोगितावच्छेदकसम्बन्धत्वाभावात् नामार्थ-प्रतियोगिकाभावस्यानुयोगिनि सप्तमीं विना नञा बोधयितुमशक्य-

त्वाच्च। वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकत्वेऽपि स्वत्वादिसम्बन्धावच्छिन्नाभावस्य षष्ठ्याद्यन्तचैत्रादिपदसमभिव्याहृतनञा बोधनेऽनुयोगिनि सप्तम्या अनपेक्षणेऽपि च द्वयोरिदं नेदमेकस्येत्यादावगतिः। तथाहि—स्वत्वस्य विशेष्यत्वे स्वनिरूपकनिष्ठभेदाप्रतियोगिनिरूपितं यत्स्वत्वं तदभावो धननिष्ठस्तत्र प्रतीयते। अप्रतियोग्यन्तमेकपदार्थः सर्वत्र स्वसमभिव्याहृतपदार्थसंसर्गिनिष्ठभेदाप्रतियोगित्वरूपस्य सजातीयद्वितीयरहितत्वस्य एकपदार्थत्वात्। स्वत्वं षष्ठ्यर्थः। तथाविधं च स्वमेकमात्रनिरूपितं स्वत्वं न तूभयनिरूपितं तन्निरूपकस्यैकपुरुषस्य तन्निरूपकपुरुषान्तरनिष्ठभेदप्रतियोगितया तथाविधभेदाप्रतियोग्यप्रसिद्धेरिति तादृशस्वत्वाभाव उभयधनेऽबाधितः। स्वत्वसंबन्धेन एकपदार्थस्याभावो यदि नञा बोध्यते तदा स्वस्वामिनिष्ठभेदाप्रतियोग्येकपदार्थो वाच्यः। तत्र यदि स्वमभावस्यानुयोगि धनं तदाऽप्रसिद्धिः प्रमेयमात्रस्यैवोभयस्वामिकं यद्धनं तत्स्वामिनिष्ठभेदप्रतियोगित्वात्। यदि धनान्तरमेकमात्रनिरूपितस्वत्ववत् तदा तस्य समभिव्याहृतपदार्थत्वाभावादेकपदस्य तादृशार्थसम्बन्धिनिष्ठभेदाप्रतियोगिबोधकत्वव्युत्पत्तिभङ्गः. एकमात्रस्वत्ववद्धनान्तरस्वामिचैत्रमैत्रोभयधने नेदमेकस्येति व्यवहारानुपपत्तिश्च। एतदभिप्रायेणैव द्वयोरित्याद्यनुसृतम्।

इदमत्रावधेयम्। नेदमेकस्येत्यतः स्वनिरूपकनिष्ठभेदाप्रतियोगिनिरूपितयत्किञ्चित्स्वत्वस्याभावबोधे एकमात्रधनेऽपि तथाविधधनान्तरनिष्ठस्वत्वाभावसत्त्वात्तादृशप्रयोगप्रसङ्गः। तादृशस्वत्वसामान्यस्य चैकाभावो न सम्भवति प्रतियोगितावच्छेदकस्य स्वत्वघटितत्वेनाननुगमात्। अभावकूटस्य चासर्वज्ञदुर्ज्ञेयत्वमित्येकत्वसंख्यावच्छिन्न एवैकपदार्थस्तदन्वितस्वत्वस्य उभयस्वत्वानिरूपितविशेषणताविशेषेण स्वत्वस्य समवेतत्वे तादृशसमवायेन वाऽभावः प्रतीयतइत्युपगन्तव्यम्। तथाचोभयानिरूपितस्वत्वसम्बन्धेन प्रकृत्यर्थस्याभावबोधोऽपि सम्भवति। उभयानिरूपितत्वं च स्वनिरूपितत्वस्वभिन्ननिरूपितत्वोभयसम्बन्धेन किञ्चिद्विशिष्टं यत्तदन्यत्वमिति।

ननु स्वत्वस्य विशेष्यत्वेऽपि नेदं मैत्रस्येस्यादितः कथं स्वत्वसंसर्गाभावबोधः संसर्गाभावबोधमात्र एव नञा अनुयोगिनि सप्तम्यपेक्षणादित्यत आह चैत्रो न पचतीति। नामार्थप्रतियोगिकाभा-

घबोधे एवानुयोगिसत्तम्यपेक्षणादिति भावः ।

यथाश्रुतलिङ्गाविषयकत्वनिवेशे गन्धवतीतरेभ्यो भिद्यत इत्यादावव्याप्तिं प्रकारान्तरेण वारयतां मतमाह हेतुविषयकेति । कस्याश्चित् प्रतिज्ञाया हेतुविषयकज्ञानजनकत्वेऽपि प्रतिज्ञात्वस्य हेतुविषयकज्ञानजनकत्वानियतत्वात्तन्नियतान्यवयवतावच्छेदकानि हेतुत्वोपनयत्वनिगमनत्वान्येव न तु प्रतिज्ञात्वमिति नाव्याप्तिः । हेतुबोधकप्रतिज्ञानिष्ठप्रतिज्ञात्वादेः तादृशज्ञानजनकत्वानियतत्वादव्याप्तितादवस्थ्यमतोऽवयवतावच्छेदकेति । अभावहेतुकव्यतिरेक्युदाहरणस्य लिङ्गाविषयकज्ञानजनकस्य सम्भवादुदाहरणत्वस्य तादृशज्ञानजनकत्वानियतत्वादुदाहरणेऽतिव्याप्तिरत उदाहरणान्येति । प्रतिज्ञात्वादेः हेतुसाध्यपक्षभेदेन भिन्नत्वाद् गन्धवतीतरेभ्यो भिद्यते गन्धादित्यादावव्याप्तिः तदवस्थैव—तादृशप्रतिज्ञानिष्ठस्य प्रतिज्ञात्वस्य हेतुविषयकज्ञानजनकत्वनियतत्वात्, हेत्वादिभेदेपि प्रतिज्ञात्वाद्यभेदे तु प्रकृतहेतुविषयकज्ञानजनकत्वानियतावयवतावच्छेदकस्यैवाप्रसिद्धिः नानाहेतुहेत्ववयवादिसाधारणहेतुत्वादेरप्यतथात्वादित्यस्वरससूचनाय केचिदिति ॥

(चि०) हेत्वभिधानप्रयोजकजिज्ञासाजनकवाक्यत्वं वा लिङ्गाविषयकालिङ्गिविषयकज्ञानजनकान्यावयववाक्यत्वं वा इतरावयवानां लिङ्गविषयकज्ञानजनकत्वात् ॥

प्रतिज्ञात्वं जातिः अनुगतानातिप्रसक्तान्त्रिकव्यवहारादिति केचित् । तन्न । देवदत्तप्रभवत्वादिना जातिसङ्करप्रसङ्गात् । प्रतिज्ञाजन्यं विजातीयं ज्ञानं व्यवहारादिति तज्जनकं वाक्यं प्रतिज्ञेत्यपि न, तज्जनकत्वं जनकत्वज्ञानं वा नानुगतरूपमन्तरेण सम्भवतीत्युक्तस्यानुसरणीयत्वात् । एतेन शब्दोऽनित्य इति लिङ्गिधीपरवाक्यजन्यज्ञानवृत्तिकृतकत्वादित्यादिवाक्यजन्यज्ञानावृत्तिजातियोगिज्ञानजनकवाक्यं प्रतिज्ञेति

निरस्तम् ।

ननु प्रतिज्ञा न साधनाङ्गं विप्रतिपत्तेः पक्षपरिग्रहे तत्र प्रमाणाकाङ्क्षायां हेत्वभिधानस्य प्राथम्यादिति चेन्न । विप्रतिपत्त्यग्रे समयबन्धानन्तरं शब्दानित्यत्वं साधयेति मध्यस्थस्य वादिनो वाऽऽकाङ्क्षायां शब्दानित्यत्वं साध्यम् । न च साध्यनिर्देशं विना हेतुवाक्यं निष्प्रतियोगिकमन्वयं बोधयितुमीष्टे । नच वादिवाक्येऽनुपास्थितमपि योग्यतया अन्वेति-अतिप्रसङ्गात् । न च विप्रतिपत्तितः साध्योपास्थितिः तस्याः प्रतिवादिविप्रतिपत्त्या प्रमाणादिव्यवस्थया चान्तरितत्वात्, परविप्रतिपत्तिं समयबन्धश्च विना स्थापनाया अभावात्, विप्रतिपत्तिवाक्यस्य पक्षग्रहेण पर्यवसिततया निराकाङ्क्षत्वाच्च । आवृत्तौ तु सैव प्रतिज्ञा । न चावयवान्तराद्धेत्वन्वययोग्या साध्योपस्थितिः । नाप्यवयवान्तरेणाक्षेपात् साध्यान्वये तदभिधाने च साध्यान्वय इत्यन्योन्याश्रयात् । तस्मात् प्रतीत्यनुपपत्त्या प्रतीतानुपपत्त्या वा नेहाक्षेपः ।

अन्ये तु शब्दानित्यत्वे प्रमाणं वदेति यदि मध्यस्थस्यानुयोगः तथापि प्रमाणमात्रे नाकाङ्क्षा, किन्तु विशिष्टे । विशिष्टन्तु विशेषणं साध्यमनभिधाय न शक्याभिधानम् । न च वस्तुतो यत्साध्यम् तत्र प्रमाणं वदेति मध्यस्थानियोगः वादिद्वयमध्ये तदसम्भवात् । तस्मात्साध्याभिधानं विना न हेतोराकाङ्क्षा न वान्वयबोधकत्वमिति प्रतिज्ञा साधनाङ्गमिति ॥

(दी०) हेत्वभिधानेति। जिज्ञासाजनकत्वं—तद्योग्यता, वाक्यत्वं—न्यायावयवत्वम् ।

लिङ्गेत्यादि । लिङ्गाविषयकेति पूर्वोपदर्शितार्थकम् । अभावहेतुकव्यतिरेक्युदाहरणवारणाय लिङ्गीति। लिङ्गि—साध्यं, तद्विषयकं—तद्वद्विशेष्यकम्, तेनेदं जलं निःस्नेहत्वप्रकारकप्रमाविषयत्व-शून्यत्वात् इदं द्रव्यं जलान्यत्वप्रकारकप्रमाविषयत्वशून्यत्वादित्यादौ यन्न जलं तन्निःस्नेहत्वप्रकारकप्रमाविषय इत्याद्युदाहरणे नातिप्रसङ्गः ।

लिङ्गाविषयेत्यस्य पूर्वोक्तव्याप्यत्वाविषयार्थकत्वे हेतुवारणाय लिङ्गीति । लिङ्गिविषयत्वञ्च प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेत्वाविषयताबहिर्भावेन वाच्यम्, तेन वह्निमान् वह्निसामग्रीमत्त्वात् अयं हेतुरिदं वा हेतुत्वं तत्त्वेन प्रतीयमानत्वादित्यादौ हेतौ नातिप्रसङ्गः । लिङ्गविषयकज्ञानजनकत्वानियतलिङ्गिविषयकज्ञानजनकत्वानियतावयवतावच्छेदकरूपवत्त्वं तत्त्वमित्यादिकं तादृशावच्छेदकरूपान्तरापरिचये दुर्ग्रहत्वादनुपादेयम् ॥

(गा०) जिज्ञासाफलोपधायकत्वस्याव्याप्तिमाशङ्क्याह जिज्ञासेति । उदासीनेऽतिव्याप्तिवारणाय न्यायावयवत्वस्यावश्यं निवेशनीयतया वाक्यभिन्नातिव्याप्त्यप्रसक्तेर्वाक्यपदोपादानमनर्थकमित्याशङ्कया वाक्यपदस्यैव न्यायावयवत्वार्थकतामाह वाक्यत्वमिति ।

गन्धादित्यादावव्याप्तिवारणाय लिङ्गाविषयकेतीति । पूर्वोपदर्शितार्थकमिति । साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टपक्षतावच्छेदकावच्छिन्नपक्षविषयताबहिर्भूतलिङ्गविषयताशून्यार्थकमित्यर्थः । अभावहेतुकेति । वन्ह्यभावादिहेतुकेत्यर्थः । तत्र यो यो धूमवान् स स वह्निमानित्याकारकोदाहरणस्य लिङ्गाविषयकत्वादिति भावः । भावहेतुकस्य व्यतिरेकिणोऽप्युदाहरणस्य हेत्वभावत्वेनैव व्यतिरेकबोधकतया न लिङ्गाविषयकत्वसम्भवः, एवमभावहेतुकस्याप्यन्वय्युदा-

हरणस्य न तथात्वसम्भव इत्यभावहेतुकव्यतिरेकित्वानुधावनम् ।

लिङ्गि साध्यमिति । लिङ्गमस्यास्तीति व्युत्पत्त्या लिङ्गिपदस्य लिङ्गतानिरूपकत्वार्थकत्वादिति भावः । वक्ष्यमाणोदाहरणे साध्यविषयकत्वसत्त्वादतिव्याप्तेराह तद्वद्विशेष्यकमिति । तद्वद्विशेष्यकं तद्वन्मुख्यविशेष्यकम् । निःस्नेहत्वं–स्नेहत्वशून्यत्वम्, स्नेह एव तद्धेतुत्वे उदाहरणस्य न लिङ्गाविषयकत्वसम्भव इति तत्प्रकारकप्रमाविषयत्वशून्यत्वानुधावनम् । तच्च भावप्रतियोगिकतयाऽतिरिक्तमिति हृदयम् । जलत्वसन्देहदशायां जलान्यत्वस्य सन्दिग्धतया तत्प्रकारकप्रमाविषयत्वमपि सान्दिग्धमिति तच्छून्यत्वस्य हेतुतयोपन्यासो न सम्भवतीति प्रथमसाध्ये तदुपेक्षितम् । उत्पत्तिकाले जलस्यापि निःस्नेहतया द्रव्यत्वसाध्यकजलान्यत्वप्रकारकप्रमाविषयत्वशून्यत्वहेतुकस्थलान्तरमनुसृतम् । अत्रोक्तयुक्त्या जलत्वसाध्योपेक्षा ।

यत्तु जलान्यत्वप्रकारकप्रमाविषयत्वशून्यत्वमपि लाघवाज्जलत्वस्वरूपमेवेति जलत्वस्य साध्यत्वे उदाहरणजन्यबोधस्य साध्यविषयकस्य न लिङ्गाविषयकत्वसम्भव इति द्रव्यत्वसाध्यकानुधावनमिति । तन्न । जलान्यत्वप्रकारकप्रमाविषयत्वशून्यत्वस्य जलत्वस्वरूपत्वे यन्न द्रव्यं तज्जलान्यत्वप्रकारकप्रमाविषय इत्युदाहरणस्याप्यन्यत्वप्रतियोगितावच्छेदकतया लिङ्गविषयकत्वेनासङ्गतेः ।

पूर्ववद्व्याप्त्यविषयकस्य लिङ्गाविषयकत्वपदार्थत्वे उदाहरणस्य व्याप्तिबोधकतया तत्र लिङ्गिविषयकत्वविशेषणव्यावृत्तिर्न सम्भवतीत्याशयेन स्थलान्तरे व्यावृत्तिमाह लिङ्गेति । पूर्वोक्तेति । उक्तानुगतरूपावच्छिन्नेत्यर्थः । हेतुवारणायेति । इतरेषां त्रयाणां व्याप्तिविषयकत्वेनैव वारणादिति भावः । प्रकृतेति । हेतुतावच्छेदकहेतुहेतुत्वविषयतानां भेदनिवेशे साध्यस्य हेतुतावच्छेदकादिरूपत्वे हेतुतावच्छेदकादिविषयताभिन्नसाध्यविषयत्वाप्रसिद्ध्याऽव्याप्तिरिति विशिष्टविषताबहिर्भावनिवेशः । तादृशविषयताबहिर्भावः पूर्ववन्निर्वाच्यः । न च तादृशविषयताबहिर्भूतविषयतामात्रनिवेशेनैव हेतुवारणसम्भवे साध्यांशवैयर्थ्यमिति वाच्यम् । तादृशविषयतान्तर्भूतसाध्यविषयताभिन्नत्वस्यैवात्र बहिर्भावेनेत्यन्तेन विवक्षिततया दर्शितहेतौ तादृशसाध्यविषयताभिन्नहेतुत्वादिविषयतामादायातिप्रसङ्गस्य वारकतया तत्सार्थक्यात् भेदप्रतियोगिकोटौ निविष्टस्य साध्यांशस्य चाखण्डा-

भावघटतया ऽवैयर्थ्यात् । यत्र च प्रकृतहेतुतावच्छेदकविशिष्टहेतु-
विशिष्टहेतुत्वविषयतान्तर्भूतसाध्यविषयताया अप्रसिद्धिस्तत्र बहि-
र्भूतान्तमनुपादेयमेव शब्दैक्यस्यानपेक्षितत्वादिति नाव्याप्तिः । तादृ-
शविषयतान्तर्भूतत्वसाध्यीयत्वोभयाभाव एव वा बहिर्भावेनेत्यन्ता-
र्थः । हेतुतावच्छेदकहेतुहेतुत्वानां निवेशस्य प्रयोजनं क्रमेण दर्शयति
तेनेति तत्त्वेनेति । हेतुत्वेन हेतुत्वत्वेन चेत्यर्थः । हेतुहेतुत्वयोस्तादा-
त्म्येन साध्यत्वं बोध्यम् । हेतुत्वावच्छिन्नसाध्यकस्थले हेतुत्वेन प्रमी-
यमाणत्वरूपप्रकृतहेतोरपि साध्यतावच्छेदकाक्रान्ततया हेतुजन्यबो-
धस्य साध्यविषयकत्वमक्षतमेव साध्यतावच्छेदकविशिष्टनिरूपित-
विषयतापर्यन्तस्याविवक्षितत्वादिति हेतुविशेष्यताबहिर्भावनिवेशव्या-
वृत्तिसङ्गतिः । न च हेतुविषयताबहिर्भावनिवेशापेक्षया साध्य-
तावच्छेदकविशिष्टविषयकत्वनिवेशनमेव लाघवेनोचितमिति वा-
च्यम् । विशिष्टविषयताबहिर्भावे निवेशनीये हेतुविषयताबहिर्भावस्य
स्वातन्त्र्येण निवेशनीयतया गौरवानवकाशात् । हेत्वंशानिवेश एव
हेतुतावच्छेदकविषयित्वहेतुत्वविषयतयोर्बहिर्भावस्य पृथक् निवेशनी-
यतया गौरवात्, हेतुतावच्छेदकादिप्रविष्टसाध्यकप्रतिज्ञायामव्याप्तेश्च ।
हेत्वंशमनिवेश्य विशिष्टस्य दुर्निवेश्यतया विशिष्टनिवेशनैव तन्नि-
वेशात् । एवं च प्रमेयत्वाद्यवच्छिन्नसाध्यकस्थलेऽपि हेत्वंशनिवेशप्र-
योजनसम्भवादयं हेतुरित्युपलक्षणपरं बोध्यम् ।

लिङ्गिविषयकेत्यस्य पूर्ववत्साध्यवद्विशेष्यकार्थकत्वोपगमे वह्निमान्
वह्निसामग्रीमत्त्वात् अयं हेतुः तत्त्वेन प्रमीयमाणत्वादित्यनयोः अति-
प्रसङ्गवारणसंभवेऽपि इदं हेतुत्वामित्यादौ पञ्चम्यर्थस्य तादात्म्य-
सम्बन्धेन साध्यतायां साध्यप्रकारतानिरूपितविशेष्यतार्थ-
कत्वेऽपि स्वरूपसम्बन्धेन हेतुत्वत्वसाध्यकस्थले निरूपितत्वसम्ब-
न्धेन ज्ञानत्वावच्छिन्नसाध्यकजनकतात्वावच्छिन्नपक्षकस्थले च हेता-
वतिव्याप्तिवारणं न सम्भवतीति गुरुतरारम्भः । लिङ्गविषयतायां
पूर्वोपदर्शितविषयताबहिर्भावनिवेशनं लिङ्गपदस्य धर्मपरतां विनैव
लिङ्गबोधकप्रतिज्ञाविशेषेऽव्याप्तिं लिङ्गिपदविषयपदयोः साध्यवद्वि-
शेष्यपरतां विनैव दर्शितव्यतिरेक्युदाहरणाऽतिव्याप्तिं प्रकारान्तरेण
वारयतां मतमुपन्यस्य दूषयति लिङ्गेति । निगमनस्योदाहरणस्य
च वारणाय नियतान्तद्वयमवयवतावच्छेदकविशेषणम्, प्रतिज्ञात्वोदाह-

रणत्वयोरपि लिङ्गलिङ्गिविषयकज्ञानजनकत्वसमानाधिकरणतया असम्भवातिप्रसङ्गासम्भवात् सामानाधिकरण्यमुपेक्ष्योभयत्र नियतत्वप्रवेशनम्। उदाहरणविशेषत्वमादायातिप्रसङ्गवारणायावच्छेदकत्वान्तम्। आदिपदात्पञ्चमीविभक्तिमत्त्वानियतलिङ्गिविषयकज्ञानजनकत्वानियतावच्छेदकरूपवत्त्वादिपरिग्रहः। रूपान्तरेति। यद्यपि निरुक्तस्यापि रूपस्यापरिचयादन्तरपदमनर्थकम्, तथाप्यात्माश्रयभयेन तथाविधरूपान्तरपरिचयोऽपेक्षणीयः। तच्च रूपमनुमित्यन्यूनानतिरिक्तविषयकशाब्दधीजनकवाक्यत्वादिकमेव, तथाच तस्यैव तद्घटकस्य लक्षणत्वसम्भवाद्व्यर्थविशेषणता। न च तस्य विशेष्याघटकत्वान्न व्यर्थविशेषणतेति वाच्यम्। प्रतिज्ञात्वहेतुत्वसाधारणस्यावयवतावच्छेदकत्वस्य दुर्वचतया विशिष्य तन्निवेशस्यावश्यकत्वादित्येतल्लाभायान्तरपदम्। अत्र च साध्यादिभेदेनाभिन्नं प्रतिज्ञात्वं यद्यवच्छेदकत्वेन निविश्यते तदा तस्य प्रकृतसाध्यविषयकत्वनियतत्वासम्भवादप्रसिद्धिः। यदि च साध्यादिभेदेन भिन्नं सत्तदा यादृशसाध्यपक्षकप्रतिज्ञायां प्रकृतलिङ्गबोधकत्वं नियतं तत्राव्याप्तिरित्यपि दूषणं बोध्यम्॥

इति गादाधर्यामवयवग्रन्थे प्रतिज्ञालक्षणम्।

साध्यनिर्देशानन्तरं कुत इत्याकाङ्क्षायां साधनताव्यञ्जकविभक्तिमल्लिङ्गवचनमेवोचितम्, अन्यथाऽनाकाङ्क्षाभिधाने निग्रहापत्तेः लोके तथैवाकाङ्क्षानिवृत्तिरिति व्युत्पत्तेरिति प्रतिज्ञानन्तरं हेतूपन्यासः । हेतुत्वञ्चानुमितिकरणीभूतलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकसाध्याविषयकशाब्दधीजनकहेतुविभक्तिमच्छब्दत्वम् ।

(दी०) अनुमितीत्यादि । जनकान्तं न्यायावयवार्थकम् । निगमनवारणाय साध्याविषयकेत्यादि । साध्याविषयत्वञ्च प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविषयतावहिर्भावेन पूर्वोपदर्शितसाक्षात्परम्परासाधारणप्रकृतपक्षविशेषणत्वेन वा तेन पूर्वोपदर्शितहेतौ नाव्याप्तिः । इदं न दण्डाज्जातं दण्डसंयोगाजन्यद्रव्यत्वात् अयं न धूमादालोकवान् आर्द्रेन्धनशून्यत्वादित्यादौ व्यतिरेकव्युदाहरणस्य हेतुत्वपक्षकसाध्यान्वितस्वार्थबोधकेदम्पदशालिन उपनयस्य च वारणाय हेतुविभक्तिमदिति । तदर्थश्च प्रकृतसाध्यान्वयबोधनक्षमार्थोपस्थितिजनकहेतुविभक्तिमत्त्वम् । हेत्विति सम्पातायातम् ।

यदि च पर्वते पर्वतभिन्नत्वप्रकारकज्ञानस्य विशेष्यतया अभावस्य साध्यत्वं हेतुत्वञ्च सिषाधयिषया च न्यायप्रयोगस्तत्र यथा तादृशज्ञानाभावादुत्पन्नं ज्ञानमिति दृष्टान्तशालिनि व्यतिरेक्युदाहरणेऽतिव्याप्तिरित्युच्यते, तदावयवान्तरोपस्थितार्थान्वितस्वार्थबोधकविभक्तिमत्त्वं वक्तव्यम् । उदाहरणान्यत्वेन वा विशेषणीयम् ।

केचित्तु साध्यविषयकधीजनकत्वानियतहेतुविभक्तिमत्त्वनियतावयवतावच्छेदकरूपत्वं समुदितलक्षणार्थ इत्याहुः । तच्चिन्त्यम् ।

(गा०) निगमनवारणायेति । प्रतिज्ञोदाहरणोपनयनविशेषाणां विवक्षणीयहेतुविभक्तिमत्त्वविशेषणेन वारणसम्भवान्न तदुक्तम् । ननु साध्याविषयकबोधजनकत्वनिवेशे वह्निमान्वह्निसामग्रीमत्त्वादित्या- द्युक्तहेतावव्याप्तिरत आह साध्याविषयकत्वं चेति । बहिर्भावेणेति । विवक्षणीयमिति शेषः । साध्यांशोपादानं हेतुविभक्तिमत्त्वदलसार्थ- क्याय । एतत्कल्पे तादृशसाध्याविषयकत्वप्रतियोगिकोटौ साध्यां- शमुपादाय दलान्तरोपादानं 'प्रक्षालनाद्धी'त्यादिन्यायेन सन्दर्भवि- रुद्धमतः कल्पान्तरमाश्रयते पूर्वेति । तस्माद्वह्निमानित्यादिनिगमने मत्त्वर्थांशे एव साध्यांशस्य विशेषणतयाऽतिव्याप्तिरतः साक्षात्प- रम्परासाधारणेति । तथाच तत्रापि परम्परया साध्यस्य पक्षविशे- षणत्वान्न दोषः ।

हेतुत्वं प्रमेयं प्रमेयादित्यादौ प्रमेयत्वादिसाध्यके हेत्ववयवेऽव्या- प्तिः हेतुतावच्छेदकीभूतसाध्यस्य परम्परया पक्षविशेषणत्वादतः पूर्वोपदर्शितेति । प्रकृतपक्षसाध्यकप्रतिज्ञाजन्यबोधे यादृशं पक्षांशे साध्यस्य विशेषणत्वं तादृशेत्यर्थः । तच्च साध्यतावच्छेदकसम्ब- न्धावच्छिन्नं साक्षात्पक्षनिरूपितं पक्षांशेऽभेदादिसम्बन्धेन विशेष- णतापन्नसम्बन्ध्यादिनिरूपितं च, तादृशविशेषणतात्मकसाध्यविषय- ताशून्यत्वं समुदितार्थः । अयं वह्निमान् वह्निमदवृत्तिधर्मशून्यत्वादि- त्यादौ हेतावव्याप्तिवारणाय प्रकृतेति पक्षतावच्छेदकावच्छिन्नार्थकम् । न चैवमनुषङ्गपक्षे निगमनजन्यबोधे साध्यस्य पक्षतावच्छेदकाव- च्छिन्नाविशेषणत्वादतिव्याप्तितादवस्थ्यमिति वाच्यम् । अननुषङ्गपक्षे पक्षमुख्यविशेष्यतानिरूपितप्रकारतापन्नत्वरूपं पक्षविशेषणतापन्नत्वं यदि निवेश्यते तदा पक्षतावच्छेदकावच्छिन्नत्वाविवक्षणेऽपि तस्मादि- तरेभ्यो भिद्यत इत्यादिनिगमनादावतिव्याप्तेरशक्यपरिहारतया एत- त्कल्पस्यानुषङ्गपक्षाभिप्रायकत्वात् ।

अयं धूमाभाववान् वह्न्यभावादित्यादौ यो धूमवान्स वह्निमा- नित्यादेर्व्यतिरेक्युदाहरणस्य यथाश्रुतहेतुविभक्तिमत्त्वनिवेशेनापि वारणसम्भवाद्विवक्षणीयस्य प्रकृतसाध्यान्वयबोधनक्षमार्थोपस्थि- तिजनकहेतुविभक्तिमत्त्वस्य व्यावृत्तिस्थलमाह इदमिति । उदाहर- णस्य साध्याविषयकत्वरक्षणायाभावसाध्यकानुधावनम् । हेतुविभक्ति- पदस्य ज्ञापकत्वरूपहेतुत्वबोधकविभक्त्यर्थकत्वे प्रथमोदाहरणे नाति-

व्याप्तिः-तत्र जनिधात्वर्थोत्पत्त्यन्वितप्रयोज्यत्वस्यैव पञ्चम्यर्थत्वात् अतः स्थलान्तरमाह अयमिति। व्यतिरेक्युदाहरणस्येति। यद्दण्डाज्जातं तद्दण्डसंयोगाजन्यद्रव्यत्वाभाववत् यो धूमादालोकवान् स आर्द्रेन्धनवानित्याकारकस्येति शेषः। साध्याविषयकत्वरक्षायै व्यतिरेकिपर्यन्तानुधावनम्। यद्यप्यन्वय्युदाहरणस्य साध्यविषयकत्वेऽपि पक्षतावच्छेदकविशिष्टे साध्याविशेषणकत्वादतिव्याप्तिस्तद्वस्थैव द्वितीयकल्पे तथापि प्रथमकल्पेपि व्यावृत्तिघटनायाभावसाध्यकव्यतिरेक्यनुसरणम्। तत्र तादृशोदाहरणस्य साध्यान्वितस्वार्थबोधकपदशालित्वनिवेशनेनैव वारणसम्भवात्। तादृशविभक्तिपर्यन्तस्य व्यावृत्तिस्थलमाह हेतुत्वपक्षकेति।। साध्यान्वितेति। निगमनोपस्थाप्यसाध्यान्वितेत्यर्थः। विशेषणतया साध्यान्वितस्याविवक्षणादिति भावः। न चोपनये व्याप्तिघटकतया साध्यविषयकत्वसत्त्वान्नातिव्याप्तिः प्रसज्यते अनुषङ्गपक्षे निगमनोपस्थाप्यसाध्येन सममिदंपदार्थस्य हेतुत्वस्यानन्वयाद्व्यावृत्तिदानस्याननुषङ्गपक्षाभिप्रायकतयाऽननुषङ्गपक्षे च निरुक्तविषयताबहिर्भूतसाध्यविषयताशून्यत्वस्यैव साध्याविषयकत्वपदार्थतया पक्षविशेषणतया साध्याविषयकत्वस्याप्रयोजकत्वादिति वाच्यम्। उपनयपदस्य इतरत्वव्यापकीभूताभावप्रतियोगिमत्त्वेत्याकारकाभावसाध्यकव्यतिरेक्युपनयपरत्वात्।

प्रकृतसाध्येति। प्रकृतसाध्यान्वितस्वार्थभानप्रयोजकाकांक्षादिमद्धेतुविभक्तिमत्त्वमित्यर्थः। उपदर्शितस्थले धूमज्ञानज्ञाप्यालोकाभावादिरूपसाध्यांशे पञ्चम्यर्थानन्वयान्नातिव्याप्तिरिति भावः

नन्वेवं हेतुपदमनर्थकं साध्यान्वितस्वार्थबोधकविभक्तिशालिनो हेत्वतिरिक्तावयवस्य साध्यविषयकतानियमेनातिप्रसङ्गानवकाशात्। न च पक्षविशेषणतया साध्याविषयकत्वनिवेशपक्षे ज्ञानादिसाध्यकेय इच्छति स जानातीत्युदाहरणे ज्ञानादिरूपसाध्यान्वितस्वार्थबोधकाख्यातविभक्तिशालिनि विशेषणविभक्तेरभेदार्थकत्वमते प्रमेयत्वादिपक्षकप्रमेयत्वादिसाध्यकोपनये पक्षीभूतसाध्यान्विताभेदबोधकप्रथमाविभक्तिशालिनि चातिव्याप्तिवारणाय हेतुपदोपादानमावश्यकमिति वाच्यम्। पक्षविशेषणतया साध्याविषयकत्वनिवेशपक्षे हेतुपदोपादानेऽपि (यो यो धूमवान् स स वह्निमान् यथा धूमाद्वह्निमन्महानस-

मिति) दर्शितसद्दृष्टान्तोदाहरणातिव्याप्तिवारणायोपदर्शितसाक्षात्परम्परासाधारणप्रकृतपक्षविशेषणतापन्नसाध्यान्वितस्वार्थबोधकत्वस्यावश्यं निवेशनीयतया तादृशोदाहरणोपनययोस्तथाविधसाध्यान्वितस्वार्थबोधकविभक्तिसत्त्वविरहेणातिप्रसङ्गानवकाशादित्यत आह हेत्विवतीति । इदमुपलक्षणम् । पक्षविशेषणतया साध्याविषयकत्वनिवेशकल्पे विभक्तिमत्त्वमपि नोपादेयम्–तत्कल्पस्यानुषङ्गपक्षपरतया तत्पक्षे उपनयस्य निगमनैकवाक्यताविरहेण साध्यान्वितस्वार्थबोधजनकपदशालित्वाभावादुपर्शितविभक्तिपदव्यावृत्तेरनुषङ्गपक्षेऽसङ्गतेस्तत्कल्पे व्यावृत्त्यभावादिति केचित् ।

वस्तुतोऽनुषङ्गपक्षेऽपि उपनयस्थस्यैव पक्षबोधकेदंपदस्य निगमनघटकीभूतसाध्यान्वितस्वार्थबोधकतया तादृशबोधे च प्रयोजनान्तरविरहेण स्वजन्यत्वानिवेशादुपनये विभक्तिपदव्यावृत्तिः सम्भवतीत्यवधेयम् ।

ननु प्रथमसाध्याविषयकत्वनिर्वचनपक्षे पर्वतः पर्वताभिन्नत्वप्रकारकज्ञानाभाववान् तादृशज्ञानाभावात् यः पर्वतभिन्नत्वेन ज्ञायते स पर्वतभिन्नत्वेन ज्ञायते यथा पर्वतभिन्नत्वप्रकारकज्ञानाभावादुत्पन्नं ज्ञानमित्यादौ विशेष्यतासम्बन्धावच्छिन्नप्रतियोगिताकाभावसाध्यकहेतुकव्यतिरेक्युदाहरणेऽतिव्याप्तिः। तत्र हेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुत्वविषयतान्तर्भूताया एव साध्यविषयतायाः सत्त्वात् साध्यीभूततादृशाभावान्वितस्वार्थबोधकपञ्चमीविभक्तिमत्त्वाच्च, प्रथमकल्पे साध्ये पक्षविशेषणतापन्नत्वानिवेशात् दृष्टान्तोपस्थाप्यस्य तादृशसाध्यस्य पक्षानन्वितस्याकिञ्चित्करत्वादित्यत आह यदि चेति । सिषाधयिषया न्यायप्रयोगस्य सविवादतया यदि चेत्युक्तम्, तस्य च इत्युच्यत इत्यनेनान्वयः । समवायसम्बन्धावच्छिन्नाभावस्य साध्यत्वे ज्ञानस्य समवायेन ज्ञानरूपप्रतियोग्यनधिकरणतया न व्यतिरेकदृष्टान्तत्वसम्भव इति विशेष्यतयेत्युक्तम् । अत एव महानसत्वप्रकारकज्ञानाभाव उपेक्षितः विशेष्यतयापि ज्ञानस्य तादृशज्ञानवत्त्वाभावात् । साध्यस्य हेतुतायामेव हेतुत्वविशेषणतापन्नतथाविधसाध्यविषयतायाः हेतुतावच्छेदकविशिष्टहेतुविषयितान्तर्भावः सम्भवतीति तदादरः । ज्ञानाभावादुत्पन्नमिति । असंसर्गाग्रहविधया तादृशज्ञानाभावस्य पर्वतत्वप्रकारकज्ञानोत्पाद-

कत्वं बोध्यम् । व्यतिरेकिपर्वतानुधावनं विशिष्टविषयताबहिर्भूतसाध्यविषयत्वाभावनिर्वाहाय । प्रकृतसाध्ये विशेषणतयाऽन्वितो यः स्वार्थस्तद्बोधकत्वं च दर्शितहेतुत्वपक्षकोपनयस्थेदंपदस्य नास्तीति तद्विलक्षणे विभक्तिपदवैयर्थ्यमिति विशेष्यविशेषणसाधारणमेवान्वितत्वं निवेशनीयमित्युक्तोदाहरणबोधे पञ्चम्यर्थस्य साध्यविशेष्यत्वेऽप्यतिप्रसङ्ग एवेत्यभिप्रायः ।

अवयवान्तरेति । स्वभिन्नावयवघटकपदजन्योपस्थितिसहकारेण वा तत्पदार्थान्वितस्वार्थबोधकविभक्तिमत्त्वमित्यर्थः । तेन तादृशसाध्यस्य प्रतिज्ञावयवघटकपदोपस्थापितत्वेऽपि नातिव्याप्तिः । न चैवमनुषङ्गपक्षे साध्याविषयकत्वविशेषणमनर्थकं निगमनस्य तत्पक्षे उपनयेनैकवाक्यताविरहेण स्वाघटकपदोपस्थापितार्थान्वितार्थबोधकविभक्तिमत्त्वाभावात् व्यावृत्त्यसङ्गतेरिति वाच्यम् । चैत्रः पचति पाककृतिसामग्रीमत्त्वादित्यादौ पाककृत्यादिसाध्यकप्रतिज्ञायां हेत्ववयवस्थपञ्चम्युपस्थाप्यहेतुत्वान्वितस्वार्थबोधकाख्यातविभक्तिमत्त्वादतिव्याप्तिवारणाय साध्याविषयकत्वोपादानस्यावश्यकत्वात्, प्रथमरीत्या साध्याविषयकत्वनिर्वचनस्याननुषङ्गपक्ष इवानुषङ्गपक्षेऽपिसम्भवात्, अननुषङ्गपक्षे एवेयं विवक्षा, अनुषङ्गपक्षे तूदाहरणान्यविशेषणेनानुपदमुक्तादाहरणं वारणीयमित्यपि वदन्ति ।

साध्यघटितार्थबोधकोक्तहेतावव्याप्तिं हेतुविभक्तिमदुक्तोदाहरणेऽतिव्याप्तिं च प्रकारान्तरेण वारयतां मतमाह केचित्त्विति । निगमने हेतुविभक्तिनैयत्यात्तत्रातिव्याप्तिवारणाय नियतान्तम् । हेतुत्वस्यापि साध्यबोधकोक्तहेतुवृत्तितयाऽसम्भव इति असामानाधिकरण्यमुपेक्ष्यानियतत्वानुधावनम् । उदाहरणोपनययोः साध्याविषयकबोधजनकयोरपि सम्भवादुदाहरणोपनयसामान्यवारणाय नियतान्तम् । हेतुविभक्तिमद्दर्शितोदाहरणवृत्त्युदाहरणत्वमादायातिप्रसङ्गवारणाय सामानाधिकरण्यमुपेक्ष्य नियतत्वनिवेशनम् । विभक्तिमत्त्वमनुपादेयं हेतुत्वप्रतिपादकपदवत्त्वनिवेशनेनैवानतिप्रसङ्गात् । हेतुत्वप्रतिपादकपदवत्त्वनैयत्यार्थप्रतिपादकविभक्तिमत्त्वनैयत्ययोर्वैकल्पिकमुपादानम् वा । तत्र च द्वितीयकल्पे विशेषणविभक्तेर्निरर्थकत्वाभिप्रायेण उदाहरणविशेषत्वमादाय उक्तोदाहरणेऽतिव्याप्तिवारणायावयवतावच्छेदकेति । तच्चिन्त्यमिति । चिन्ताबीजं पूर्ववत् ।

(चि०) हेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वं वा उदाहरणप्रयोजकाकाङ्क्षाजनकशाब्दज्ञानजनकन्यायावयवत्वं वा साध्याविषयकज्ञानजनकहेतुपञ्चम्यन्तानुमितिपरशाब्दत्वं वा प्रतिज्ञावाक्यधीजन्यकारणाकाङ्क्षानिवर्त्तकज्ञानजनकहेतुविभक्तिमद्वाक्यत्वं वा ।

(दी०) हेतुत्वप्रतिपादकेति । विभक्त्यर्थहेतुत्वविशेष्यकान्वयबोधजनकन्यायावयवत्वमित्यर्थः । हेतुत्वं प्रमेयमित्यादिप्रतिज्ञावारणाय विभक्त्यर्थेति । तस्मादितरभ्यो भिद्यते इत्यादिनिगमनवारणाय हेतुत्वेति विशेष्येति च । घटो दण्डाद्वह्निधूमादित्यादिका तु न प्रतिज्ञा तदवृत्तेरतदात्मनश्च तद्धर्मव्यापकत्वायोगात् सम्प्रदायविरोधाच्च तेन तत्रत्यनिगमने नातिव्याप्तिरिति भावः ।

उदाहरणेति । क्वचिज्जिज्ञासानुत्पादेऽपि तद्योग्यतासत्त्वान्नाव्याप्तिः । अनुक्तोदाहरणस्थलेऽपि तादृशयोग्यतासत्त्वान्न्यायावयवेति । उदाहरणत्वञ्चेह न न्यायगर्भं वैयर्थ्यात् ।

साध्याविषयेत्यादि । अयं न दण्डादण्डसंयोगाजन्यद्रव्यत्वादित्यादौ प्रतिज्ञानिगमनयोर्वारणाय साध्याविषयेत्यादिव्याख्यातार्थकम् । उपनयविशेषणवारणाय हेतुपञ्चम्यन्तेति ।

हेत्विति हेतुत्वबोधकार्थकं हेतुपञ्चम्योर्वैकल्पिकमुपादेयम् । उपनयस्य चान्तेऽनुसन्धीयमाना प्रथमैवान्तः । एवं दण्डादित्यादेः स्वपरस्यापि दृष्टान्तस्य पञ्चम्यन्तत्वेऽन्वयायोगात् । कस्यचिद्व्यतिरेकिण उदाहरणस्य पञ्चम्यन्तत्वसम्भवे तु तद्वारणं पूर्ववत् । अत्र चार्थवद्भागस्य हेतुपञ्चम्यन्तत्वं बोध्यम्, तेन निर-

र्थकतसिलन्तत्राद्विप्रमात इत्यादौ नाव्याप्तिः । पञ्चम्यादेस्तसिला-द्यादेशत्वादिनां नये तु नानुपपत्तिगन्धोऽपि ।

केचित्तु हेतुपञ्चम्यन्तत्वं हेतुत्वप्रतिपादकपदशालित्वम्, पूर्ववत्साध्याविषयकज्ञानजनकत्वञ्च इतरनैरपेक्ष्येण प्रकृतहेतुत्वविशिष्टसाध्यविषयकज्ञानाजनकत्वम्, साध्यश्चेह न विवक्षितं वैयर्थ्यादित्याहुः ।

(गा०) यथाश्रुतप्रकृतद्वितीयलक्षणार्थस्य निगमनसाधारणतयाऽन्यथा व्याचष्टे विभक्त्यर्थेति । विभक्तिजन्यहेतुत्वोपस्थितिद्वारा हेतुत्वमुख्यविशेष्यकशाब्दधीजनकन्यायावयवत्वमित्यर्थः तेन हेतुत्वे विभक्त्यर्थहेतुत्वविशेषणस्याव्यावर्त्तकत्वेऽपि न क्षतिः । निगमनवारणायेति । तत्र तिङर्थस्य विशेष्यत्वादिति भावः । विशेष्यत्वेति । हेतुत्वविशेष्यकत्वस्य तत्रापि सत्त्वेन मुख्यविशेष्यतापर्यन्तानिवेशने तत्रातिव्याप्तिरिति भावः ।

ननु घटो दण्डादित्यादिप्रतिज्ञाघटितघटादिपक्षकनिरूपकतासंसर्गकदण्डादिनिष्ठहेतुतासाध्यकन्यायान्तर्गते तस्माद्दण्डादित्याकारकनिगमनेऽननुषङ्गपक्षे विभक्त्यर्थहेतुत्वविशेष्यकबोधजनकेऽतिव्याप्तिरत आह घटो दण्डादिति । ज्ञापकत्वरूपहेतुत्वस्यैव प्रकृते निवेशनीयतया जनकत्वरूपहेतुत्वसाध्यकप्रथमस्थले नातिव्याप्तिप्रसङ्ग इत्यतो वह्निपक्षकधूमनिष्ठज्ञापकतासाध्यकस्थलान्तरानुसरणम् । तदवृत्तेरिति । तादात्म्यातिरिक्तवृत्त्यनियामकसम्बन्धेन व्यापकत्वानभ्युपगमादिति भावः । तादात्म्येन स्वस्य स्वधर्मव्यापकत्वसत्त्वादाह अतदात्मन इति । ज्ञाप्यताया एव नवीनमते पञ्चम्यर्थतया ज्ञाप्यत्वसाध्यकतादृशप्रतिज्ञा सम्भवत्येव, तथा चासम्भववारणाय लक्षणस्थहेतुत्वपदेनापि तादृशस्य हेतुत्वरूपार्थस्यैव विवक्षणीयतया तत्रत्यनिगमनेऽतिव्याप्तितादवस्थ्यमित्याशंक्याह सन्दर्भविरोधाच्चेति ।

न्यायानन्तर्गतस्य धूमादित्यादिभागस्य उदाहरणप्रयोजकजिज्ञासोपधायकत्वविरहेऽपि तत्स्वरूपयोग्यतामादायातिव्याप्तिं प्रसज्य न्यायावयवत्वदलं सार्थकीचिकीर्षुर्जनकतापदस्य स्वरूपयोग्यतापरत्वं स्फुटयति क्वचिदिति । अभ्युपेत्य फलोपधाननिवेशेऽपि

न्यायावयवत्वनिवेशनमावश्यकमित्याह उदाहरणत्वं चेति । वैयर्थ्या-त्-प्रयोजनान्तराभावात् । तथाच यत्रोदाहरणान्तमेव प्रयुक्तं त-त्राप्युदाहरणप्रयोजकजिज्ञासाफलोपधानसम्भवेनातिव्याप्तिवारणाय न्यायावयवत्वनिवेशनं जनकपदस्य फलोपधानपरत्वेऽप्यावश्यकमि-ति भावः ।

चतुर्थलक्षणे प्रसिद्धप्रतिज्ञानिगमनयोः साध्याविषयकत्वविशे-षणव्यावृत्तिर्न घटते पञ्चम्यन्तत्वाभावादिति पञ्चम्यन्तताद्विशेषे त-द्व्यावृत्तिमाह अयं न दण्डादिति । अयं दण्डादित्यादिप्रतिज्ञायाः संप्र-दायविरुद्धत्वं प्रागभिहितमित्यभावसाध्यकानुधावनम् । वह्निमान् वह्निसामग्रीमत्त्वादित्यादौ यथाश्रुताव्याप्तेराह व्याख्यातार्थकमिति । हेतुतावच्छेदकविशिष्टेत्यादिनेत्यादिः । उपनयविशेषेति । साध्या-विषयकबोधजनकाभावसाध्यकव्यतिरेक्युपनयेत्यर्थः । उदाहरणस्य पञ्चम्यन्तस्यापि सम्भवात्तद्वारणाय उदाहरणन्यत्वस्य निवेशनीय-तया तत एवोदाहरणसामान्यवारणसम्भवादुपनयपर्यन्तानुधावनम् । धूमादालोकाभावादिसाध्यके धूमादालोकव्यापकाभावप्रतियोगिमा-नयमित्याद्युपनयेऽतिव्याप्तिवारकतया तत्पदसार्थक्यं बोध्यम् ।

उपनयस्य कस्यचिदपि पंचम्यन्तत्वासम्भवाद्धेतुपदवैयर्थ्यमा-शङ्क्याह हेतुत्वबोधकार्थकमिति । तादृशार्थकहेतुपदस्य पञ्चमीपदस्य च वैकल्पिकमुपादानमित्यर्थः । तथाच हेतुत्वबोधकान्तत्वं पञ्चम्यन्त-त्वं पृथक् निवेश्य लक्षणद्वयं करणीयमित्यर्थः ।

नन्वेवं प्रथमलक्षणे हेतुत्वपक्षके तद्बोधकेदंपदान्तोपनयेतिव्या-प्तिरित्यत आह उपनयस्य चेति । श्रूयमाणविभक्त्यन्तत्वाभावादनुस-न्धीयमानेति । तथाच तस्या हेतुत्वबोधकत्वाभावादेव नातिव्या-प्तिरिति भावः ।

ननु द्वितीयलक्षणे इदं द्रव्यसमवेतं गुणत्वादित्यादौ यथा दण्डा-दित्यादिस्वपरपञ्चम्यन्तपदघटितदृष्टान्तशालिनि उदाहरणे द्वितीयरी-त्या साध्याविषयकत्वनिर्वचनपक्षे गुणत्वाभावसाध्यके तादृशव्यतिरे-कदृष्टान्तशालिन्युदाहरणेऽतिव्याप्तिरित्यत आह एवमिति । दृष्टान्तस्ये-त्यत्रानुसन्धीयमाना प्रथमैवान्त इत्यनुषज्यते । अन्वयायोगादिति । प्र-थमान्तत्वं विना समानविभक्तिकत्वाभावेन तादृशशाब्दे प्रथमान्तप-दोपस्थाप्यसाध्याभावसाधनाभाववद्भेदान्वयानुपपत्तेरित्यर्थः ।

नन्वेवमपि अयं घटो न दण्डाजन्यत्वात् यो घटः स दण्डादि-त्यादावुदाहरणे लक्षणद्वयातिव्याप्तिर्दुर्वारैव साध्याविषयकबोधजन-कत्वात्पञ्चम्यन्तत्वाच्चेत्यत आह कस्याचिदिति । पूर्ववदिति । अव-यवान्तरोपस्थापितार्थान्वितस्वार्थबोधकत्वोदाहरणान्यत्वयोरन्यतर-विशेषणेत्यर्थः । ननु पञ्चम्यास्तसिलित्यत्र पञ्चम्या इत्यस्य पञ्चम्य-न्ततापक्षे पर्वतो वह्निमान् वह्निप्रमात इत्यादिहेत्ववयवस्य तसिलन्तस्य हेतुपञ्चम्यन्तताविरहादव्याप्तिरित्यत आह अत्र चेति । हेतुपञ्च-म्यन्तत्वमिति हेतुत्वबोधकान्तत्वं पञ्चम्यन्तत्वं चेत्यर्थः ।अर्थवद्भाग-स्येति । स्वघटकार्थवद्भागपूर्वत्वाभाववद्धेतुत्वबोधकादिघटितत्वमेव तदन्तत्वमिह विवक्षितमिति भावः। अर्थवत्त्वं आकांक्षानिर्वाहकत्वम् । तसिलं विनापि तत्पूर्वपञ्चम्यैव प्रकृतान्वयबोधौपयिकाकांक्षानिर्वा-हाद्न तसिलादेराकांक्षानिर्वाहकत्वं, न तु किञ्चिदर्थवाचकत्वं तत् त-सिलादेरवाचकत्वेऽपि तद्घटकप्रत्येकवर्णानां वाचकत्वात् एकाक्ष-रकोशेन समस्तवर्णानां वाचकताबोधनात् । उक्तसूत्रे पञ्चमीपदस्य षष्ठ्यन्तत्वमपि सम्भवतीत्यभिप्रायेण यथाश्रुतस्यैव साधुतां समर्थ-यति पञ्चम्यादेरिति । नानुपपत्तीति । तथासति तसिल एव हेतुत्व-प्रतिपादकत्वात् पञ्चमीत्वाच्चेति भावः ।

तसिलादेः पञ्चम्यनादेशतापक्षे उक्तहेतावव्याप्तिवारणाय पञ्च-म्या अन्तत्वमविवक्षतां मतमाह केचित्त्विति । हेतुत्वप्रतिपादकपद-शालित्वमिति। तथाच पञ्चम्यन्तत्वानिवेशात्तसिलः पञ्चम्यनादेशता-पक्षेऽपि न तदन्तहेतावव्याप्तिरिति भावः । ननु हेतुत्वप्रतिपादकपद-स्यान्तत्वाविवक्षणे दर्शितव्यतिरेक्युपनयेऽतिव्याप्तितादवस्थ्यमि-त्यत आह पूर्ववदिति । प्रकृतसाध्यान्वितस्वार्थबोधकतादृशपदशा-लित्वरूपमित्यर्थः। एवञ्च प्रथमलक्षणे तादृशस्वार्थबोधकविभक्ति-शालित्वं साध्याविषयकधीजनकत्वं च निरुक्तविशिष्टविषयताबहि-र्भूतसाध्यविषयताशून्यधीजनकत्वरूपं निविष्टम् । अत्र च तादृशहेतु-त्वप्रतिपादकशालित्वं साध्याविषयकज्ञानजनकत्वं च निर्वक्ष्यमाण-मन्यविधं प्रविष्टमिति भेद इत्यवधेयम् पर्वतो वह्निमानित्यादिन्यायान्त-र्गतप्रतिज्ञादेः निर्वाच्यसाध्याविषयकज्ञानजनकताशालिनो वारणाय हेतुत्वप्रतिपादकपदोपादानम् वह्नेर्द्रव्यत्ववान् वह्निमान् हेतुत्वं प्रमेयमि-त्यादिप्रतिज्ञादावतिव्याप्तिवारणाय विशेषणतया साध्यान्वितत्व-

निवेशेनेऽपि सुन्दरवह्निमत्सधर्मा पर्वतो वह्निमानित्यादावतिव्याप्ति-वारणाय तदावश्यकत्वम्। न चैवमप्यालोकाद्वह्निमतः सधर्मा पर्वतो वह्निमान् धूमादित्यादावतिव्याप्तिर्दुर्वारैव तत्रापि विवक्षणीयप्रकृत-हेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविशिष्टसाध्यविषयकज्ञानज-नकत्वस्याक्षतत्वादिति वाच्यम्। हेतुत्वप्रतिपादकेत्यस्य प्रकृतहेतु-तावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वप्रतिपादकार्थकत्वात्।

यथाश्रुतं साध्याविषयकज्ञानजनकत्वम् अयं वह्निमान् वह्निसामग्री-मत्त्वादित्यादिन्यायस्थलेहेत्ववयवेऽव्यापकं पूर्वनिरुक्ततन्निवेशे च सा-ध्यान्वितस्वार्थबोधकहेतुत्वप्रतिपादकपदशालित्वे विशेषणे हेतुत्वप्रति-पादकेत्यस्य वैयर्थ्यम् प्रतिज्ञायां निरुक्तसाध्याविषयकज्ञानजनकत्वाभा-वादेव वारणादतः साध्याविषयकज्ञानजनकत्वमन्यथा निर्वक्ति सा-ध्येति। एवञ्च पर्वतो वह्निमानित्यादिप्रतिज्ञायाः साध्यविषयकधीजन-कत्वेऽपि इतरनैरपेक्ष्येण हेतुत्वविशिष्टसाध्यविषयकज्ञानाजनकतया सा-ध्याविषयकेत्यादिनाऽवारणात् हेतुत्वप्रतिपादकत्वं पदविशेषणमर्थ-वद्भवति हेत्ववयवस्यापि प्रतिज्ञासहकारेण हेतुत्वविशिष्टसाध्यवि-षयकज्ञानजनकतयाऽसम्भववारणाय इतरनैरपेक्ष्येणेति। स्वाघट-कपदासहकारेणेत्यर्थकम् अजनकेत्यस्य प्रतियोगिनि विशेषणम्। तथा-च स्वेतरावयवाजन्यहेतुत्वविशिष्टसाध्यविषयकज्ञानजनकं यत्तद्-न्यत्वमिति समुदितार्थः। अथ जनकपदस्य जनकतावच्छेदकधर्मप-र्याप्त्याश्रयपरत्वेनैव हेत्ववयवस्य प्रतिज्ञासहकारेण तादृश-बोधजनकत्वेऽपि तादृशधर्मपर्याप्त्याश्रयसमुदायभेदस्याक्षततया इतरनैरपेक्ष्याप्रवेशेऽपि लक्षणसमन्वय इति चेत्, तर्हि तादृशप-र्याप्तिनिवेशलाभायैव तदभिधानम्। अयं धूमाद्वह्निमान् धूमाद्वह्निम-तोऽन्यत्रावर्तमानधर्मादित्यादिहेतौ धूमनिष्ठहेतुविशिष्टसाध्यवि-षयकज्ञानजनकस्य सङ्ग्रहाय प्रकृतेति। प्रकृतहेतुतावच्छेदकावच्छिन्न-विशिष्टेत्यर्थकम्। प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वमित-राविशेषणतयाऽवगाहिन एव ज्ञानस्य इतरनिरपेक्षहेतुवाक्येन जन-नात्तादृशहेतुत्वप्रकारकज्ञानसामान्याजनकत्वस्यैव सकलहेत्ववयव-साधारण्यात् साध्यांशोपादानमनर्थकमिति तत्परित्यजति साध्यं चे-ति। अत्र च साध्यान्वितस्वार्थबोधकत्वनिवेशेऽपि हेतुत्वपक्षकव्यति-रेक्युपनये साध्यान्वितस्वार्थबोधे स्वजन्यत्वानिवेशेऽनुषङ्गपक्षे सा-

ध्यान्वितपक्षबोधस्योपनयाजन्यतया तद्वारणेऽप्यननुषङ्गपक्षे निगमनोपस्थापितसाध्यान्वितहेतुत्वबोधकेदंपदशालिन्यतिव्याप्तिः । न च हेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वप्रतिपादकपदशालित्वनिवेशान्न तत्रातिव्याप्तिरिति वाच्यम् । गोत्वाभावनिष्ठं हेतुत्वं सास्नाभाववत् गोत्वाभावादित्यादिन्यायान्तर्गतोपनये तथाप्यतिव्याप्तिवारणासम्भवादनुषङ्गपक्षेऽप्युक्तन्यायान्तर्गतप्रतिज्ञायामतिव्याप्तेश्च । विशेषणतया साध्यान्वितस्वार्थबोधकत्वं निवेश्य तद्वारणे साध्यान्वितेत्यत्र साध्यांशवैयर्थ्यम् । अनुषङ्गपक्षेऽप्युपनयस्थेदंपदार्थस्य कुत्रापि विशेषणताविरहात् (पदान्तरोपस्थापितेन प्रकृतहेतुना साक्षाद्विशेषितहेतुत्वप्रतिपादकपदशालित्वं निवेश्योक्तविशिष्टहेतुत्वपक्षप्रतिज्ञोपनययोर्वारणेऽपि) प्रकृतहेतुत्वविशिष्टसाध्याविषयकज्ञानजनकत्वनिवेशेनैवोपपत्तौ नञ्व्यत्यासस्य इतरनैरपेक्ष्येणेत्यभिधानस्य चाकिञ्चित्करत्वमित्यस्वरसः ॥

(चि०) पञ्चम्यन्तलाक्षणिकपदवदनुमितिपरवाक्यत्वं वा, हेतुपदेन ज्ञानलक्षणात् । अन्यथा लिङ्गस्याहेतुत्वेन हेतुविभक्त्यर्थानन्वयात् तथैवाकाङ्क्षानिवृत्तेः ।

अनुमितिहेतुज्ञानकारणधूमवत्त्वादितिशब्दजन्यज्ञानवृत्तिप्रतिज्ञादिजन्यज्ञानावृत्तिजातियोगिज्ञानजनकवाक्यत्वं हेतुत्वमित्यन्ये । जातिं विना केन रूपेण ज्ञानस्यानुमितिजनकत्वं वाक्यविशेषजन्यत्वस्यापि जन्यतावच्छेदकरूपापरिचये दुर्ग्रहादित्यपरे । अन्वयव्याप्त्यभिधायकावयवाभिधानप्रयोजकज्ञानजनकहेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वमन्वयिहेतुत्वम् । एतदेव व्यतिरेकव्याप्त्यभिधायकपदप्रक्षेपाद् व्यतिरेकिहेतुत्वम् । अन्वयव्यतिरेकोदाहरणाकाङ्क्षाप्रयोजकतथाभूतावयवत्वमन्वयव्यतिरेकिहेतुत्वम् ।

यद्वा पक्षसपक्षसतो विपक्षासतो हेतुवचनमन्व-

यव्यतिरेकि । अत्यन्ताभावाप्रतियोगिसाध्यसमानाधिकरणपक्षसद्धेतुवचनं केवलान्वयि ।

यद्वा अनुमितिकारणीभूतपरामर्शप्रयोजकशाब्दज्ञानकारणसाध्याविषयकशाब्दधीजनकप्रतीतान्वयसाध्यसाधनवाचकहेतुविभक्तिमच्छब्दत्वमन्वयिहेतुत्वम् । एतदेवाप्रतीतान्वयसाध्यसाधनेतिविशेषणाद्व्यतिरेकिहेतुलक्षणम् । कथायां धूमादित्येव प्रयोक्तव्यं न तु धूमवत्त्वादिति मतुपो व्यर्थत्वात् ।

(दी०) पञ्चम्यन्तेति । अनुमितिपरवाक्यत्वं—अवयवत्वम् । हेतुत्वादौ पञ्चमी लाक्षणिकी । वृक्षाद्विभजत इत्यादौ लाघवेनावधित्वे अवधिमत्त्वे वा शक्तत्वात् । द्रव्यनिष्ठमवधित्वमिव विभागनिष्ठमवधिमत्त्वमपि सम्बन्धविशेषः । स चातिरिक्तोऽनतिरिक्तो वेत्यन्यदेतत् । तत्सम्बन्धाग्रहे च व्यवहारः शक्तिभ्रमात् ।

वृक्षादपैति पतति इत्यादौ लाघवाद्विभागे शक्तिस्तज्जनकत्वश्च क्रियायाः सम्बन्धमर्यादया भासत इत्यपि वदन्ति । अतो निगमनेऽतिव्याप्तिरतः पञ्चम्यन्तेति । तस्मादित्यत्र च तत्पदे न लक्षणा शक्त्यैव तादृशज्ञानोपस्थितिसम्भवात् । पर्वतो वह्निमान् वह्निसामग्रीमान् वा तस्मादित्यादिकन्तु न न्यायप्रयोगः सम्प्रदायविरोधात् इति वदन्ति ।

(गा०) पञ्चम्या लाक्षणिकत्वं व्यवस्थाप्य तद्धत्वेन निगमनेऽतिव्याप्तिं प्रसञ्जयन् पञ्चम्यन्तपदं सार्थकयति हेतुत्वादाविति । हेतुत्वं-जनकत्वम्, आदिना ज्ञापकत्वपरिग्रहः । जनकत्वोपादानं दृष्टान्तविधया । गुरुशरीरं तत्क्रियानाश्रयत्वे सति तज्जन्यविभागाश्रयत्वरूपमपादानत्वं वा दृष्टान्तविधया आदिपदग्राह्यम् । हेतुत्वं ज्ञापकत्वमेव । तर्हि कुत्र तच्छक्तिरित्यपेक्षायामाह वृक्षादिति । इत्यादौ-इत्यादिवाक्यस्थपञ्चमीप्रतिपाद्ये । विनिगमनाविरहं निराकरोति

लाघवेनेति । वृक्षादिनिष्ठावधित्वस्य निरूपकतासम्बन्धेन विभागेऽन्वयसम्भवेऽपि न वृक्षादित्यादौ वृक्षादिनिष्ठाया अवधितायाः आश्रयतासम्बन्धावच्छिन्नाभावस्य वृक्षाद्यवधिकविभागेऽपि सत्त्वेनातिप्रसङ्गभिया बोधोपगमासम्भवात् वृत्त्यनियामकनिरूपकतासम्बन्धस्य वाऽभावप्रतियोगितानवच्छेदकत्वाद्विभागनिष्ठं वृक्षादिनिरूपितमवधिमत्त्वमेव पञ्चम्या प्रतिपाद्यत इति नव्यमतानुसारेणाह अवधिमत्त्वे वेति । नन्ववधिमत्त्वमवधितानिरूपकत्वमेव तत्र वृक्षादेरवधितायामेवान्वयस्योपगन्तव्यतया एकदेशान्वयः, निरूपकत्वं च तज्ज्ञानजनकज्ञानविषयत्वमिति ज्ञापकत्वापेक्षया गौरवं चेत्यत आह द्रव्यनिष्ठमिति । सम्बन्धविशेषः—अवधिमन्निष्ठो अवधिनिरूपितः सम्बन्धविशेषः । अवधिमत्त्वमेव स्वरूपसम्बन्धविशेषः तन्निरूपकत्वमेवावधित्वमिति वैपरीत्यस्यापि सम्भवेन विनिगमनाविरहादिति भावः । अन्यदेतदिति । अनतिरिक्तत्वेऽपि अवधितात्वादेरनुगमकधर्मस्यानुगतप्रतीत्यनुरोधेनावश्यकत्वात्तस्य प्रवृत्तिनिमित्तत्वे लाघवादिति भावः । नन्ववधित्वादावेव पञ्चम्याः शक्तौ ज्ञापकत्वादाववधित्वादिसम्बन्धरूपवृत्त्यग्रहे पञ्चम्या ज्ञापकत्वग्रहासम्भवात्तत्प्रत्यायनेच्छया पञ्चमीप्रयोगो न स्यादित्यत आह तदिति । ज्ञापकत्वादाववधित्वादिसम्बन्धाग्रहे चेत्यर्थः । व्यवहारः–ज्ञापकत्वादिपरपञ्चमीप्रयोगः । शक्तिभ्रमात्–ज्ञापकत्वादौ शक्तिभ्रमात् । अपादानताघटकविभागत्वजात्यवच्छिन्ने शक्तिवादिनां मतमुपन्यस्यति वृक्षादिति । अपैतीति । अपैत्यर्थोऽपगमः स्पन्दमात्रं न तु विभागावच्छिन्नस्पन्दः, तर्हि त्यजितुल्यतया धात्वर्थतावच्छेदकविभागाश्रयतया वृक्षाद्यपादानस्य कर्मताप्रसङ्गात् । नाप्युत्तरसंयोगावच्छिन्नस्पन्दः वृक्षाद्भूमिं प्रयातीतिवद्वृक्षाद्भूमिमपैतीति प्रयोगप्रसङ्गात् । पततीत्यत्राधःसंयोगावच्छिन्नस्पन्दः स्पन्दत्वावान्तरजात्यवच्छिन्नो वा पतत्यर्थः । उभयत्र वृक्षादिनिष्ठविभागजनकत्वं पञ्चमीलभ्यमेवेति प्रवृत्तिनिमित्तलाघवाद्विभागे एव तस्याः शक्तिरित्यर्थः । नन्वेवं जनकत्वं कुतो लब्धव्यम् ? तदन्तर्भावेण शक्तौ च न ज्ञापकत्वाद्यपेक्षया लाघवमित्यत आह जनकत्वं चेति ।

अथ यत्नादेः स्वनिष्ठविभागानुकूलक्रियाश्रयत्वाद्विभागमात्रस्य

पञ्चम्यर्थत्वे स्वं स्वस्मात्पततीत्यादिप्रयोगः स्यादिति भेदप्रतियोगितावच्छेदकत्वसहित एव विभागः पञ्चम्यर्थो वाच्यः स्वनिष्ठक्रियायाः स्वनिष्ठविभागजनकत्वेऽपि स्वनिष्ठभेदप्रतियोगितावच्छेदकत्वविरहान्नोक्तातिप्रसङ्ग इति क्व लाघवमिति चेन्न। भेदप्रतियोगितावच्छेदकत्वे लक्षणयैवोपपत्तौ तदन्तर्भावेण शक्तेरकल्पनात् तात्पर्यवशाच्छक्यलक्ष्ययोरपि युगपदन्वयोपगमात्। लक्ष्यार्थभेदप्रतियोगितावच्छेदकत्वविनिर्मोकेण पञ्चम्या विभागाबोधकत्वव्युत्पत्तेर्न विभागमात्रतात्पर्येण स्वं स्वस्मात्पततीति प्रयोगप्रसङ्गः। अथवा केवलविभागे पूर्वपूर्वप्रयोगाभावादेवाप्रयोगः।

वस्तुतो भेदप्रतियोगितावच्छेदकत्वस्य पञ्चम्यर्थत्वेऽपि वृक्षात्पत्रं पततीत्यत्र पत्रात्पत्रं पततीति प्रयोगो दुर्वारः पत्रान्तरनिष्ठभेदमादाय ततः प्रत्येतव्यस्य पत्रनिष्ठभेदप्रतियोगितावच्छेदकत्वे सति पत्रनिष्ठविभागजनकत्वस्य पत्रक्रियायामबाधात्। न च भेद एव पञ्चम्यर्थः तस्य स्वप्रतियोगितावच्छेदकत्वस्वाश्रयनिष्ठविभागजनकत्वोभयसम्बन्धेन क्रियान्वयो वाच्य इति नोक्तातिप्रसङ्गः, तत्पत्रनिष्ठक्रियावच्छिन्नप्रतियोगिताकभेदाश्रयपत्रान्तरनिष्ठविभागजनकतायाः तत्पत्रक्रियायामसत्त्वेन तस्या उभयसम्बन्धेन पत्रान्तरान्वितभेदान्वयायोग्यत्वादिति वाच्यम्। पत्रान्तरनिष्ठैतत्क्रियावच्छिन्नभेदस्य वृक्षेऽपि सत्त्वेन तद्भेदाश्रयवृक्षनिष्ठविभागजनकतायाः तत्क्रियायां सत्त्वेन पत्रान्तरनिष्ठभेदस्योक्तोभयसम्बन्धेन तत्क्रियान्वययोग्यताया अक्षतत्वात् अधिकरणभेदेनाभावभेदाभावात्।

अथ पत्रादित्यत्राधेयतासम्बन्धेन पत्रविशिष्टो भेद उपतिष्ठते विशिष्टस्यैव च स्वाश्रयानिष्ठविभागजनकत्वघटितोभयसम्बन्धेनान्वयः, विशिष्टस्याधिकरणमेव विशिष्टानिरूपितपरंपरासम्बन्धघटकं पत्राधेयत्वविशिष्टस्येव चाधेयतासम्बन्धेन पत्रविशिष्टस्याप्यधिकरणं विशेषणीभूतं पत्रमेव न तु वृक्षः, अतो नोक्तोभयसम्बन्धेन पत्रविशिष्टभेदस्य तत्क्रियान्वययोग्यता भेदप्रतियोगितावच्छेदत्वदलरक्षायै स्वपदेन पत्रान्तरविशिष्टभेदस्यैवोपादेयत्वात्, तदुपादाने तदाश्रयपत्रान्तरनिष्ठविभागजनकत्वस्य तत्क्रियायां घटयितुमशक्यत्वादिति चेत्। तर्हि विभाग एव शक्तिरस्तु, तस्यैवाधेयतासम्बन्धेन प्रकृत्यर्थविशिष्टस्य स्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकत्वसहितजनकतास-

म्बन्धेन क्रियायामन्वय उपेयतां तावताप्युक्तस्थले पत्रात्पत्रं पततीति प्रयोगप्रसङ्गस्य वारणसम्भवात्, आधेयतया यत्पत्रविशिष्टविभागजनकत्वं तत्क्रियायास्तादृशविशिष्टाश्रयतत्पत्रनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य तत्क्रियायामभावादित्यलमधिकेन ।

अत्र जनकतासम्बन्धस्य वृत्त्यनियामकतया पूर्ववदाकाशात्पतति न वृक्षादित्यत्रानुपपत्तिरिति विभागजनकत्वमेवार्थो वाच्य इति क्व लाघवमित्यस्वरसः ।

अत इति । निगमनस्थायंतस्मादितिपञ्चम्या लाक्षणिकत्वात् । निगमनवारणायेति शेषः । पञ्चम्यन्तेति । तथाच पञ्चमीपदस्य पञ्चम्यन्तत्वाभावान्नातिव्याप्तिरिति भावः । नन्वेवमपि पञ्चम्यन्ततत्पदस्य तादृशधूमादिपदवद्धूमादिज्ञाने लाक्षणिकत्वाद्दुर्वारैव निगमनातिव्याप्तिरत आह तस्मादित्यत्रेति । तत्पदे न लक्षणेति । न धूमादिज्ञाने शक्तिविरह इत्यर्थः । तेन तत्पदशक्यधूमादिना तज्ज्ञानस्य सम्बन्धसत्त्वाच्छक्तिज्ञानशून्यकाले शक्यसम्बन्धग्रहात् पदान्तरस्येव तत्पदस्यापि तादृशार्थबोधकतायाः अशक्यापलापत्वाच्च तत्पदे लक्षणायास्तथा बोधकत्वस्य च दुरपवादत्वेऽपि न क्षतिः । लक्षणे च लाक्षणिकत्वं वाच्यार्थतात्पर्यराहित्यमतो निगमने तत्पदस्य तात्पर्यविषयीभूतधूमज्ञानलाक्षणिकत्वेऽपि नातिव्याप्तिरित्यवधेयम् । शक्त्यैवेति । तत्पदस्य वक्तृबुद्धिस्थवाचकत्वात् धूमादिज्ञानतात्पर्येण च प्रकृते तत्पदप्रयोगेण ज्ञानस्य वक्तृबुद्धिस्थतायाः आवश्यकत्वात् विशिष्टहेतुज्ञानस्याप्रक्रान्तत्वेऽपि न क्षतिरिति भावः।

नन्वेवं तत्पदेन यत्र हेतुनिर्देशस्तत्र पञ्चम्यन्तलाक्षणिकपदाभावादव्याप्तिरित्यत आह पर्वत इति । वह्निमान् तस्मादित्यत्र हेतुभूतधूमादेरप्रक्रान्तत्वाद्धेतोः प्रक्रान्ततारक्षायै वह्निसामग्रीमानिति । अत्र वह्निरूपहेतोः प्रक्रान्तत्वेन तत्पदेन स्फुटतरतत्परामर्शादिति भावः । न च वह्निसामग्रीघटकतया हेतोर्वह्नेः प्रक्रान्तत्वेऽपि ज्ञानस्याप्रक्रान्तत्वात्तत्पदेन बोधनासम्भवः वह्नौ चायोग्यतया न हेत्वर्थान्वयसम्भव इति वाच्यम् । प्रमितवह्निसामग्रीमत्त्वादेः साध्यत्वेन वह्निज्ञानादेरपि प्रकान्तत्वेन पञ्चम्यर्थहेतुत्वान्वयोपपत्तेः । संप्रदायानुरोधिनां तथा प्रयोगो दुर्वार एवेत्यत्र लक्षणे वदन्तीत्यनेनास्वरसः सूचितः ।

(दी०)यत्तु हेत्वन्वयानुरोधात् वह्निमानित्यादावपि ज्ञानलक्षणेति । तन्न–पञ्चम्या ज्ञापकत्वे ज्ञाप्यत्वे वा लक्षणयैवोपपत्तौ तत्र च लक्षणायां मानाभावात्, अतएवोक्तम्–'आवृत्तौ सैव प्रतिज्ञेति' । अतएव व्याचक्षते–'यतो द्रव्यं गुणाः कर्मेत्यत्र हेतुत्वं यथासम्भवमुत्पादकत्वं ज्ञापकत्वञ्चे'ति । अतएव लोके किं वह्निमदिति प्रश्ने तद्गृहं वह्निमदित्युत्तरिते कुत इति जिज्ञासा धूमवत्त्वादित्युत्तरञ्च । नहि तत्र ज्ञाने प्रश्नः येन लक्षणया ज्ञानेनोत्तरयेत् । न वा परकीयभाविप्रश्नानुरोधात् अजिज्ञासिताभिधानम् । न वा कुत इति प्रश्ने ज्ञातमेतदित्यध्याहार्य्यं–मानाभावात् । दाहो दहनात् न जलात् जलं स्पर्शवत् रूपात् न गन्धान्नापि शब्दादित्यादौ नञ अन्वयानुरोधात् जन्यत्वरूपं हेतुमत्त्वं जन्यज्ञानाविषयत्वरूपञ्च ज्ञाप्यत्वमर्थः । एवञ्च हेतुमत्त्वे शक्तावपि ज्ञाप्यत्वे लक्षणैव । न च धूमादालोकवान् पर्वतो वह्निमान् धूमाद्वाह्निमतः सधर्म्मापर्वतो वह्निमानित्यादौ प्रतिज्ञायां पर्वतो धूमाद्वह्निमानित्यादौ च तत्रत्यनिगमने चातिव्याप्तिः, प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितप्रकृतसाध्यान्वितस्वार्थबोधकपञ्चम्यन्तलाक्षणिकपदवदन्यवत्त्वस्य विवक्षितत्वात् ।

(गा०)प्रतिज्ञास्थसाध्यवाचकपदस्य ज्ञानलाक्षणिकत्वात्प्रतिज्ञायामपि पञ्चम्यन्तपदव्यावृत्तिः सम्भवतीति मतमुपन्यस्य दूषयति यत्त्विति

अथ वा निगमनस्थवह्न्यादिपदस्य वह्न्यादिज्ञाने लाक्षणिकतया । तस्मादिति पञ्चम्या जनकत्वं जन्यत्वं वाऽर्थः, तथाच पञ्चमीमादाय न निगमने व्यावृत्तिसङ्गतिः-अवधित्वादेरिव जनकत्वादेरपि स्वरूपसम्बन्धरूपतया विनिगमकाभावेन जन्यत्वस्यापि वाच्यत्वेन पञ्चम्या अलाक्षणिकत्वादिति वादिनो मतं दूषयति यत्त्विति । एवञ्चाग्रे जन्यत्वे शक्तावपि ज्ञाप्यत्वे लक्षणैवेत्युपसंहारः सङ्गच्छते । हेत्वन्वयानुरोधादिति । हेत्वर्थानुशिष्टपञ्चम्या जन्यजनकभाव एवार्थः न तु ज्ञाप्यज्ञापकभावः 'हेतुर्ना करणं बीज'मिति कोशाद्धेतुकारणपदयोः प-

र्यायतास्थितौ ज्ञापकतार्थकतायाः हेतुपदस्य कोशादावदर्शनात्, त-
था प्रतिज्ञास्थवह्न्यादिपदस्य मुख्यार्थपरत्वे मुख्यार्थस्य वह्न्यादेः धूम-
जन्यत्वेन ज्ञाने लक्षणां विना पञ्चम्यन्तार्थान्वयानुपपत्तिः स्यादिति
भावः । ज्ञानलक्षणा—वह्न्यादिज्ञानलक्षणा । एतत्पक्षे तस्य विषयता-
सम्बन्ध एव मतुबर्थः । ज्ञानविषयतापर्यन्तमेव वा वह्न्यादिपदार्थ
इति भावः । ज्ञापकत्व इति प्रकृत्यर्थवृत्तिकर्मत्वादीनां सुबर्थतावा-
दिप्राचीनमतेन । ज्ञाप्यत्वे चेति नव्यमतेन । तत्र—वह्न्यादिपदे । ल-
क्षणायां—लक्षणानिर्वाहकतात्पर्ये । मानाभावादिति । जन्यजनकभा-
वस्य पञ्चम्यर्थत्वेऽपि तल्लाक्षणिकताया आवश्यकत्वात्तत्रैव ज्ञाना-
न्तर्भावेणोपपत्तौ उभयत्र लक्षणाया अयुक्तत्वादिति भावः । न च सु-
ब्विभक्तेरानुशासनिकातिरिक्ते न लक्षणानुशासनं विनापि तत्तल्ल-
क्ष्यार्थे विभक्तेः साधुत्वे कर्मत्वादिरूपलक्ष्यार्थे षष्ठ्याद्यनुशासन-
वैयर्थ्यादिति कथमेतदिति वाच्यम् । हेताविति तृतीयाबोधकसूत्र-
स्थहेतुपदस्य कारणज्ञापकोभयपरतया तदनुवृत्तिमता 'विभाषागुणे-
ऽस्त्रियाम्' इति सूत्रेण ज्ञापकत्वेऽपि पञ्चम्या अनुशिष्टत्वात् । यद्यपि
तत्र गुणपदं न वैशेषिकसिद्धगुणपरं पुण्याभावान्न सुखी इत्यादौ प-
ञ्चम्यनुपपत्तेरिति पराश्रितपरं तत्, पराश्रितत्वं च साध्यवदधिक-
रणाश्रितत्वं, तथासति उक्तस्थले पुण्याभावादेः स्वप्रयोज्यसुखाद्य-
भावाश्रयवृत्तितया तत्प्रयोजकत्वात् पञ्चम्युपपत्तेः, तथाच ज्ञान-
कारणतावादिमते धूमादिपदार्थज्ञानरूपहेतुः साध्यवति समवाया-
दिना वर्त्तते । तथापि विषयतयैव तत्र वृत्तिरिति नानुपपत्तिः । एवं-
सति धूमज्ञानाद्वह्निमानिति प्रयोगः स्यादिति तु न देश्यम्—ज्ञापकता-
बोधकपञ्चम्यन्ततत्तदर्थवाचकपदस्य तत्तदर्थज्ञान एवानादितात्पर्यात्
धूमज्ञानपदस्य धूमज्ञानज्ञान एव तथा तात्पर्यात् । ज्ञानज्ञाप्यत्वस्य प-
ञ्चम्यर्थतामते च ज्ञानविषयधूमादिरूपहेतोः संयोगादिनैव साध्यव-
दाश्रितत्वान्नानुपपत्तिगन्धोऽपि । प्रतिज्ञास्थवह्न्यादिपदस्य मुख्या-
र्थपरत्वे मणिकृतोऽपि स्वरसं दर्शयति अत एवोक्तमिति । आवृत्ता-
विति । तेन ग्रन्थेन पुनरनुसन्धीयमानस्य प्रतिवादिवाक्यसहकारेण
मध्यस्थसंशयजनकस्य पूर्वोक्तसाध्यवद्धर्मिकबोधजनकवादिवा-
क्यस्य प्रतिज्ञात्वमभ्युपगतम् । तत्र च वह्न्यादिपदं न तज्ज्ञानादिपरं
तथासति विषयसंशायकत्वासम्भवात् विप्रतिपत्तिवाक्याभ्यां कोटद्व-

पस्थितिद्वारा मानसः संशयो जन्यत इति सिद्धान्तिभिरपि वह्नि पर्वतो अभाव इत्यादिना आकांक्षारहिताच्छब्दात्संशयानुदयेन तद्धर्मिणि तत्तदभावकोट्योः प्रत्येकं शाब्दधीजनकसामग्रीभ्यामेव परस्परविरोधेन शाब्दबोधमनुत्पाद्य मानसः संशयो जन्यत इत्यभ्युपगमात्। प्रतिवादिनिवृत्तये पर्वते वह्निः साधनीय इत्यभिसन्धेः प्रथमतोऽनियमात् शब्दादेव पर्वते वह्निनिश्चयो भविष्यतीत्यभिप्रायेणापि प्रथमं पर्वतो वह्निमानित्यादिप्रयोगात् पूर्वप्रयुक्तवह्निपदस्य सर्वत्र ज्ञानपरत्वासंभवाच्चेति भावः।

वर्द्धमानोपाध्यायानामपि पञ्चम्या ज्ञापकत्वार्थकत्वे सम्वादमाह अत एवेति। यथासम्भवमिति। समभिव्याहृतद्रव्यादिपदार्थे जन्यनित्यरूपेऽन्वययोग्यतानुसारेणेत्यर्थः।

नन्वावृत्तौ सैव प्रतिज्ञेति मणिकृतोऽभ्युपगमवादः न तु तत्र निर्भरः मध्यस्थसंशयात् परतोऽपि हेतुवाक्यसमभिव्याहृतसाध्यनिर्देशस्य सांप्रदायिकत्वात्। हेतुत्वं यथासम्भवमित्युपाध्यायग्रन्थोऽपि पञ्चमीप्रतिपाद्यं हेतुत्वं क्वचित्समभिव्याहृतपदमुख्यार्थनिरूपितं क्वचिच्च लक्ष्यार्थतज्ज्ञाननिरूपितं कारणत्वमित्यर्थकतयोपपद्यते। यदप्युक्तम्–उभयपदे लक्षणानौचित्यमिति–तदपि शिथिलम्–ज्ञापकतायाः पञ्चम्यर्थत्वे सूत्रस्थहेतुपदस्य उभयपरतया वाक्यभेदापत्तेरनुशासनानुरोधेनोभयत्र लक्षणाया एव उचितत्वादित्यतो युक्त्यन्तरमाह अत एवेति। जिज्ञासा–प्रश्नः धूमवत्त्वादित्युत्तरं चेति। प्रयुज्यत इति शेषः। उपष्टम्भं विवृणोति नहीति। ज्ञाने प्रश्न इति। प्रश्नस्थवह्निपदं वह्निज्ञानपरमित्यर्थः। वह्नेरेव जिज्ञासितत्वादिति शेषः। लक्षणया ज्ञानेनोत्तरयेदिति लक्ष्यार्थज्ञानपरमुत्तरवाक्यमित्यर्थः। अपि तु प्रश्नसमानाविषयकत्वानुरोधेन मुख्यार्थवह्निपरमेव तादृशोत्तरं प्रयुक्तमिति शेषः। तथाच तत्र वह्नौ कुत इति धूमादिति च प्रश्नोत्तरवाक्ययोर्ये पञ्चम्यौ तदर्थान्वयानुरोधेन ज्ञापकत्वं ज्ञाप्यत्वं वा पञ्चम्यर्थो वाच्य इति भावः।

ननु प्रथमप्रश्नानुरोधाद्वह्निपदस्य वह्निपरत्ववत् कुत इति प्रश्नस्थपञ्चम्यर्थान्वयानुरोधात्तदुत्तरधूमादिति पञ्चम्यर्थान्वयानुरोधाच्च ज्ञानत्वपरत्वमप्यविरोधात् एकदा शक्यलक्ष्यार्थानन्वयेऽपि वह्निं बोधयित्वा ज्ञानं बोधयिष्यतीत्यभिप्रायेणैव एकपदप्रयोगे बाध-

कामावात् । अत एव तथाविधतात्पर्यानुरोधेन नानार्थस्थले व्यावृत्तिरित्यत आह न वेति । परकायभाविप्रश्नानुरोधादिति । तादृशप्रश्नस्थीयतदुत्तरवाक्यस्थपञ्चम्यर्थान्वयानुरोधादित्यर्थः । अजिज्ञासिताभिधानम् । प्रथमजिज्ञासाविषयज्ञानप्रत्यायनेच्छया वह्निपदप्रयोगः । परकीयत्वेन भावित्वेन च प्रथमं कुत इति प्रश्नस्याज्ञानात् परकीयवह्निज्ञानहेतुजिज्ञासायाः अज्ञानेन वह्निज्ञानप्रत्यायनेच्छयाः प्रथममसम्भवादिति हेतुसूचनाय·परकीयत्वभावित्वाभिधानम् ।

ननु तत्र ज्ञानमित्यध्याहारात्कुत इति पञ्चम्यर्थस्य ज्ञानेन्वऽयो न तु वह्नावित्यत आह नवेति । प्रश्नस्थपदस्योत्तरवाक्येऽनुषङ्गस्य व्युत्पत्तिसिद्धत्वात्कुत इत्यत्र ज्ञानमित्याध्याहारेणैव धूमादित्यत्रापि ज्ञानान्वयसम्भवात्तत्राध्याहारान्तरविरहेऽपि न क्षतिरित्यतः कुत इत्यत्रैवाध्याहारः शङ्कितः । मानाभादिति । पदार्थान्तरान्वयस्य वक्तुरनभिप्रेतत्वनिश्चयेऽपि बोधस्यानुभाविकत्वात् सर्वत्राश्रुतकल्पनासम्भवादित्यर्थः ।

इदं त्ववधेयम् । गृहं वह्निमादिति प्रयोक्तुः वह्निपदे ज्ञानतात्पर्यं कुत इति वाक्यजन्ये ज्ञानहेतुजिज्ञासाबोधेऽनुपयुक्तं स्वाभिप्रायस्य स्वबोधाहेतुत्वात् कुत इति पृच्छकपुरुषतात्पर्यस्यैव तत्रोपयोगात् । तथाच स्वजिज्ञासां बोधयितुकामस्य कुत इति प्रयोक्तुः परप्रयुक्तवह्निपदलक्षणया वह्निपदोपस्थापितं ज्ञानमादाय कुत इति पञ्चम्यर्थान्वयो भवत्वित्यभिप्रायं ज्ञात्वैव प्रतिवक्ता प्रष्टुर्वह्निज्ञानहेतुजिज्ञासां कुत इति शब्दादनुषज्यमानस्वोक्तवह्निपदसहितात् ज्ञास्यति। एवं गृहं वह्निमादिति प्रयोक्तुः प्रथमं वह्निपदे ज्ञानतात्पर्यविरहेऽपि कुत इति प्रश्नानन्तरं प्रष्टुर्वह्निज्ञानहेतुजिज्ञासाया ज्ञाने किमर्थमन्यत् वह्निपदं प्रयोक्तव्यं पूर्ववह्निपदाल्लक्षणयोपस्थितं ज्ञानमादायैव धूमादिति वाक्यं धूमज्ञाने वह्निज्ञापकतां बोधयत्वित्यभिप्रायसम्भवात् तज्ज्ञानेन धूमादिति पञ्चम्यर्थस्य ज्ञानान्वयो भविष्यतीति किमनुपपन्नम्, न हि प्रयोक्तुः पुरुषस्यैकार्थतात्पर्यं पुरुषान्तरीयान्यार्थतात्पर्यविरोधि अन्यैरन्यतात्पर्येण प्रयुक्तान्यपि पदान्यादायान्यार्थपरश्लोकस्य मौनिना निबन्धनात् । न वा स्वीयं प्राथमिकमन्यतात्पर्यमुदीच्यापरतात्पर्यं विरुणद्धि बीजाभावात् । युज्यते च वह्न्यादिपदस्य वह्न्यादिप्रकारकज्ञानविषयत्वे लक्षणा

साध्यान्वयिजन्यज्ञानविषयत्वस्य पञ्चम्यर्थत्वे गुणः सत्तावान् द्रव्यत्वादित्यादिप्रयोगस्य दुर्वारतापातात् द्रव्यत्वादिज्ञाप्यसत्त्वादेर्गुणादावपि सत्त्वात्, साध्यवाचकपदस्य लाक्षणिकत्वे पक्षान्वयिसाध्यतावच्छेदकविशिष्टसाध्यप्रकारकज्ञानविषयत्वरूपसाध्यवाचकपदार्थे पञ्चम्यन्तार्थलिङ्गज्ञानप्रयोज्यत्वान्वयात्, द्रव्यत्वादिप्रकारकज्ञानप्रयोज्यसत्त्वादिप्रकारकज्ञानविषयत्वस्य गुणादौ बाधेन कथितातिप्रसङ्गवारणसम्भवात्। न च जन्यज्ञानविषयत्वरूपपञ्चम्यर्थस्य साध्यविशिष्टपक्षेऽन्वयः स्वीक्रियते सत्तादिरूपसाध्यविशिष्टगुणादिरूपपक्षस्य च न द्रव्यत्वादिलिङ्गज्ञाप्यतेति नातिप्रसङ्गः, वह्न्यादिमतः पर्वतादेः द्रव्यत्वादिरूपसाध्यविशिष्टस्य पृथिवीत्वादिज्ञानज्ञाप्यत्वेऽपि वह्न्यादिविशिष्टस्य न तथात्वमिति विशेषणावच्छिन्न एव पञ्चम्याः ज्ञाप्यत्वबोधकत्वान्न पर्वतो वह्निमान्पृथिवीत्वादिप्रयोगः, विषयतायाः पर्याप्तिसम्बन्धेन विशिष्टेऽन्वयोपगमात् द्रव्यत्वादिरूपसाध्यवत्त्वेन वह्न्यादिरूपपक्षतावच्छेदकविशिष्टपर्वतादेः पृथिवीत्वादिज्ञाप्यत्वेऽपि न क्षतिरिति वाच्यम्। एवमपि द्रव्यत्ववान् पर्वतो वह्निमान् धूमान्न पृथिवीत्वादित्यादौ नञर्थान्वयानुपपत्तेर्दुर्वारत्वात् पृथिवीत्वज्ञाप्यतापर्याप्त्यधिकरणद्रव्यत्वविशिष्टपर्वतादौ वह्न्यादिरूपविशेषणान्तरावच्छिन्नेऽपि तज्ज्ञाप्यताविरहासम्भवात्, अस्मन्मते च तत्र पर्वताद्यन्वयिनि वह्न्यादिप्रकारकज्ञानविषयत्वे पृथिवीत्वादिरूपलिङ्गज्ञानप्रयोज्यत्वस्य पञ्चम्यर्थस्याभावान्वयात्तदभावस्य तत्राबाधेनानुपपत्तिविरहात्। एवं साध्ये ज्ञाप्यत्वान्वयपक्षेऽपि उक्तप्रयोगानुपपत्तिर्द्रष्टव्या—वह्न्यादेरपि प्रमेयत्वादिना पृथिवीत्वादिज्ञाप्यत्वात्। यदि च प्रयोज्यत्वं समभिव्याहृतपक्षविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नविधेयता च खण्डशो लक्षणया पञ्चम्यर्थः अन्वयबलात्साध्ये पक्षांशे तत्तद्रूपेण हेतुज्ञाप्यतालाभः, नञ्समभिव्याहारस्थले च लिङ्गज्ञानान्वितप्रयोज्यत्वरूपैकार्थस्य निरुक्तविधेयतारूपापरपञ्चम्यर्थेऽभावो नञा प्रत्याय्यते इत्युच्यते, तदा साध्यतावच्छेदकपक्षतावच्छेदकादेर्द्विधा भानाद्गौरवम्। साध्यान्वयिनि पक्षविशेष्यतानिरूपितविधेयता पक्षान्वयिनी साध्यविधेयतानिरूपितविशेष्यता वा पञ्चम्यर्थ इति विनिगमनाविरहः एकपदस्यार्थद्वये खण्डशो लक्षणा पदद्वयस्यैव वा प्रत्येकमर्थद्वये लक्षणेत्यत्र को विशेष इति। प्रसङ्गतः

पञ्चम्याः जनकत्वज्ञापकत्वार्थकत्वं नञर्थान्वयस्थलेऽनुपपत्तिप्रदर्शनेन
निराकुर्वन् जन्यत्वज्ञाप्यत्वार्थकतां व्यवस्थापयति दाहो दहनादि-
त्यादिना। गन्धस्याज्ञापकत्वं पक्षधर्मताविरहेण शब्दस्यातथात्वं
व्याप्तेरपि विरहेणेति प्रदर्शनार्थमुभयोपादानम्। नञर्थान्वयानुरोधा-
दिति। जनकत्वज्ञापकत्वयोः पञ्चम्यर्थत्वेऽपि निरूपकतासम्बन्धावच्छि-
न्नाभावाप्रसिद्ध्या आश्रयतासम्बन्धावच्छिन्नाभावप्रत्यय एव दाहस्पर्शा-
दौ स्वीकार्यः, तथाच तत्र जलगन्धादिनिष्ठजनकत्वज्ञापकत्वयोरिव
दहनरूपादिनिष्ठयोरपि तयोरभावसत्त्वेन दाहो न दहनात् जलं
स्पर्शवन्न रूपादित्यपि प्रयोगः स्यादिति भावः। न च दाहादिविशेषित-
जनकत्वादेरेवाभावस्तत्र जलगन्धादिरूपप्रकृत्यर्थे प्रतीयत इति वाच्यम्।
प्रथमान्तार्थस्य पञ्चम्यर्थविशेष्यतयैव शब्दात्प्रतीतेर्दाहादिविशेषितजन-
कत्वादिरूपप्रतियोगिनः शब्दादनुपस्थितस्य नञाऽभावबोधनासम्भ-
वात्। पञ्चम्यर्थस्य प्रकृत्यन्यपदार्थविशेषितस्यापि नञ्समभिव्या-
हारस्थले भानोपगमे व्युत्पत्तिभेदाद्गौरवम्। सर्वत्रैव प्रकृत्यर्थं विभ-
क्त्यर्थो विशेषणं तत्र च निरूपकतया समभिव्याहृतपदार्थान्तरमिति
चानुभवसिद्धप्रथमान्तपदार्थविशेष्यताभङ्गेनासम्भवदुक्तिकम्। इन्ध-
नस्य दाहो दहनादित्यादौ तु तुल्ययुक्त्या दहनादेर्दाहजनकत्वादिविशे-
ष्यत्ववदिन्धनादेरपि दाहसम्बन्धादिविशेष्यतया इन्धनं दाहसम्बन्धि
दहनो दाहजनक इत्यादिसमूहालम्बनबोधस्य स्वीकारेण वाक्यभे-
दप्रसङ्गात्। यत्रान्यस्य दाहो दहनान्नैतदिन्धनस्य तत्रैतदिन्धनस्य
दाहो न दहनादिति प्रयोगानुपपत्तिश्चेति।

अत्र वदन्ति। जन्यतायाः पञ्चम्यर्थत्वेऽपि दाहो दहनात् न पर-
माणुपरिमाणादित्यादिप्रयोगानुपपत्तिः पारिमाण्डल्यस्य कार्यसामान्ये-
ऽजनकतया परमाणुपरिमाणादिजन्यत्वाप्रसिद्धेर्नञर्थे प्रतियोगितया-
ऽन्वयासम्भवात्। दाहाद्यन्वयिनि जन्यत्वे प्रकृत्यर्थस्य निरूपितत्वसम्ब-
न्धेनाभावबोधोपगमे च वृत्त्यनियामकसम्बन्धावच्छिन्नाभावाभ्युपगमः,
लक्षणया प्रकृत्यर्थनिरूपितत्वस्याभावान्वयोपगमेऽपि गगनं न परमा-
णुपरिमाणादित्यादौ गगनादौ जन्यत्वान्वयायोग्यत्वादनुपपत्तिः, पा-
रिमाण्डल्यानिरूपितत्वाभाववज्जन्यत्वाभाववद्गगनमित्याकारिकायाः
द्विधा नञर्थावगाहिन्याः प्रतीतेरुपगमे च घटो न घटजनकादित्यस्या-
पि स्यात्—घटजनकाद्यनिरूपितजन्यत्वाभावस्य घटादावबाधात्,

दण्डाद्यनिरूपितजन्यत्वत्वावच्छिन्नाभावस्य पटांशे बाधने पटो न दण्डादित्यादेरप्यनुपपत्तेश्च । गगनादौ जन्यत्वभ्रमदशायां गगनं न पारिमाण्डल्यादित्यादिवाक्यस्याबोधकतापत्तेः । पञ्चम्यर्थे जन्यतासामान्ये लक्षणया प्रकृत्युपस्थाप्यस्य पारिमाण्डल्यनिरूपितत्वगगनवृत्तित्वोभयत्वावच्छिन्नस्याभावबोधोपगमे च जनकतायाः पञ्चम्यर्थत्वेऽपि तत्सामान्ये लक्षणया प्रकृत्युपस्थाप्यस्य पारिमाण्डल्यवृत्तित्वगगनिरूपितत्वोभयत्वावच्छिन्नस्याभावबोधोपगमेन सामञ्जस्यम् । न च तत्र लक्षणाया आवश्यकत्वेऽपि दाहो न जलादित्यादेर्लक्षणां विनैवोपपत्तये जन्यत्वस्य पञ्चम्यर्थत्वमुचितमिति वाच्यम् । जलादेरपि कार्याजनकत्वभ्रमदशायां दाहो न पारिमाण्डल्यादित्यादाविवान्वयबोधस्यानुभविकतया तदनुरोधेन तत्रापि जन्यतायां जलादिनिरूपितत्वाभावबोधस्यावश्योपेयत्वादिति ।

अत्रेदं तत्त्वम् । शशविषाणं नास्तीति वाक्यवद्दाहो न पारिमाण्डल्यादित्यादिवाक्यमप्रमाणमेव । तद्वाक्यस्य प्रामाण्यानुरोधेन लक्षणया पारिमाण्डल्यादिनिरूपितत्वाभावबोधस्य क्वचिदभ्युपगमेऽपि दाहो न जलादिवाक्यतो लक्षणाज्ञानशून्यकालेऽपि अन्वयबोधस्यानुभविकतया जन्यत्वाभावबोधकतापि तादृशवाक्यस्योपगन्तव्येति जन्यत्वं पञ्चम्यर्थ इति ।

जन्यज्ञानविषयत्वमिति । जन्यत्वान्वयि प्रकृत्यर्थज्ञानं भ्रमभिन्नं ग्राह्यम् अतो व्याप्तिपक्षधर्मतावगाहिभ्रमरूपह्रदत्वादिज्ञानस्य पर्वतादौ वह्न्याद्यनुमापकत्वेऽपि पर्वतो वह्निमान् ह्रदत्वादित्यादिप्रयोगस्य नापत्तिः, न वा पर्वतो वह्निमान् धूमात् न ह्रदत्वादित्यादिप्रयोगानुपपत्तिः । यद्यपि यत्किञ्चिद्विषयभ्रमान्यत्वं भ्रमसाधारणं भ्रमसामान्यान्यत्वं च, तदभाववति तत्प्रकारकत्वरूपभ्रमत्वस्य तत्तत्प्रकारविशेषघटितत्वेनाननुगततया जगतीगतयावद्वस्तुभ्रमाणां तत्तद्वस्तुभ्रमत्वावच्छिन्नभेदकूटरूपामतिदुर्ज्ञेयम्, तथापि प्रकृतसाध्यहेतुपक्षकपरामर्शे प्रकारीभूता ये ये तत्तत्प्रकारकभ्रमभिन्नत्वमेव विशेषणं ज्ञेयम् । यद्यपि धूमादिमत्यपि पर्वतादौ समवायादिसम्बन्धावच्छिन्नधूमाद्यभावसत्त्वात् पर्वतादौ धूमादिप्रमायाः सङ्ग्रहाय यत्सम्बन्धेन हेतुप्रकारकं ज्ञानं यत्र हेतुवाचकपदेन विवक्षितं तत्र तत्सम्बन्धावगाहितत्प्रकारकभ्रमान्यत्वं प्रतीयत इत्युपेयम्, तथाच स्वरूपादिसम्बन्धेन

प्रमेयत्वादेर्यत्र हेतुत्वं तत्र तत्सम्बन्धेन तद्भ्रमाप्रसिद्ध्या तदन्यत्वं दुर्ग्रहम्, तथापि तत्र तादृशभ्रमान्यत्वप्रतीतिरेव न स्वीक्रियते अतो न दोषः।

वस्तुतस्तु स्वानुयोगिनिष्ठविशेष्यतानिरूपितत्व-स्वप्रतियोगिनिष्ठत्व-स्वावच्छिन्नत्वेतत्त्रितयसम्बन्धेन सम्बन्धविशिष्टान्यप्रकारताशालित्वमेवानुगतं भ्रमत्वं सुवचम्, अतो भ्रमविषयतयैव प्रमेयत्वं वाच्यत्वादिज्ञापकमिति भ्रमदशायां वाच्यं प्रमेयत्वादित्यादिप्रयोगस्य तादृशप्रयोगाधीनबोधस्य च वारणाय प्रमेयत्वादिज्ञानस्यापि तद्भ्रमान्यत्वेनैव पञ्चमीप्रकृत्यर्थता वाच्या सा चाप्रसिद्ध्या न सम्भवतीति दूषणमनवकाशम्।

निगमनस्थपञ्चम्या लाक्षणिकत्वमुपसंहरति एवञ्चेति। एवञ्च-पञ्चम्या जन्यज्ञाप्यभावार्थकत्वस्थितौ च। हेतुमत्त्वे-जन्यत्वे। ज्ञाप्यत्वे लक्षणैवेति। जन्यत्वापेक्षया तस्य शरीरगौरवादिति भावः। न चेति। धूमादालोकवान् पर्वतो वह्निमानित्यादिप्रतिज्ञाघटितन्याये आलोकादेर्हेतुत्वे प्रकृतहेत्वन्वितार्थकपञ्चमीनिवेशनाप्यतिव्याप्तिवारणसम्भवात् धूमादिति हेत्वभिधानम्। अत्र पञ्चम्याः प्रकृतसाध्यान्वितस्वार्थबोधकत्वविशेषणमात्रेणातिव्याप्तिवारणसम्भवात्तादृशसाध्ये विवक्षणीयोपस्थापितान्तविशेषणव्यावृत्तये स्थलान्तरेऽतिव्याप्तिं दर्शयति धूमाद्वह्निमत इति। अत्र वह्निमत्त्वेन पक्षस्यापि भानाद्विवक्षणीयविशेषणे पक्षतावच्छेदकपर्यन्तनिवेशनस्याप्यात्रैव व्यावृत्तिः। साध्यतावच्छेदकावाच्छिन्नत्वांशनिवेशनाय स्थलान्तरेऽतिव्याप्तिं दर्शयति पर्वतो धूमाद्वमानिति। तत्रत्यनिगमने-तस्मात् धूमाद्वह्निमानित्याकारके। अत्र पञ्चम्यन्तार्थविशिष्टवह्नित्वमेव साध्यतावच्छेदकमिति तदवच्छिन्ने साध्ये पञ्चम्यर्थानन्वयात्साध्यतावच्छेदकाविशिष्टान्वितस्वार्थबोधकत्वनिवेशने नातिव्याप्तिः। धूमाद्वह्निमतः सधर्मेत्यादौ प्रकृतपक्षतावच्छेदकावच्छिन्ने यस्य साध्यस्य द्वितीयवह्निपदजन्योपस्थितिवशादन्वयः प्रथमवह्निपदोपस्थापिते तत्रैव प्रतिज्ञाघटकपञ्चम्यर्थस्यान्वयात्पक्षान्वितस्वार्थबोधकत्वविशेषणेन तद्वारणासम्भवात्साध्ये प्रकृतपक्षान्वितत्वं विहाय प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितत्वं निवेशितम्। यद्यप्युभयत्र वह्निपदेन एकमेव साध्यमुपस्थाप्यते अतो नैव तावताप्युक्तातिव्याप्तिवारणसम्भवः, तथापि प्र

कृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपिता या विशेषणता त-दवच्छिन्नसाध्यतावच्छेदकविशिष्टसाध्यीयविशेष्यतानिरूपितस्वार्थ-विषयताप्रयोजकबोधकान्तार्थः-पञ्चमीत्वमनिवेश्य प्रयोजनाभावात्। उपनयोपस्थापितपक्षविशेषणतापन्नसाध्यान्वितार्थबोधकपञ्चम्यन्तत-त्पदमादायाननुषङ्गपक्षेऽपि निगमनेऽव्यातिव्याप्तेर्वारणं लाक्षणिकपद-प्रयोजनम्।

(दी०) यत्तु अयमात्मा ज्ञानादित्यादावव्याप्तिः शक्त्यैव ज्ञानोपस्थितिसम्भवेन लक्षणाविरहादिति।

तन्न। यद्विषयकज्ञानस्य हेतुत्वादिकमवगतं तस्य व्या-प्त्यादिजिज्ञासायामुदाहरणादिप्रयोगः, न चेह ज्ञानविषयत्वेनोप-स्थितिर्विना लक्षणाम्, अन्यथा सुखादेरपि व्याप्त्याद्युपदर्शन-प्रसङ्गात्।

केचित्तु पञ्चम्यन्तलाक्षणिकपदवत्त्वनियतावच्छेदकरूपवत्त्वं तादृशपदवत्त्वव्यभिचार्यवयवतावच्छेदकशून्यावयवत्वं वा विव-क्षितमित्याहुः।

नव्यास्तु पञ्चम्या ज्ञानज्ञाप्यत्वलक्षणयैवोपपत्तौ न प्रातिप-दिकेऽपि लक्षणा। आकाङ्क्षावैचित्र्याच्च पदार्थैकदेशेऽपि ज्ञाने प्रातिपदिकार्थो विषयत्वेनान्वेति कर्तृकृतीव कृतौ धात्वर्थः। यद्धर्मविशिष्टश्च हेतुः प्रयुज्यते आकाङ्क्षावलात् तद्धर्मविशिष्ट-स्यैव व्याप्यत्वमुपदर्श्यते, अन्यथा यथार्थधूमज्ञानादित्यादिप्र-योगेऽपि धूमादेर्व्याप्यत्वोपदर्शनप्रसङ्ग इति प्राहुः।

अयमात्मा ज्ञानादित्यादौ ज्ञानपदं मुख्यार्थपरमेव पञ्चम्यर्थान्वय-स्य तत्रैव सम्भवेन लक्षणाबीजभूतान्वयानुपपत्तिविरहादित्यभिमा-निनामुक्तलक्षणाव्याप्तिशङ्कामुद्धर्तुमुपन्यस्यति यत्त्विति। शुद्धज्ञा-नत्वावच्छिन्नेन समं पञ्चम्यर्थान्वयसम्भवेऽपि अनुमितिजनकज्ञान-विषयतया ज्ञानोपस्थितावेव ज्ञानरूपहेतौ तद्विषयतानिर्वाहकव्याप्त्या-द्याकांक्षया यो ज्ञानवान् स आत्मा इत्युदाहरणादिप्रयोगसम्भव इति

ज्ञानविषयकज्ञानत्वावच्छिन्ने तात्पर्यानुपपत्त्या लक्षणाया आवश्यकत्वमिति समाधत्ते तन्नेत्यादिना । यद्विषयकज्ञानस्य यद्विषयकज्ञानत्वावच्छिन्नस्य । हेतुत्वमनुमितिजनकत्वम् । तस्य व्याप्त्यादिजिज्ञासायां तुल्यवित्तिवेद्यतयाऽर्थतो वा तत्र प्रतीतानुमापकज्ञानविषयताया निर्वाहकाकांक्षायामित्यर्थः । उदाहरणादिप्रयोगः–उदाहरणोपनयाभ्यां तन्निष्ठव्याप्तिपक्षधर्मताप्रदर्शनम् । यद्यपि ज्ञानविषयकज्ञानत्वावच्छिन्ने ज्ञानपदस्य तात्पर्येऽपि मुख्यार्थज्ञानत्वावच्छिन्नपरत्वमक्षतमेवेति पूर्वोपदर्शितमुख्यार्थतात्पर्यराहित्यरूपं लाक्षणित्वं नोपपद्यते, तथापि शक्यतावच्छेदकविलक्षणरूपावच्छिन्नतात्पर्यकत्वमेव लाक्षणिकत्वमतो न दोषः । ननु शुद्धज्ञानत्वावच्छिन्नेऽनुमापकताबोधेऽपि तत्र तन्निर्वाहकव्याप्त्यादिमद्विषयकत्वलाभाय वस्तुगत्या तादृशज्ञानविषयीभूते ज्ञाने व्याप्त्यादिप्रदर्शनसङ्गतिरित्यत आह अन्यथेति । जनकज्ञानविषयतयाऽप्रतीते ज्ञाने वास्तवतादृशविषयतां पुरस्कृत्य व्याप्त्युपदर्शने सुखादेरपि आत्मत्वानुमापकज्ञानविषयतया अयमात्मा ज्ञानादित्यत्र यः सुखी स आत्मेत्युदाहरणादिप्रयोगप्रसङ्गादित्यर्थः । तथाच सुखादौ व्याप्त्यादिप्रदर्शनेऽपि ज्ञानेऽनुमापकत्वनिर्वाहकव्याप्त्यादिमद्विषयकत्वपर्यन्तालाभादाकाङ्क्षाया अपूरणात् यथा सुखादौ न तत्प्रदर्शनं तथा एतन्मते ज्ञानेऽपि तत्प्रदर्शनं नोपपद्यत इति भावः ।

उक्तप्रतिज्ञादावतिव्याप्तिवारणाय प्रकारान्तरेण लक्षणं परिष्कुर्वतां मतमाह केचित्त्विति । पञ्चम्यन्तेति । कस्याश्चित् प्रतिज्ञायाः पञ्चम्यन्तलाक्षणिकपदत्वेऽपि धूमज्ञानज्ञाप्यालोकवान् पर्वतो वह्निमानित्यादिप्रातिज्ञायां व्यभिचारेणावयवतावच्छेदकं प्रतिज्ञात्वं पक्षादिभेदेन भिन्नमपि न तादृशावयवतापदवत्त्वनियतमिति नातिप्रसङ्ग इति भावः । तादृशावच्छेदकं हेतुत्वं दुर्वचं सुवचत्वे तदेव लक्षणमित्यतोऽन्यथा परिष्कुरुते तादृशेति । तादृशपदं-पञ्चम्यन्तलाक्षणिकपदम् । प्रतिज्ञात्वादिकं च तादृशपदाघटितस्यापि प्रतिज्ञादेः सत्त्वेन तादृशपदवत्त्वव्यभिचारीति तच्छून्यत्वाभावाच्च प्रतिज्ञादावतिव्याप्तिः । तादृशपदवत्त्वव्यभिचारिमेयत्वादिशून्यत्वाप्रसिद्ध्याऽवयवतावच्छेदकेति । अत्र प्रतिज्ञात्वहेतुत्वादिसाधारणस्यावयवतावच्छेदकत्वस्यैकस्याभावात्प्रतिज्ञात्वादिकं विशिष्योपादाय तच्छून्यत्वं निवेश्यम् तथाच हेतु-

त्वव्यावर्त्तनायोपात्तं तादृशपदवत्त्वव्यभिचारित्वविशेषणमनर्थकम्। यदि च प्रतिज्ञात्वहेतुत्वादिसाधारणं प्रतिज्ञात्वादिपञ्चान्यतमत्वमवयवतावच्छेदकत्वम्, तदा तत्र हेतुत्वप्रवेशो तस्यान्यादृशस्य दुर्वचत्वात्। सुवचत्वे तदेवास्तु लक्षणमन्यतममध्ये हेतुत्वमन्तर्भाव्य तद्व्यावर्त्तये विशेषणान्तरदानं प्रक्षालनाद्धीति न्यायेनायुक्तमित्यस्वरसः।

पञ्चम्यन्तेत्यादिलक्षणकर्त्तुरनुमतां धूमादित्यादिवाक्यस्थधूमादिपदस्य ज्ञानलक्षणां स्वातन्त्र्येण दूषयति नव्यास्त्विति। ज्ञानज्ञाप्यत्वलक्षणयेति। ज्ञाप्यत्वलक्षणाया आवश्यकत्वात्। तत्र च ज्ञानांशस्यापि अधिकस्य प्रवेशेनैव धूमादिपदस्य मुख्यार्थपरत्वेपि धूमादिज्ञानज्ञाप्यत्वलाभसम्भव इत्यर्थः। न प्रातिपदिकेति। न पञ्चमीप्रकृतिधूमादिपदे।

नन्वेवं ज्ञानस्य पञ्चम्यर्थैकदेशतया तत्र धूमादिपदार्थस्यान्वयायोगात् धूमादिज्ञानालाभः। न च ज्ञाप्यत्वस्य पञ्चम्यर्थत्वेऽपि जन्यत्वरूपतदेकदेशे कथं धूमादिपदार्थतज्ज्ञानान्वय इति वाच्यम्। चैत्रस्य पुत्रः घटादन्य इत्यादौ ससम्बन्धिकपदार्थैकदेशे जन्यत्वादौ पदार्थान्तरस्यान्वयदर्शनात् निष्प्रतियोगिक एव पदार्थैकदेशे इतरान्वयस्याव्युत्पन्नत्वात्। न च स्वतन्त्रोपस्थित एव पदार्थ इतरान्वयजिज्ञासा जायते न तु इतरविशेषणतयोपस्थिते अत एव गौर्नित्येत्यादौ स्वतन्त्रगोत्वाद्युपस्थितये लक्षणा इत्यत आकांक्षाविरह एव पदार्थान्तरस्य पदार्थैकदेशेनान्वये वीजं स च सप्रतियोगिकनिष्प्रतियोगिकैकदेशसाधारण इति वाच्यम्। फलानुरोधेन सप्रतियोगिकपदार्थे विशेषणतयोपस्थितेऽपि प्रतियोगिजिज्ञासा जायते इति कल्पनात्। न च ज्ञानादिसविषयकपदार्थेऽपि तथोपस्थिते विषयजिज्ञासा जायत इति युज्यते कल्पकाभावादित्याशङ्क्य सविषयककृतिदृष्टान्तेन पदार्थैकदेशे ज्ञानेऽपि विषयाकांक्षां व्यवस्थापयति आकांक्षावैचित्र्याच्चेति। कुत्रचित्स्वतन्त्रोपस्थिते एव इतराकांक्षा कुत्रचिद्विशेषणतयाप्युपस्थिते कस्यचिदाकांक्षेति विषयस्वभावाधीनतया आकांक्षावैचित्र्यादित्यर्थः। कर्तृकृती चेति। पक्तेत्यादौ तृजाद्यर्थैकदेशे कृतो यथा विषयत्वेन पाकादिक्रियान्वेतीत्यर्थः।

इदं तु वोध्यम्। जिज्ञासारूपाकांक्षायाः शाब्दधीहेतुत्वमाजिज्ञासोऽपि शाब्दबोधोदयात्, मणिकृता निराकृतम् तथाचाकांक्षाविरहेण

पदार्थैकदेशे पदार्थान्तराणन्वये बीजम्, गौर्नित्येत्यादौ गवादिपदार्थैकदेशे गोत्वे नित्यादिपदार्थाभेदान्वयबोधप्रयोजिकायाः समानविभक्तिकतत्तत्पदसमभिव्याहाररूपाया आकांक्षाया अक्षतत्वात्, अतः पदाधीनायाः स्वतन्त्रतदुपस्थितेः पदार्थान्तरस्य तत्रान्वयबोधे हेतुता वाच्या । एवञ्च ज्ञानविशिष्टार्थकात्मादिपदघटितात्मा न द्रव्यमित्यादि वाक्यात्पदार्थैकदेशे ज्ञाने इतरान्वयवारणाय दण्डजन्यो न दण्डजन्य इत्यादिवाक्यात् पदार्थैकदेशे दण्डजन्यत्वादौ दण्डजन्यभेदान्वयबोधवारणाय कल्पनीये ज्ञानाद्यंशे इतरान्वयबोधे स्वतन्त्रज्ञानाद्युपस्थितेर्हेतुत्वे कार्यतावच्छेदककोटिप्रविष्टतराविषयतायां विषयित्वादिसम्बन्धावच्छिन्नप्रकारतान्यत्वं विशेषणं देयम् ।

वस्तुतो ज्ञानादिविषयकशाब्दबोधे स्वतन्त्रज्ञानाद्युपस्थितेर्हेतुत्वेऽपि पञ्चम्यादिजन्यज्ञानज्ञाप्यत्वोपस्थितिप्रकृतिजन्यधूमाद्युपस्थितियोग्यताज्ञानघटितशाब्दसामग्र्याः पदार्थैकदेशे ज्ञानादौ विषयितादिसम्बन्धेन धूमादिप्रकारकशाब्दबोधजनने बाधकाभावः—तादृशसामग्र्यां स्वतन्त्रज्ञानाद्युपस्थितेरनन्तर्भावात् तादृशोपस्थितेर्ज्ञानादौ द्रव्यभेदाद्यन्वयबोधप्रयोजकसामग्र्यन्तरेष्वेव निवेशात् । न चैवं स्वतन्त्रज्ञानाद्युपस्थितेर्व्यभिचारेण हेतुत्वमेव न सम्भवतीति वाच्यम् । यतो यत्रैकरूपावच्छिन्ने पदे पदान्तराकांक्षा गृहीता अन्यरूपेण च वृत्तिर्गृहीता तत्रातिप्रसङ्गवारणाय तत्तदानुपूर्वीविशेषरूपपदविशेषत्वप्रकारेण गृहीतवृत्तिकपदजन्यतत्तदर्थोपस्थितित्वेनैव पदार्थोपस्थितेर्हेतुता वाच्या, तथासति तत्तद्धर्मप्रकारेणाकांक्षादिग्रहस्य तत्तद्धर्मप्रकारेण गृहीतवृत्तिकपदाधीनोपस्थितेः परस्परसहकारेणैव फलजनकत्वोपगमेनोक्तातिप्रसङ्गवारणसम्भवात् । तथाच नानानुपूर्वीप्रकारकपदज्ञानजन्योपस्थितीनामेकविधशाब्दबोधे विभिन्नरूपेण हेतुतया व्यभिचार आवश्यक इति तद्वारणवर्त्मनैव दर्शितव्यभिचारस्यापि वारणमिति ।

एतेन जन्यत्वांशे इतरान्वयबोधे स्वतन्त्रजन्यत्वोपस्थितेः कार्यकारणभावे कार्यतावच्छेदककोटिप्रविष्टतराविषयतायां निरूपितत्वसम्बन्धावच्छिन्नप्रकारताभेदनिवेशनमुभयसिद्धम्, अन्यथा औपगव इत्यादौ तद्धितार्थापत्यैकदेशे जन्यत्वे निरूपकत्वेन प्रकृत्य-

र्थान्वयानुपपत्तेः, ज्ञानज्ञाप्यत्वस्य पञ्चम्यर्थत्वमते च स्वतन्त्रज्ञानोपस्थितिजन्यतावच्छेदकज्ञानविषयतानिरूपितेतरविषयतायां विषयितासम्बन्धावच्छिन्नप्रकारताभेदनिवेशनमाधिकमिति प्रत्युक्तम्। तदनिवेशेऽपि दर्शितरीत्या सामंजस्यात्। वैयाकरण इत्यादौ 'तदधीते तद्वेद'त्यनेन विहिततद्धितार्थस्य वक्तुरेकदेशे ज्ञाने विषयतया प्रकृत्यर्थस्यान्वयोपपत्तये उक्तस्थले विषयितासम्बन्धावच्छिन्नप्रकारताभेदनिवेशस्य सर्वमत एवावश्यकत्वाच्चेति।

प्रकृतेर्मुख्यार्थपरत्वे युक्त्यन्तरमाह यद्धर्मविशिष्टश्चेति। यद्धर्मविशिष्टः पञ्चमीप्रकृत्यर्थ इत्यर्थः। तद्धर्मविशिष्टस्यैव व्याप्यत्वमुपदर्श्यत इति ज्ञानज्ञाप्यत्वस्य पञ्चम्यर्थतामते तद्धर्मविशिष्टस्यैव पञ्चम्या जनकज्ञानविषयत्वबोधनादिति भावः। अन्यथा–पञ्चम्या ज्ञानजनकत्वेन बोधितप्रकृत्यर्थे ज्ञाने विषयत्वेन विशेषणतामवलम्ब्य विषये व्याप्त्युपदर्शनसंगमने। यथार्थधूमज्ञानादित्यादिप्रयोगेपीति। तत्रापि शक्त्युपस्थितज्ञाने पञ्चम्यर्थज्ञापकतान्वयेन धूमादेर्ज्ञापकज्ञानविषयत्वलाभेन धूमादेर्व्याप्यत्वप्रदर्शनं स्यात्। अस्मन्मते तु ज्ञानज्ञाप्यत्वस्यैव पञ्चम्यर्थतया धूमज्ञानज्ञानस्यैव तत्र ज्ञापकत्वं प्रतीयते न धूमज्ञानस्येति नातिप्रसङ्ग इति। न च पञ्चम्याः केवलज्ञाप्यत्वार्थकत्वमतेऽपि उक्तस्थले ज्ञानपदस्य लक्ष्यार्थे ज्ञानविषयकज्ञाने एव तात्पर्यान्न धूमादिज्ञाने मुख्येऽप्यर्थे ज्ञापकतालाभ इति न धूमादौ व्याप्यत्वोपदर्शनप्रसङ्ग इति वाच्यम्। मुख्यार्थपरत्वे बाधकविरहे तत्तात्पर्येणापि प्रयोगसम्भवात्। न हि यत्र पदे अर्थान्तरे निरूढलक्षणा शक्त्युपस्थापितोऽर्थस्तेन न बोध्यते तद्बोधौपयिकाकांक्षादिसत्त्वे सामग्रीबलेन तद्बोधस्य दुर्वारत्वात्।

अथ तत्र शक्यार्थबोधस्यापि सम्भवेन तत्रापि कस्यचित्कदाचित्तात्पर्यसम्भवेपि तत्रानादितात्पर्यविरहान्न तत्तात्पर्येण न्यायान्तर्गतपदप्रयोगसम्भव इति चेत्। माभून्मुख्यार्थतात्पर्यकज्ञानपदघटितयथार्थधूमज्ञानादित्यादिवाक्यसमुदायस्य न्यायत्वम्, तथापि ज्ञाप्यत्वमात्रस्य पञ्चम्यर्थत्वे न्यायानन्तर्गतमुख्यार्थपरज्ञानपदघटितयथार्थधूमज्ञानादिति वाक्यस्य धूमादौ व्याप्त्याकांक्षाप्रयोजकधीजनकत्वं दुर्वारमेव तच्चानुभवविरुद्धम्। न च ज्ञानज्ञाप्यत्वे पञ्चम्या लक्षणापक्षेऽपि केवलज्ञाप्यत्वे स्वारसिकलक्षणयोपस्थिते

धूमज्ञाने ज्ञानजनकताबाधसम्भवात् उक्तातिप्रसङ्गो दुर्वारः, तत्रे-ष्टापत्तौ च प्रकृतेपीष्टापत्तिसम्भव इति वाच्यम् । स्वारसिकल-क्षणया पञ्चम्युपस्थापितविषयत्वादिरूपार्थान्तर इव तादृशज्ञाप्य-त्वेऽपि प्रकृत्यर्थान्वये आकांक्षाया मयाप्यनभ्युपगमात् धूमज्ञाना-दित्यतो धूमज्ञानस्य ज्ञापकत्वाबोधनादिति भावः ।

यत्तु धूमज्ञानादित्यतो लक्षणयोपस्थितधूमरूपविषयविशिष्ट-ज्ञानज्ञाने ज्ञापकताभाने ज्ञापकज्ञानविषयत्वं धूमज्ञान इव तद्विषये धूमेऽपि भासते इति प्रकृतेर्लाक्षणिकतामते तत्र धूमे व्याप्त्याकां-क्षया तदुपदर्शनप्रसङ्गो दुर्वार इति आशयवर्णनम् ।

तदसत् । तथापि स्वमतेऽपि तद्दोषस्य दुर्वारत्वात्—पञ्चम्यर्थै-कदेशे ज्ञाने मुख्यार्थधूमरूपविषयविशिष्टज्ञानान्वयेऽपि धूमे ज्ञापक-ज्ञानविषयताबाधस्य दुर्वारत्वात् । न च तथापि पञ्चमीप्रकृत्यर्थी-नोपस्थितिविशेष्यत्वं यस्य तस्यैव व्याप्त्यादिकं प्रदर्श्यत इति नि-यमस्य स्वयमुपगमान्न स्वमते दर्शितातिप्रसङ्ग इति वाच्यम् । तत्र धूमादौ ज्ञापकज्ञानविषयताबाधादाकांक्षासम्भवे तादृशनियम-मननुरुध्य व्याप्त्याद्युपदर्शनस्यानपवादात् ।

वस्तुतो लिङ्गज्ञानं प्रकृत्यर्थे पञ्चम्यर्थेऽवाऽन्तर्भवतु, उभयथापि धूमज्ञानादित्यत्र धूमज्ञान एव साध्यज्ञापकतावच्छेदकपक्षतावच्छेद-कावच्छिन्नविषयतानिरूपितप्रकारता लभ्यते सैव तस्य व्याप्तिप-क्षधर्मतानिर्वाह्येति तदाकांक्षया तत्रैव व्याप्त्याद्युपदर्शनम् । ज्ञान-विशेषणधूमे च तादृशविषयतावच्छेदकत्वरूपविषयतैव सा च न तद्गतव्याप्त्यादिनिर्वाह्येत्यतो न तत्र तदाकांक्षेति धूमादित्यादि-प्रयोगे धूमत्वादाविव धूमज्ञानादित्यत्र धूमादौ, व्याप्त्यादेर्नोप-दर्शनमिति ॥

(दी०) इतरान्वितस्वार्थबोधकत्वे सति स्वीयं यदन्त्य-भिन्नं पदं तदर्थविशेष्यकान्वयबोधजनकत्वे सति अन्त्य-पदवत्त्वे सति स्वीयानन्त्यपदार्थविशेष्यकान्वयबोधाजनकान्य-त्वे च सति वा न्यायावयवत्वं प्रतिज्ञात्वम् । प्रतिज्ञाहेत्वोरुपनय-निगमनयोश्चार्थौ परस्परमन्वितौ न तूदाहरणस्य केनापि वि-

भक्त्यन्तं पदम् तेन निगमने नातिव्याप्तिः ।

प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितार्थान्वितस्वार्थबोधकन्याया-वयवत्वं हेतुत्वम् । निगमनवारणाय उपस्थापितान्तम् । प्रमेयत्वमभिधेयं प्रमेयत्वात् इत्यादौ प्रकृत्यर्थपक्षान्वितस्वार्थबोधकपञ्चम्यर्थान्वितो न प्रतिज्ञार्थः अपि तु तदेकदेशार्थ इति । स्वार्थविशिष्टवैशिष्ट्यबोधजनकन्यायावयवत्वं विशिष्टवैशिष्ट्यबोधजनकस्वार्थोपस्थितिजनकन्यायावयत्वं विशिष्टबोधजनकस्वार्थविशिष्टबोधजनकन्यायावयवत्वं वा तत्त्वम् । एकवाक्यतया हेत्वर्थविशिष्टसाध्यस्य वैशिष्ट्यं भासते न पुनरवयवान्तरार्थविशिष्टस्य कस्यचिदिति ॥

(गा०) मूलोक्तलक्षणापेक्षया लघूनि प्रतिज्ञाद्यवयवलक्षणानि स्वयमाह इतरान्वितेति । प्रथमसत्यन्तस्य हेतूपनयनिगमनसाधारणस्य उदाहरणव्यावर्त्तनं स्वयमेव दर्शयिष्यते प्रतिज्ञाहेत्वोरित्यादिना । इतरान्वितत्वं स्वभिन्नावयवार्थान्वितत्वं स्वाघटकपदोपस्थापितार्थान्वितत्वं वा । एवञ्च स्वेतरावयवसहकारेण स्वाघटकपदसहकारेण वा बोधकत्वं समुदायार्थः । तेनोदाहरणबोध्यार्थप्रविष्टसाध्यादेः प्रतिज्ञाजन्यबोधे इतरान्वितत्वेऽपि न क्षतिः । द्वितीयसत्यन्तानन्तरमग्रिमं न्यायावयवत्वमिति सम्बध्यते । द्वितीयसत्यन्तं च हेतूपनयनिगमनवारकम्, हेतुजन्येतरस्मादितरेभ्यो भिद्यत इत्यादिनिगमनजन्ये च बोधे विभक्त्यर्थस्य विशेष्यतया विवक्षणीयविभक्त्यन्तपदार्थाविशेष्यकत्वाविरहात् । वह्निव्याप्यधूमवांश्चायं तस्माद्वह्निमानित्याद्युपनयनिगमनजन्यबोधे च विभक्त्यन्तपदमध्ये अन्त्यभूतेदंपदमतुबाद्यन्तपदार्थयोरेव विशेष्यतया अन्त्यपदभिन्नस्वीयपदार्थविशेष्यकत्वविरहात् । अन्त्यत्वं च स्वघटकपदेषु चरमत्वम् उपनयादिस्थेदमादिपदानामपि न पदसामान्यमध्ये चरमत्वं तदुत्तरमप्यन्यवाक्यघटकपदसत्त्वादित्यतः स्वघटकत्वं पदविशेषणम् । एवं च निगमनघटकेषु यच्चरमं तदन्योपनयस्थेदंपदार्थविशेष्यकबोधं प्रत्युपनयसहकारेण जनके निगमने तादात्म्येन द्रव्यादिसाधके इदं द्रव्यं गुणकर्मान्यत्वे सति सत्त्वा-

दित्यादौ स्वघटकविभक्त्यन्तपदेषु यदन्त्यं सत्त्वादिपदं तदन्यवि-
भक्त्यन्तप्रतिज्ञास्थद्रव्यादिपदार्थविशेष्यकान्वयबोधजनके हेत्ववय-
वे चातिव्याप्तिवारणाय स्वीयत्वमभिन्नपदविशेषणम् । अत्र स्वत्व-
पुरस्कारेण लक्ष्यव्यक्तीनां निवेशादननुगम इति प्रतियोगिनि स्वत्वं
निवेश्य लक्षणान्तरमाह अन्त्यपदवत्त्वे सतीति । अत्राप्युदाहरण-
वारकं प्रथमसत्यन्तमनुषज्यते । द्वितीयसत्यन्तवैकल्पिकं सत्यन्त-
द्वयम् । धूमादित्यादिहेतौ विभक्त्यन्तान्त्यपदाप्रसिद्ध्या एकपदमात्र-
घटिततत्पदसाधारणस्यान्त्यत्वस्य निर्वचनेऽप्यन्त्याभिन्नविभक्त्यन्त-
स्वीयपदाप्रसिद्ध्या स्वपदेनान्यस्यैवोपादेयतया स्वीयानन्त्यपदार्थ-
विशेष्यकशाब्दबोधाजनकं यत्तदन्यत्वसत्त्वादतिव्याप्तिरतोऽन्त्यपद-
वत्त्वे सतीति । अन्त्यपदवत्त्वं च स्वघटकपदोत्तरपदाघटितं यत्त्वं
तदन्यत्वं न तु स्वघटकपदोत्तरपदवत्त्वम् । लक्ष्यभूतप्रतिज्ञाव्य-
क्तीनां स्वत्वेनोपादेयतयाऽननुगमतादवस्थात् । अन्त्यपदवतो हेतु-
विशेषस्य उपनयनिगमनयोस्तद्वतोः स्वीयानन्त्यपदार्थविशेष्यकबो-
धाजनकयोस्तदन्यत्वासत्त्वान्नातिव्याप्तिः । न चोपनयघटकानन्त्य-
पदार्थहेतुमदादिविशेष्यकबोधजनकतदेकदेशमतुबन्तादेर्भेदस्य तद्घ-
टितसमुदायात्मकोपनयादावसत्त्वात् तादृशबोधाजनकं स्वं
नोपनयादिकमित्यतिव्याप्तिरिति वाच्यम् । तादृशबोधजनकत्वं
यादृशसमुदायावृत्तितादृशसमुदायरूपस्वभिन्नत्वनिवेशेनानतिप्रस-
ङ्गात् । उपनयाद्येकदेशवृत्तितादृशबोधजनकताया इदमाद्यन्त-
पदघटितसमुदायात्मकोपनयावृत्तितया तदन्त्यपदसमुदायात्मको-
पनयादेस्तादृशसमुदायात्मकत्वेन तद्भिन्नत्वाभावात् । तादृश-
समुदायभिन्नत्वं च तद्भेदानुयोगितावच्छेदकावयवतावच्छेदक-
रूपवत्वम्, अतः समुदायघटकप्रत्येकसकलभागेषु समुदायभेदसत्त्वे-
ऽपि नातिप्रसङ्गः । ईदृश्येव रीतिरवयवान्तरघटितलक्षणान्तरेऽपि
बोध्या, तस्मात् इतरेभ्यो भिद्यते इत्यादिनिगमने स्वघटकविभक्त्यन्त-
पदमध्ये यदन्त्यं धातुपदं तदन्याख्यातार्थविशेष्यकबोधजनकतयाऽति-
व्याप्तिमन्त्यभिन्नपदस्य विभक्त्यन्तरूपताविवक्षणेन वारयति पद-
मिति । निगमन इति । निगमनपदं तस्मात्पृथिवीत्यादि निगमनवि-
शेषपरम् । अन्त्यपदशरीरे विभक्तिमत्त्वरूपपदवत्त्वनिवेशे पुनरुप-
नयनिगमनयोरेवातिव्याप्तिः स्यात् उपनयघटकायंपदनिगमनघटक-

मतुप्पदयोरन्ते तद्घटकविभक्तिसत्त्वेनान्त्यभिन्नत्वादतस्तत्र विभक्त्यन्तपदमेव निवेश्यमिति भाव इति केचिद्व्याचक्षते।

तन्न मनोरमम्। तथाहि—स्वघटकविभक्त्यन्तपदमध्ये यदन्त्यमित्यस्य कोऽर्थः? स्वघटकविभक्त्यन्तपदप्रागभावासमानकालीनविभक्त्यन्तपदमिति चेत्। उपनयादिस्थेदमादिपदस्य विभक्तिरूपपदप्रागभावसमानकालीनतया तस्यान्त्यत्वनिर्वाहाय प्रथमं विभक्त्यन्तत्वमस्तु चरमविभक्त्यन्तत्वविशेषणमनर्थकम्। तद्धेयमेवेति चेत्। तर्हि अनन्त्यत्वं स्वीयविभक्त्यन्तपदप्रागभावसमानकालीनत्वपर्यवसितं भिन्नभिन्नत्वनिवेशस्य वैयर्थ्यात्। एवञ्च तस्माद्ध्रियत इत्यादिनिगमस्थाख्यातपदस्यानन्त्यत्वमेव नास्ति किमनन्त्यपदे विभक्त्यन्तत्वनिवेशनेनेति।

वस्तुतस्तु तस्मान्नेतराणीत्यादौ निगमने विभक्त्यन्तेतरादिपदप्रागभावसमानकालीननञ्पदार्थविशेष्यकशाब्दबोधजनकेऽतिव्याप्तिरेव लक्षणस्थपदपदस्य विभक्त्यन्तपरतया वारिता।

अथ नञ्पदस्यापि प्रातिपदिकत्वेन विभत्यन्ततया विभक्त्यन्तत्वविशेषणेन दुर्वारता। न च निपातस्य विभक्तिप्रकृतित्वं न स्वीक्रियते तदर्थेन विभक्त्यर्थानन्वयात्, स्वराद्यव्ययार्थे चानुसन्धीयमानलुप्तविभक्त्यर्थान्वयेन तादृशान्वयोत्तरमेव विभक्तिस्वीकारस्यावश्यकत्वात्, नञोऽसुबन्तत्वेऽपि नञिति तत्पुरुषविधायकसूत्रसामर्थ्यादेव तेन सह समासो भविष्यतीति वाच्यम्। विभक्तेर्निपातार्थान्विवतार्थाबोधकत्वेऽपि निर्विभक्तिकप्रातिपदिकस्यासाधुतया साधुत्वाय विभक्तेरावश्यकत्वात् नञोऽसुबन्तत्वेऽपि नञिति तत्पुरुषविधायकसूत्रसामर्थ्येन तेन सह पदान्तरस्य तत्पुरुषसमर्थनेऽपि बहुव्रीह्यव्ययीभावयोरनुपपत्तेश्च। सुबन्तत्वेऽपि समासाप्रविष्टप्रतियोगिपदार्थानुपरागेण नञोऽभावाबोधकतया तत्सापेक्षत्वेनासामर्थ्यान्न तेन सह द्वन्द्व इति चेत्।

सत्यम्। विभक्त्यन्तत्वमत्र शाब्दबोधौपयिकविभक्तिप्रकृतित्वम्, पर्वतो वह्निमानित्यादौ प्रतिज्ञास्थपर्वतादिपदोत्तरसुब्विभक्तेरर्थविशेषपरताविरहेऽपि अभेदान्वयबोधाद्युपयोग्याकाङ्क्षानिर्वाहकसमानविभक्तितासम्पादकत्वेन शाब्दबोधोपयोगिता न तु निपातोत्तरविभक्तेरिति नातिव्याप्तिः। अघटादिशब्देन यत्र प्रतिज्ञायां घट-

भिन्नादिरूपपक्षानिर्देशस्तत्र नञादेर्निरुक्तविभक्त्यन्तताविरहेऽपि विशेष्यीभूतविशिष्टपक्षबोधकघटादिपदस्य तादृशविभक्त्यन्तत्वाल्लक्षणसमन्वयः ।

यत्तु यादृशपदोत्तरं कदाचिद्विभक्तेः श्रवणं तदेव विभक्त्यन्तपदेन विवक्षितं दध्यादिपदोत्तरं प्रथमैकवचनाश्रुतावपि द्विवचनादिश्रुतेर्दधि द्रव्यमित्यादिप्रतिज्ञासङ्ग्रह इति । तन्न । पक्षवाचकस्वरादिपदघटितप्रतिज्ञायामव्याप्तेः ।

निगमनवारणायेति । इतरान्वितस्वार्थबोधकत्वमात्रनिवेशे उपनयार्थान्वितस्वार्थबोधकतया निगमनातिव्याप्तिः स्यात्तद्वारणायेत्यर्थः । यद्यपीतरान्वितस्वार्थबोधकत्वं निगमनवत्प्रतिज्ञोपनययोरपि, तथापि विशेषणतयाऽन्वितत्वनिवेशनेन तद्वारणसम्भवान्निगमनमात्रकथनम् । यद्यपि निगमनसमुदायार्थः पक्ष एवान्वेतीति साध्यान्वितस्वार्थबोधकत्वं निवेश्यापि प्रायशो निगमनवारणसम्भवः, तथापि यत्र साध्यस्य प्रमेयत्वगोत्वाभावादेरेव पक्षता तत्रत्यनिगमनेऽतिव्याप्तिवारणाय पक्षान्वितस्वार्थबोधकपदोपस्थापितार्थान्वितत्वनिवेशनम् । पक्षान्वितस्वार्थबोधकत्वं पक्षतावच्छेदकावच्छिन्नविषयतानिरूपितस्वार्थविषयताप्रयोजकत्वम्, यथाश्रुते उपनयस्थपक्षवाचकेदंपदस्य वस्तुगत्याऽभेदेन पक्षसंसृष्टो यः पक्षस्तद्बोधकत्वेन पाषाणमयः पर्वत इत्यादिवाक्यात्पाषाणमयत्वादिरूपेण पक्षतावच्छेदकावच्छिन्नसंसृष्टतया प्रतीयमानो यः पक्षतावच्छेदकावच्छिन्नस्तद्बोधकत्वेन च तदुपस्थापितार्थान्वितस्वार्थबोधके निगमनेऽतिव्याप्तेरवारणात् । तादृशपदोपस्थापितार्थान्वितस्वार्थबोधकत्वं च तादृशपदप्रयोज्यविषयतानिरूपितस्वप्रयोज्यास्वार्थविषयताकत्वम्, यथाश्रुते निगमनार्थान्वयिन एव पक्षतावच्छेदकावच्छिन्नस्य पर्वतो नीलपर्वत इत्यादिवाक्यस्थपक्षतावच्छेदकावच्छिन्नविषयतानिरूपितविषयताप्रयोजकपर्वतपदोपस्थाप्यत्वेन निगमनातिव्याप्तेर्दुर्वारत्वात् । पक्षतावच्छेदकावच्छिन्नविषयतानिरूपिता या विषयता तन्निरूपितविषयताप्रयोजकत्वं फलितार्थः । पक्षतावच्छेदकावच्छिन्नत्वानिवेशे व्याप्यवत्त्वावच्छिन्ना या पक्षविषयता तन्निरूपितोपनयस्थेदम्पदप्रयोज्यविषयतानिरूपितविषयताप्रयोजकत्वमादाय निगमन एवातिव्याप्तिः स्यादिति तन्निवेशः ।

अथ तन्निवेशेऽपि पक्षतावच्छेदकावच्छिन्ना या उपनयस्थेदंपदप्रयोज्यविषयता तन्निरूपितनिगमनार्थविषयतानिरूपितोपनयार्थविषयतैवेत्युपनयेऽतिव्याप्तिः । न च चरमविषयताप्रकारत्वरूपा विवक्षणीया अतो नायमतिप्रसङ्ग इति वाच्यम् । एवंसति प्रमेयत्वमभिधेयं प्रमेयत्वादित्यत्र पक्षान्वितपञ्चम्यर्थे विशेष्यतयाऽन्वितसाध्यरूपार्थमादाय प्रतिज्ञातिप्रसङ्गाप्रसक्तेः प्रमेयत्वमभिधेयमित्याद्यग्रिमग्रन्थानुत्थितेः । एवं प्रमेयत्वमभिधेयं प्रमेयत्वादित्यत्र प्रतिज्ञातिव्याप्तेरेकदेशार्थविषयताव्यावृत्तस्वार्थविषयतानिवेशेन वारणेऽपि तत्रत्यनिगमनेऽभिधेयत्वव्याप्यप्रमेयत्ववांश्चायमित्युपनयार्थप्रमेयत्वस्वरूपपक्षतावच्छेदकरूपहेतुतावच्छेदकावच्छिन्नान्वितताद्दशपक्षतावच्छेदकावच्छिन्ने स्वार्थान्वयबोधजनकेऽतिप्रसङ्गो दुर्वारः। पक्षतावच्छेदकावच्छिन्नेत्यत्र विशेषणतयान्वितत्वनिवेशे प्रमेयत्वमित्याद्यग्रिमग्रन्थानुत्थितेः पञ्चम्यर्थहेतुत्वस्य विशेष्यतयैव पक्षान्वयित्वेन प्रतिज्ञातिव्याप्त्यप्रसक्तेः, विशेषणतया किञ्चिदन्वितत्वनिवेशेनैवोपपत्तेः प्रकृतपक्षनिवेशवैयर्थ्यापाताच्च । निगमनार्थस्य विशेषणतया किञ्चिदन्वितेऽनन्वयेन तत्रातिव्याप्तेस्तमनिवेश्यापि वारणसंभवात् ।

मैवम् । शुद्धपक्षतावच्छेदकावच्छिन्नान्वितत्वं निवेश्य दर्शितातिप्रसङ्गद्वयवारणसम्भवात्, उपनयार्थव्याप्तिविशिष्टपक्षान्वयिनो निगमनार्थस्य शुद्धपक्षतावच्छेदकावच्छिन्नानन्वयित्वेन तदन्वितार्थकेऽप्युपनये शुद्धपक्षतावच्छेदकावच्छिन्नान्वितार्थकपदोपस्थापितार्थकत्वविरहात् । प्रमेयत्वमभिधेयं प्रमेयत्वादित्यत्र व्याप्तिविशिष्टप्रमेयत्वरूपपक्षतावच्छेदकावच्छिन्न एव इदमर्थान्वयेन तदन्वितार्थकेऽपि निगमने निरुक्तरूपविरहात् ।

एतेन पक्षसाध्ययोरभेदस्थले निगमनार्थघटकसाध्यरूपपक्षान्वितेदम्पदार्थान्वितार्थकतया निगमनातिव्याप्तेरपि नावकाशः ।

यत्तु एकविशेषणतापन्नस्य यत्रापरविशेष्यता तत्र विशेष्यत्वविशेषणत्वरूपविषयतयोर्भेदेन पक्षविषयतानिरूपितविषयतानिरूपितस्वार्थविषयतानिवेशे हेतुमात्र एव लक्षणानुपपत्तिः एवं चोक्तरीत्या उपनयातिव्याप्तेर्नावकाशः पक्षविषयतानिरूपितनिगमनार्थनिष्ठप्रकारतारूपविषयतया पक्षविषयतानिरूपकतन्निष्ठविषयताया अभेदेनावच्छेद्या-

वच्छेदकभावविरहात् । एवंक्रमेण पक्षसाध्ययोरभेदस्थले निगमनातिव्याप्तेरनवकाशः । एवं हेतुपक्षयोरभेदस्थले निगमनातिव्याप्तिरपि समाहिता हेतुप्रकारतानिरूपितताया निगमनार्थप्रकारतानिरूपितायाश्चेदमर्थनिष्ठविशेष्यतारूपविषयतायाश्चाभेदेनावच्छेद्यावच्छेदकभावविरहादिति ।

तन्न । एकविशेषणतापन्नस्य यत्रापरविशेष्यता तत्र विशेष्यताप्रकारतयोरभेदे बाधकविरहेण लाघवेन तस्यैवोपगमात्, नत्ववच्छेद्यावच्छेदकभावापन्नविषयताद्वयस्य । यदि चैकविशेषणतापन्नस्यापरविशेष्यतास्थले प्रकारताविशेष्यतयोरभेदे दण्डी पुरुषवानित्यादिबुद्धेः पुरुषादिनिष्ठप्रकारतानिरूपितदण्डादिविशेष्यताशालित्वं दुर्वारमिति तस्याः पुरुषीयो न वा दण्ड इत्यादिसंशयविरोधिताप्रसङ्ग इति तद्भेदः समूहालम्बनवैलक्षण्याय तयोरवच्छेद्यावच्छेदकभाव एव च स्वीक्रियत इति मन्यते, तदा हेतुपक्षयोरभेदस्थले निगमनार्थधर्मितावच्छेदकताकहेतुप्रकारतानिरूपितताया निगमनार्थप्रकारतानिरूपितायाश्च विशिष्टहेत्ववच्छिन्ना या इदंपदार्थपक्षविशेष्यताया ऐक्ये हेतोर्हेतुधर्मितावच्छेदकतापत्तिरिति अवच्छेद्यावच्छेदकभावापन्नविषयताद्वयस्य स्वीकरणीयतया तत्रत्यनिगमनातिव्याप्तेर्दुर्वारत्वात् । स्वार्थैकदेशस्यापि स्वार्थत्वाभिमानमूलां प्रतिज्ञाविशेषातिव्याप्तिशङ्कां स्वार्थपदस्य स्वप्रतिपाद्यत्वपर्याप्त्यधिकरणविशिष्टार्थपरतां स्फुटयन्निराकरोति प्रमेयत्वमिति । न प्रतिज्ञार्थः–साध्यविशिष्टपक्षरूपः । एकदेशार्थः–साध्यमात्रम् । यद्यपि प्रमेयत्वमभिधेयं प्रमेयत्वादित्यादिन्यायान्तर्गतनिगमने हेतुभूतपक्षान्वितस्वार्थबोधकेदम्पदोपस्थापितपक्षान्वितस्वार्थबोधकत्वमक्षतमिति विशेषणतया पक्षान्वितत्वं विवक्षणीयमिति कथितस्थले पञ्चम्यर्थः पक्षे न विशेषणमित्यतोऽपि नोक्तप्रतिज्ञायामतिव्याप्तिसम्भवः; तथापि निगमनार्थैकदेशस्य ज्ञाप्यत्वान्तभागस्य तादृशार्थान्विततया निगमनेऽतिप्रसङ्गवारणाय स्वार्थपदस्य स्वप्रतिपाद्यविशिष्टार्थपरताया आवश्यकत्वात् । कथितस्थले पञ्चम्यर्थान्वितस्वार्थबोधकत्वाभावेनापि अतिव्याप्तिवारणासम्भवात्तत्कथनम् । केवलेन हेतुवाक्येन पञ्चम्यर्थविशेष्यकावान्तरवाक्यार्थबोधो जन्यते ततश्च प्रतिज्ञास्थवह्न्यादिपदसहकारेण

धूमज्ञानज्ञाप्यो वह्निरित्याकारकस्वार्थविशिष्टबोधो जन्यते ततः समुदितप्रतिज्ञासहकारेण पक्षे स्वार्थविशिष्टसाध्यवैशिष्ट्यबोधश्च प्रत्येकमेतादृशबोधत्रयजनकताघटितलक्षणत्रयमाह स्वार्थेति । प्रथमलक्षणं तृतीबोधघटितम् द्वितीयं प्रथमबोधघटितम् तृतीयं च द्वितीयबोधघटितं बोध्यम् । विशिष्टवैशिष्ट्येति । स्वतात्पर्यविषयबोधयिविशेषणतावच्छेदकस्वार्थबोधजनकन्यायावयवत्वमित्यर्थः । तेन निगमनार्थान्वितोपनयार्थबोधस्यापि निगमनार्थैकदेशविशिष्टवैशिष्ट्यबोधतया निगमनार्थबोधस्य तज्जनकत्वेन यथाश्रुतलक्षणस्य निगमनेऽतिव्याप्तिरिति दूषणं प्रत्युक्तम् । विशेषणतावच्छेदकतया अव्यावर्त्तकत्वात्स्वतात्पर्यविषयबोधयित्वं तद्विशेषणम् । विशिष्टबोधेति । स्वतात्पर्यविषयबोधजनकतावच्छेदकस्वार्थप्रकारताशालिबोधजनकन्यायावयवत्वमित्यर्थः । तेन निगमनार्थविशिष्टोपनयार्थज्ञानस्य निगमनार्थविषयकत्वेन तादृशज्ञानस्वरूपयोग्यत्वेऽपि न निगमनेऽतिव्याप्तिः । लक्षणत्रयमेव हेतौ सङ्गमयन्नवयवान्तराद्व्यावर्तयति एकवाक्यतयेत्यादिना ॥

(दी०) इतरान्वितस्वार्थबोधकन्यायावयवत्वमुदाहरणत्वम्, अन्वयव्याप्तिबोधकतत्त्वं व्यतिरेकव्याप्तिबोधकतत्त्वञ्च विशेषलक्षणद्वयम् ।

इतरोपस्थापितार्थविशेषणकस्वार्थबोधकन्यायावयवत्वं स्वार्थविशेष्यकेतरार्थान्वयबोधजनकन्यायावयवत्वं वोपनयत्वम् ।

अवयवार्थविशेष्यकस्वार्थबोधजनकन्यायावयवत्वं निगमनत्वम् । हेत्वर्थश्च प्रतिज्ञार्थे न विशेषणत्वेनान्वेति किन्तु तदेकदेशार्थ इत्युक्तप्रायम् ॥

इत्यवयवदीधितिः ॥

—:०:—

(गा०) इतरोपस्थापितेति । स्वाघटकपदोपस्थापितेत्यर्थः । स्वार्थत्वं स्वस्वजन्यप्रतिपत्तिविशेष्यत्वम्, अतो निगमनजन्यप्रतिपत्तिविशेष्ये मतुबाद्यर्थे तद्घटकपदोपस्थापितसाध्यविशेषणकबोधजनकस्य

निगमनस्य वारणाय उपस्थापितान्तम् । अत्र प्रथमलक्षणे इतरार्थ-प्रकारकस्वार्थविषयताकत्वेन द्वितीये च स्वार्थांशेतरप्रकारकत्वेन बोधस्य निवेशाद्भेदः ॥

अवयवार्थेति । अवयवजन्यप्रतिपत्तिविशेष्यविशेष्यकस्वार्थप्रकारकबोधजनकावयवत्वमर्थः । सर्वेषामेवावयवानां स्वार्थघटकविशेष्यांशे स्वार्थघटकार्थान्तरप्रकारकबोधजनकतयाऽतिव्याप्तिवारणाय स्वार्थप्रकारकेति । प्रतिज्ञार्थघटकसाध्यरूपविशेषणे हेत्वर्थस्यान्वयेऽपि विशेष्ये पक्षे तदनन्वयात् प्रतिज्ञायां नोपनयलक्षणातिव्याप्तिर्न वा हेतौ निगमनलक्षणातिव्याप्तिः उपनयनलक्षणे स्वार्थपदस्य निगमनलक्षणे चावयवार्थपदस्य विशेष्यपरत्वादित्याह हेत्वर्थश्चेत्यादिना । उक्तप्रायमिति । पूर्वं हेत्वर्थैकदेशपञ्चम्यर्थ एकदेशार्थमात्रान्वयित्वमुक्तम् अत्र च हेतुसमुदायार्थस्य तथात्वमिति विशेषात्प्रायमिति ।

(चि०) केचित्तु सामान्यवत्त्वे सति बाह्यकरणप्रत्यक्षत्वादित्यपार्थकम् विभक्त्युपस्थापितहेतुत्वेन सामान्यवत्त्वस्य विभक्त्यन्तरावरुद्धस्यानन्वयादिति केचित् । तन्न । सतिसप्तमीबलात् सामान्यवत्त्वस्य बाह्यकरणप्रत्यक्षत्वस्य च सामानाधिकरण्योपस्थितौ विशिष्टे हेतुत्वान्वयात् तथैव व्युत्पत्तेः न ह्ययमर्थोऽस्मान्नावगम्यते ।

हेतावुक्ते कथमस्य गमकत्वमित्याकाङ्क्षायां व्याप्तिपक्षधर्मतयोः प्रदर्शनप्राप्तौ व्याप्तेः प्राथम्यात् तत्प्रदर्शनायोदाहरणम् । तत्रानुमितिहेतुलिङ्गपरामर्शवाक्यजन्यज्ञानजनकव्याप्यत्वाभिमतवह्निष्ठनियतत्वाभिमतसम्बन्धबोधजनकशब्दत्वमुदाहरणत्वम् । सामान्यलक्षणे साध्यसाधनसम्बन्धबोधकत्वं साध्यसाधनाभावसम्बन्धबोधकत्वञ्च विशेषलक्षणद्वयम् । 'न्या-

यावयवद्दृष्टान्तवचनमुदाहरण'मिति तु न–दृष्टान्तप्रयोगस्य सामयिकत्वेनासार्वत्रिकत्वात्, यो यो धूमवान् सोऽग्निमानित्येव व्याप्तिप्रतीतेः। नापि प्रकृतानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानाविषयव्याप्त्युपनायकं वचनं तत्,–उपनयातिव्याप्तेः। अत उपनयाभिधानप्रयोजकजिज्ञासाजनकवाक्यमुदाहरणम्। एतदेवान्वयव्यतिरेकिव्याप्तिविषयत्वविशेषितं विशेलक्षणद्वयमित्यन्ये। अत्र च व्यभिचारवारणाय वीप्सामाहुः। यत्र च सामानाधिकरण्यादेव व्याप्तिस्तत्र न वीप्सा, केवलान्वयिन्यभेदानुमाने च वीप्सायामपि व्यभिचारतादवस्थ्यमिति तु वयम्। वीप्सा च यत्पदे न तत्पदेऽपि विरुद्धरूपोपस्थितयोरपि तत्पदेन परामर्शाद्बुद्धिस्थवाचकत्वादिति न व्युत्पत्तिविरोधः, यथा यद्यत् पापं प्रतिजहीत्यत्र। इदश्च साध्यसाधनोभयाश्रयाविकलानुपदर्शितान्वयं विपरीतोपदर्शितान्वयानुपदर्शितव्यतिरेकविपरीतोपदर्शितव्यतिरेकभेदादाभासरूपमिति।

उदाहरणानन्तरम्भवतु व्याप्तिस्तथापि व्याप्तं किं पक्षे वर्त्तते न वेत्याकाङ्क्षायां व्याप्तस्य पक्षधर्मत्वप्रदर्शनायोपनयः। तत्रानुमितिकारणतृतीयलिङ्गपरामर्शजनकावयवत्वमुपनयत्वमिति सामान्यलक्षणम्। साध्यव्याप्यविशिष्टपक्षबोधकावयवत्वं साध्याभावव्यापकाभावप्रतियोगिमत्पक्षबोधकावयवत्वश्च विशेषलक्षणद्वयम्। उदाहरणान्त एव प्रयोग इति न वाच्यम्। तृतीयलिङ्गपरामर्शस्य व्याप्तपक्षधर्मतावगाहिनोऽवय-

वान्तरादलाभात्, तदनभ्युपगमेऽपि पक्षधर्मताया अलाभात्। न च हेतुवचनादेव तदवगमः तस्य को हेतुरित्याकाङ्क्षायां प्रवृत्तत्वेन हेतुस्वरूपोपस्थापकस्यातत्परत्वात्। वादिवाक्यादेवाक्षेप इति चेन्न। तदर्थस्यासिद्धत्वेनानाक्षेपकत्वात्, अन्यथा प्रतिज्ञामात्रादेव सर्वाक्षेपेऽवयवान्तरविलयात्। प्रतिपाद्यानां स्वत एव तदवगम इति चेन्न। तेषां व्युत्पन्नाव्युत्पन्नतया सर्वत्र तदसम्भवात् प्रतिपादकेन स्वव्यापारस्य निर्वाहयितुमुचितत्वाच्च, अन्यथावयवान्तरेऽप्येवंप्रसङ्गात्।

उपनयानन्तरं निगमनम्, तच्चानुमितिहेतुलिङ्गपरामर्शप्रयोजकशाब्दज्ञानकारणव्याप्तिपक्षताधीप्रयुक्तसाध्यधीजनकं वाक्यम्। न च व्याप्तिपक्षधर्मतायाश्चतुर्भिरेवावयवैः पर्याप्तेः किं तेनेति वाच्यम्। अबाधितासत्प्रतिपक्षत्वयोरलाभे चतुर्णामप्यपर्यवसानात्।

अथाभिधानाभिधेययोर्व्याप्तिपक्षधर्मतावल्लिङ्गप्रतिपादनादेव पर्यवसानेनावयवान्तराणां निराकाङ्क्षत्वं विपरीतशङ्कानिवृत्तेरपि तत एव लाभात्, अन्यथा निगमनेनापि तदवारणात् न हि तद्विशेषदर्शनमनादृत्यैव तन्निवर्त्तकम्। सिद्धनिर्देशतया वारयतीति चेत्। न स्वरूपमात्राभिधानात्। साध्यत्वानुपस्थितौ तस्मादिति हेतुविभक्त्यनन्वयप्रसङ्गाच्चेति चेन्न। व्याप्तिपक्षधर्मताज्ञानेऽपि बाधसत्प्रतिपक्षबुद्धेः साध्यज्ञानानुत्पत्तिदर्शनात् तदभावावबोधने समीहितानिर्वाहात्।

अथ बाधादिविरहस्य प्रयोजकत्वं न तु तद्बोधस्य

मानाभावादसिद्धेश्च इति किमर्थं बाधादिविरहो बोधनीय इति चेन्न। यदवगमे सति यन्न भवति तत्तदभावज्ञानसाध्यमिति व्याप्तेः। न चानन्वयः, तस्मादित्यन्वयबलादेव हेत्वनाकाङ्क्षितत्वलक्षणासिद्धत्वज्ञानात् न त्वन्वयात् पूर्व्वम्।

इह केचित्–यथा तस्मादिति सर्व्वनाम्ना हेतोः परामर्शः पूर्व्वोक्ताशेषरूपलाभाय तथा साध्यांशस्यापि तथा इति सर्वनाम्ना सिद्धस्थल इव विरोधादिवारणाय युक्त इत्याहुः। तन्न। तथेति स्वरूपे प्रकारे सादृश्ये वा? आद्ये तथा चायमिति प्रक्रान्तात् तथेति हेतुमानित्यर्थः स्यात्, तथा चानन्वयः न हि हेतुमत्त्वादेव हेतुमत्त्वमित्यन्वितम्। न द्वितीयः सामान्येन पक्षस्यापि अन्वयव्याप्तौ प्रवेशात् तत्प्रकारान्वयस्तत्रैवेत्यनन्वयात्। अत एव न तृतीयोऽपि अभेदानुमाने चान्वयिनि तस्मात्तथेति सादृश्याभावात्, बहूनाञ्च प्रक्रमे विशेष्यानन्वयात्, वादिवाक्ये च योग्यतान्वयेऽतिप्रसङ्गात् तस्मादित्यत्र विभक्त्यर्थानन्वयादेव नियमः। तस्मादनित्य इत्यभिधाने विशिष्य सिद्धतावगम्यते पूर्व्वं साध्यतयोक्तस्य समर्थहेतुसम्बन्धेन पुनरुत्कीर्त्तनात्, अन्यथा तद्वैयर्थ्यात्। संशयप्रयोजनादयस्त्ववयवलक्षणाभावादेव नावयवाः, किन्तु न्यायाङ्गतयोपयुज्यन्त इति नाधिक्यम्, कण्टकोद्धारस्य च न सार्वत्रिकत्वं समयविशेषोपयोगित्वादिति ॥

इत्यवयवचिन्तामणिः।

शब्दो अनित्यः सामान्यवत्वे सति बाह्यकरणप्रत्यक्षत्वादिति हेतुप्रयोगे हेतुघटकदलयोः प्रत्येकं व्यभिचारितया भेदेन नामार्थयोस्तयोरेकांशेऽपरस्य विशेषणतयाऽनन्वयेन च विशिष्टहेतुत्वान्वयासम्भवेन विशेषणविशेष्यभावानापन्नयोर्मिलितयोर्हेतुत्वान्वयो वाच्यः । सोऽपि न सम्भवति सामान्यवत्त्वादेः । सप्तम्यन्तपदोपस्थाप्यहेतुत्वार्थकपञ्चमीप्रकृत्यर्थत्वाभावादिति केषांचित्पूर्वपक्षं समाधातुमुपन्यस्यति मूले हेतुग्रन्थे सामान्यवत्त्व इति । सामान्यवत्त्वस्य बाह्यकरणप्रत्यक्षत्वे विशेषणत्वासम्भवेऽपि सप्तम्यन्तार्थस्य सामान्यवत्त्वसामानाधिकरण्यस्य तत्र विशेषणतया तादृशाविशेषणावच्छिन्नबाह्यकरणप्रत्यक्षत्वे हेतुत्वान्वयसम्भवान्नापार्थकतेत्याह तन्नेति । सामान्यवत्त्वस्येति । सामान्यवत्त्वस्य बाह्यकरणप्रत्यक्षत्वविशेषणीभवत्सामानाधिकरण्यप्रतियोगितयोपस्थिताबित्यर्थः ।

अथ समानाधिकरण्ये सप्तम्या अननुशासनात्कथमेतत् सतीत्यस्य वा कोऽर्थ इति चेन्न । 'यस्य च भावे न भावलक्षण'मिति सूत्रानुशिष्टसप्तम्या गोषु दुह्यमानासु गत इत्यादौ यथा गोदोहनादिसमानकालीनत्वं गमनादौ बोध्यते तथा प्रकृतेऽपि समानदेशत्वप्रत्यायनात् । न च तादृशसप्तम्या क्रियासमानकालीनत्ववत् क्रियासमानदेशत्वस्य कदाचित्क्रियायां प्रत्यायनसम्भवः यस्य क्रियया अन्यस्य क्रिया लक्ष्यते विशेष्यते तद्वाचकपदसमभिव्याहृतकृदन्तोपस्थापितक्रियासमानकालीनत्वादिसम्बन्धेन क्रियान्तरविशेषणमिति यावत् तद्वाचकपदात्सप्तमीत्यर्थकत्वात्तादृशसूत्रस्य क्रियासमानकालीनत्वादौ क्रियान्तरविशेषणतया विवक्षिते तादृशसूत्रेण सप्तमीविधानात् । सप्तमीप्रकृत्यर्थनिरूपितसामानाधिकरण्यादेरपरनामार्थविशेषणतया विवक्षणे सप्तम्यननुशासनात्सामान्यवत्त्वसामानाधिकरण्यस्य प्रत्यक्षत्वे कुतो लाभ इति वाच्यम् । यथा गोषु दुह्यमानास्वागत इत्यादौ गोपदोत्तरसप्तम्याः समभिव्याहृतक्रियागोदोहनरूपोर्थः, तत्र समभिव्याहृतकृदन्तार्थान्वितप्रकृत्यर्थस्य कर्मतानिरूपकत्वसम्बन्धेनान्वयः तस्याश्च समानकालीनत्वसम्बन्धेन क्रियान्तरेऽन्वय इति तत्र दुह्यमानगोकर्मकदोहनसमानकालीनत्वलाभस्तथा प्रकृतेऽपि । अत्रापि शतृप्रकृतेः असुधातोराधारत्वमर्थः अत्रास्ति घट इत्यादौ एतद्देशनिष्ठाधारताप्रतियोगी घट इत्यादिप्रतीतेः तत्र च सप्तम्यर्थसमभि-

त्याहृताधारत्वरूपाक्रियायां सामान्यवत्त्वस्य प्रकृत्यर्थस्य प्रति-
योगितासम्बन्धेनान्वयः आधारतायाः प्रत्यक्षत्वे समानदेशत्व-
सम्बन्धेनान्वय इति प्रत्यक्षत्वे सामान्यवत्त्वसामानाधिकरण्यलाभ-
सम्भवात् । भावलक्षणामिति भावशब्दस्य धर्ममात्रपरत्वात्
प्रत्यक्षत्वस्य क्रियात्वाविरहेऽपि क्षतिविरहात् । सत इत्यस्याध्या-
हारेण वा प्रत्यक्षत्वसत्त्वे सामान्यवत्त्वसत्त्वस्य समानदेशतालाभेन
सामञ्जस्यात् । कुत्रचित्समानकालीनत्वं क्रियायाः सम्बन्धः कुत्रचित्स-
मानदेशत्वमित्यत्र किं नियामकमिति चेत् । यत्रसमभिव्याहृतकृत्यप्र-
त्ययस्य वर्त्तमानत्वे तात्पर्यं तत्र समानकालीनत्वं यत्र च न तद्विव-
क्षणं तत्र समानदेशत्वं सम्बन्ध इति नियमात् । प्रकृते च वर्त्तमान-
त्वाविवक्षया समानदेशत्वलाभात् वर्तमानत्वाविवक्षायामपि चिरो-
धिकालाविवक्षया लटः साधुत्वात् । यत्र चातीतत्वमनागतत्वं वा कृता
विवक्षितं दुग्धासु दोग्धव्यास्वित्यादौ तत्रोत्तरत्वं पूर्ववत्त्वम्, पूर्ववत्त्वं
च सम्बन्ध इति दोहनोत्तरत्वादिकमेव प्रतीयते न तु समानकाली-
नत्वमित्यवधेयम् ।

ननु उदाहरणे यत्पदद्विरुक्तिप्रयोजिकायाः महानसमहानसान्य-
त्वादिना वक्तुर्यावत्साधनाधिकरणप्रत्यायनेच्छारूपवीप्सायाः किं
प्रयोजनम्, न हि साधनस्य यावदधिकरणे साध्यवत्त्वज्ञानमनुमितिहेतु-
येन यत्पदे वीप्सां विना यावत्धूमाधिकरणानुपस्थापने तत्पदेन ता-
वदधिकरणानां परामर्शासम्भवात्सकलसाधनाधिकरणे साध्य-
वत्त्वाप्रतीतेरनुमित्यनिर्वाहः स्यादिति यत्तत्पदाभ्यां तावदधिकरणबोधो
वीप्साप्रयोजनं भवेत् । न च व्याप्तिप्रत्यायनेच्छा वीप्सा तस्याश्चा-
नुमित्यौपयिकबोध एव प्रयोजनमिति वाच्यम् । व्याप्तेश्च पदार्थ-
त्ववाक्यार्थत्वविरहेण तत्प्रत्यायनेच्छायामपि शाब्दतत्प्रत्ययस्यायो-
गात् मानसबोधे च वक्त्रभिप्रायानुपयोगात् । यदि च यत्पदसम-
भिव्याहृतवन्ह्यादिपदस्य धूमज्ञापकताविशिष्टवन्ह्यादिलाक्षणिक-
तया धूमादौ वन्हिव्याप्तिलाभ इत्युच्यते तदा यत्पदस्य द्विरुक्तिं वि-
नापि तल्लाभसम्भवाद्द्विरुक्तिवैयर्थ्यमित्याक्षेपे प्राचीनसमाधानमुप-
न्यस्यति अत्र चेति । उदाहरणस्थयत्पदे चेत्यर्थः । व्यभिचारवार-
णयेति । वीप्सामुद्दिश्य मानसव्याप्तिज्ञानविरोधिव्यभिचारधीवार-
णप्रयोजनिकामाहुरित्यर्थः । यावद्धेत्वधिकरणे साध्यवत्त्वनिश्चये ते-

न विपरीतनिश्चयात्मकेन साधनाधिकरणे साध्याभाववत्त्वरूपव्यभिचारग्रहस्य प्रतिबन्ध इति भावः ।

नन्वेवं वाच्यत्वादिसाध्यस्य यत्रोपायान्तरात्केवलान्वयित्वं गृहीतमयमेतदभिन्नः एतद्वृत्तियावद्धर्मवत्त्वादित्यत्र च हेतावेकमात्रवृत्तित्वं गृहीतं तत्र हेतौ साध्यसामानाधिकरण्यग्रहादेव मानसी व्याप्तिधीः सम्भवति प्रथमेऽभावे साध्यीयत्वाग्रहेण द्वितीये साध्याभाववत्तया गृह्यमाणेऽधिकरणान्तरे हेतोरग्रहेण व्यभिचारग्रहासम्भवादित्युभयसिद्धव्याप्तिकासाधकतानुमाने यथा उदाहरणं न प्रयुज्यते तथात्र सामानाधिकरण्यलाभायोदाहरणप्रयोगेऽपि द्विर्यत्पदं न प्रयुज्यतेत्यत्रेष्टापत्तिमाह यत्र चेति । सर्वत्रैव द्विरुक्तिरनपेक्षितेति स्वमतमाह वीप्सायामपीति । अयमाशयः । द्विर्यत्प्रयोगेपि सकलसाधनाधिकरणपरत्वाग्रहे व्यभिचारतादवस्थ्यं व्यभिचारधियोऽनिवृत्तिः तत्परत्वग्रहापेक्षायां च यद्योगप्राथम्याभ्यां साधननिष्ठव्याप्तितात्पर्यमेव गृह्यतां तत एव च लक्षणया व्याप्तिशाब्दबोधसम्भवात् तत्र च व्यभिचारशङ्काया अविरोधित्वात् । यावत्साधनवति साध्यवत्त्वबोधाय द्विर्वचनमनर्थकमेव अत एव यन्नैवं तन्नैवमिति प्राचामुदाहरणोपदर्शनमपि सङ्गच्छते । आवश्यकश्च व्याप्तेः शाब्दबोधोऽन्यथा समानप्रकारतामपुरस्कृत्य विपरीतधियो विरोधितायाः दुःकल्प्यतया महानसत्वादिना सकलधूमाधिकरणे साध्यवत्त्वबोधेऽपि धूमवत्त्वप्रकारेण तत्रैव साध्याभावशंकाया अनुच्छेदेन मानसव्याप्तिग्रहासम्भवात् । एवमद्विरुक्तेनापि यत्पदेन एकरूपेण विभिन्नरूपेण वा सकलधूमाधिकरणोपस्थितिसम्भवात्तदर्थकतया द्विरुक्तिसार्थक्यमित्यपि दुर्वचम् । न च सकृदुच्चरितेत्यादिव्युत्पत्तिविरोधादेकस्माद्यत्पदान्नानेकाधिकरणबोधः संभवतीति वाच्यम् । सकृदुच्चरितस्य नानाशक्त्या बोधकतायामेवाव्युत्पत्तेः सर्वनाम्नां च बुद्धिस्थतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नत्वेन नानाधर्मिणामनुगमात् नानार्थेषु शक्तेरैक्येन व्युत्पत्तेरविरोधात्, अन्यथा द्विरुक्तिस्थले एकस्यैव पदद्वयरूपादेशस्थानितया पदभेदविरहेण द्विरुक्तादपि नानार्थबोधानुपपत्तेः कथंचिदर्थद्वयबोधकत्वनिर्वाहेऽपि भूयोऽर्थबोधस्य निर्वाहयितुमशक्यत्वाच्चेति ।

अथ द्विरुक्तस्थल एव व्याप्तौ निरूढलक्षणा अत एव यत्पद-प्रयोगेऽपि वादिवाक्ये स्वारसिकलक्षणाविरहेण व्याप्तिबोधनिर्वाहः। वस्तुतो व्याप्तिगोचरशाब्दबोधानुरोधेन चेदुदाहरणप्रयोगस्तदा उपनयवद्व्याप्यपदेनैवोदाहरणेऽपि व्याप्तिबोधनं युज्यते इति सकलधूमाधिकरणे साध्यवत्त्वबोधनाय यो धूमवानित्युदाहरणम्। इत्थं च यत्पदस्य सकलधूमाधिकरणपरताया आवश्यकतया अद्विरुक्तयत्पदस्य तत्पदत्वानियमेन तत्परत्वग्रहार्थं द्विरुक्तेरावश्यकत्वात्। एवं 'नित्यवीप्सयो'रिति सूत्रेण द्विरुक्तिविधानस्य नित्यतया सकलधूमाद्यधिकरणपरत्वे यत्पदस्याद्विरुक्तस्य साधुत्वमेव न स्यादित्यतो द्विरुक्तेरावश्यकतेत्याशयेन यत्पदे द्विरुक्तिमभिप्रेत्य तत्पदे द्विरुक्तिं खण्डयति वीप्सा चेति। द्विरुक्तिनियमोऽपि कदाचित्पदे एव न तु तत्पदेपीत्यर्थः। सर्वत्रैव तत्पदे न द्विरुक्तिरिति नार्थः। विवर्णभावं स स भूमिपाल इत्यादौ छन्दोनुरोधादिना द्विरुक्तिदर्शनात्। न्याये तु प्रयुज्यमाने आधिक्यस्य न्यायेऽन्याय्यतया न तत्र द्विरुक्तिः। सकलधर्मिप्रत्यायनेच्छारूपवीप्सासत्त्वेऽपि अद्विरुक्ततत्पदस्य साधुतासम्भवः महाकविप्रयोगदर्शनादेतदपि स्पष्टयितुं भवभूतिनाप्यास्तथा प्रयोगो दर्शयिष्यते। द्विरुक्तयत्पदबोधितनानाधर्मिणामेकेन तत्पदेन परामर्शायोग इत्याशंकां निरस्यति विरूपेति। महानसमहानसान्यत्वादिना विभिन्नप्रकारेणेत्यर्थः। तत्पदेन परामर्शात् तत्पदेन परामर्शसम्भवात्। तत्पदस्य परामर्शकतायां व्युत्पत्तिविरोधे द्विरुक्तयत्पदेनापि तावद्धर्मिबोधासम्भवात्। व्युत्पत्तिविरोध एव च कथमित्याकांक्षायामाह बुद्धिस्थत्वाचकत्वादिति। बुद्धिप्रकारविशिष्टसर्वेषु एकशक्तेरित्यर्थः। व्युत्पत्त्यविरोधं दृष्टान्तेन दृढयति यथेति ॥

इति श्रीगदाधरभट्टाचार्यचक्रवर्तिविरचितगादाधर्यामवयवप्रकरणम् ॥

———

श्रीगणेशाय नमः

अथानुमानगादाधर्याम्

सामान्यनिरुक्तिप्रकरणम् ।

(चि०) अथ हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते ।

(दी०) एतावता प्रबन्धेन सपरिकरं हेतुं निरूप्य तत्प्रसङ्गात् तत्त्वनिर्णयादिरूपतत्कार्यकारित्वाच्च तदाभासनिरूपणं प्रतिजानीते अथेति ।

(गा०) हेत्वाभासनिरूपणे प्रसङ्गस्यापि सङ्गतित्वं सम्भवति व्याप्तिपक्षधर्मताविशिष्टहेतुनिरूपणे सति व्याप्तिपक्षधर्मताविरोधितद्विरहवतो दुष्टहेतोः स्मरणात्, अतस्तदप्रदर्शनेन मूलस्य न्यूनतां परिजिहीर्षुः प्रसङ्गस्यापि तन्निरूपणप्रयोजकत्वमाह एतावतेति । परिकरो–व्याप्तिपक्षधर्मते। निरूप्येत्यन्तमुक्तक्रमेण दुष्टहेतोः स्मृतत्वस्य प्रसङ्गनिर्वाहकस्य लाभाय। तत्प्रसङ्गादिति । सपरिकरहेतुनिरूपितप्रसङ्गसङ्गतेरित्यर्थः। तज्ज्ञानजन्यजिज्ञासाधीनत्वं पञ्चम्यर्थः। अन्वयश्चास्य निरूपणमित्यनेन। तत्त्वनिर्णयविजयप्रयोजकत्वादिति मूलं यद्यपि हेत्वाभासनिष्ठतत्त्वनिर्णयादिजनकज्ञानविषयत्वार्थकतया शिष्यप्रवृत्त्युपयोगिनिरूपणघटकज्ञानप्रयोजनप्रदर्शनपरम्, तथापि तन्मात्रपरत्वे सङ्गत्यप्रदर्शनेन न्यूनता स्यादिति तस्यैककार्यकारित्वादिरूपसङ्गतिप्रदर्शनपरत्वमपि सम्भवतीति स्फुटीकर्त्तुमाह तत्त्वनिर्णयादिति । आदिपदाद्विजयपरिग्रहः। तत्कार्यकारित्वात्–सपरिकरहेतुप्रयोज्यकार्यप्रयोजकत्वात्। प्रयोजकत्वं च जनकतावच्छेदकादिसाधारणमतः स्वविषयकज्ञानकार्यं प्रति स्वस्य तत्त्वमक्षतमेव। तत्त्वनिर्णयः–प्रमितिकोटिनिश्चयः। तत्र व्याप्तिपक्षधर्मताविशिष्टप्रकृतहेतुज्ञानमिव तद्विपरीतकोटिसाधकस्य हेत्वाभासत्वज्ञानम-

प्युपयुज्यते प्रतिबन्धकीभूततद्विपरीतकोटिव्याप्यवत्ताज्ञानेऽप्रामाण्यग्राहकत्वादित्युभयोस्तत्त्वनिर्णयप्रयोजकत्वम् । अथवा तत्त्वनिर्णयः—साध्यवत्ताज्ञाने प्रमात्वनिश्चयः। तत्रानुमापकहेतोर्व्याप्त्यादिविशिष्टत्वरूपसद्धेतुत्वज्ञानमिव विपरीतसाधकहेतोर्दुष्टत्वज्ञानमप्युपयुज्यते। प्रकृतसाध्यग्रहाप्रामाण्यग्राहकविपरीतसाधकहेत्वदुष्टत्वग्रहविघटकत्वात्। विजयप्रयोजकत्वं च हेत्वाभासस्य स्वज्ञानाधीनपरोक्तहेतुदोषोद्भावनद्वारा व्याप्त्यादिविशिष्टहेतोः स्वज्ञानाधीनसन्न्यायप्रयोगद्वारा च बोध्यम् ।

(चि०) तत्रानुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम् यद्विषयत्वेन लिङ्गज्ञानस्यानुमितिविरोधित्वं ज्ञायमानं सदनुमितिप्रतिबन्धकं यत्त्वं वा हेत्वाभासत्वम् ।

(दी०) अनुमितीति । यथाश्रुतिमिदं हेतुदोषाणां लक्षणम्, तद्वत्त्वञ्च दुष्टहेतूनाम्, तदभिप्रायेणैव उपधेयसङ्करेऽपीत्यादि वक्ष्यति । तत्रानुमितिपदम् अनुमितिनिष्ठकार्यतानिरूपकसम्बन्धित्वेनानुमितितत्कारणज्ञानपरम् साध्यव्याप्यहेतुमान् पक्षः साध्यवानित्याकारानुमितिपरं वा, तेनैकत्र हेतौ व्यभिचारादिग्रहेऽप्यन्यस्य परामर्शादनुमित्युत्पादेन व्यभिचाराद्याप्त्यादिज्ञानेनान्यथासिद्धत्वाच्च व्यभिचारादिग्रहाभावस्यानुमित्यजनकत्वेऽपि न क्षतिरिति वदन्ति ।

(गा०)मूलोक्तलक्षणानां दुष्टहेतुलक्षणत्वे दोषेष्वतिव्याप्तिः, यथार्थज्ञाननिष्ठानुमितिप्रतिबन्धकतावच्छेदकविषयताश्रयत्वपर्यन्तस्य समूहालम्बनज्ञानविषयताश्रयोदासीनपदार्थवारणाय प्रथमलक्षणे विवक्षणीयतया बाधादिज्ञानप्रतिबन्धकतायां प्रायशो हेतुविषयताया अनवच्छेदकत्वात् तत्रत्यहेतावव्याप्तिश्च, यद्विषयकत्वेनेत्यादिलक्षणे तृतीयाया अवच्छेदकत्वार्थकतया सुतरां तथेत्यत आह यथाश्रुतमिति । इदमेतल्लक्षणत्रयम । ननु हेतुवदवभासन्त इति व्युत्पत्त्या हेत्वाभासपदस्य दुष्टहेतुपरत्वात् दुष्टहेतुनिरूपणस्यैव प्रति-

ज्ञातत्वात तल्लक्षणमप्याकांक्षितमतस्तदनुक्तौ मूलस्य न्यूनता, अन्य-विधव्युत्पत्त्या हेत्वाभासपदस्य हेतुदोषपरत्वसम्भवेपि 'ते चे'त्या-दिना दुष्टहेतूनामेव विभजनाद्दुष्टहेतुनिरूपणस्याप्रतिज्ञातत्वेन तदसङ्गतेः, एवं दुष्टहेतुनिरूपणस्याप्रकृतत्वे दुष्टहेतूनां विभागानर्हतया तेषां सङ्करेण विभागव्याघातशङ्काया अनवतारात् उपधेयसङ्करेत्या-दिग्रन्थस्योपाध्यसङ्करेण विभागोपपादनपरस्यासङ्गतिरित्यत आह तद्वत्त्वं चेति । तादृशदोषवत्त्वं चेत्यर्थः । दुष्टहेतूनां लक्षणमि-त्यनुषज्यते । स्फुटमिति शेषः । तथाच दुष्टहेतुनिरूपणस्य प्रकृतत्वे-पि दोषलक्षणे कृते दुष्टहेतुलक्षणस्य स्फुटतया लाभेन नोक्तानुपप-त्तिरिति भावः । तदभिप्रायेणैवेति । दुष्टहेतुलक्षणाभिप्रायेणैवेत्यर्थः ।

अनुमितिपदस्यानुमितिसामान्यपरत्वे असम्भवः यत्किंचिदनुमि-तिपरत्वेऽतिप्रसङ्गात् प्रकृतपक्षसाध्यहेतुकानुमितिपरत्वमावश्यकम्, तथाच व्यभिचारादावव्याप्तिः वह्निर्धूमव्यभिचारीत्यादिज्ञानाभावस्य पर्वतो धूमवानित्याद्यनुमित्यजनकत्वात, लक्षणया तस्य तादृशानु-मितिकारणज्ञानमात्रपरत्वे बाधादावव्याप्तिः–बाधादिज्ञानस्य पराम-र्शाप्रतिबन्धकत्वात् , अतोऽनुमितिपदमजहत्स्वार्थलक्षणया तदुभय-परतया व्याचष्टे तत्रेति । तादृशलक्षणवाक्य इत्यर्थः । लक्षणघट-कतावच्छेदकमुभयसाधारणमनुगतरूपमाह अनुमितिनिष्ठकार्यता-निरूपकसम्बन्धित्वेनेति । अनुमितिपदस्य प्रकृतपक्षतावच्छेदकावि-शिष्टप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारकप्रकृतहेतुतावच्छेदका-वच्छिन्नहेतुकानुमितिपरत्वं स्वयमेव दर्शयिष्यति अतो न वक्ष्य-माणातिप्रसङ्गः । निरूपकत्वं च यदि प्रतियोगित्वं तदा कार्यस्य कार्यताप्रतियोगित्वाभावादनुमित्यसङ्ग्रहः । अतः सम्बन्धिपदं सं-बन्धिद्वयसाधारणस्य तत्साक्षात्कारजनकसाक्षात्कारविषयतात्मक-त्वस्य लाभाय ।

अत्र पर्वतो वह्निमान्ह्रदश्च तथेत्यादिसमूहालम्बनानुमित्यादिवि-रोधिह्रदनिष्ठवह्न्यभावादिरूपबाधादेः पर्वतादौ धूमादिना वह्न्यादि-साधने दोषताप्रसङ्गः, प्रकृतानुमितिनिष्ठकार्यतानिरूपकसम्बन्धि-ग्रहत्वस्य कस्यापि प्रतिबध्यतानवच्छेदकतया तदवच्छिन्नप्रति-बध्यतानिरूपितप्रतिबन्धकतानिवेशनासम्भवात् , तथाविधग्रह-त्वव्यापकप्रतिबध्यतानिवेशे चानुमित्यविरोधिनि व्यभिचारादौ प-

रामर्शाविरोधिनि बाधादौ चाव्याप्तिः-उभयविरोधिपक्षाप्रसिद्ध्या-दावेव तादृशप्रतिबध्यतानिरूपितप्रतिबन्धकताशालिज्ञानविषयत्व-सत्त्वादतः कल्पान्तरमाह साध्यव्याप्येति । प्रकृतपक्षतावच्छेदक-विशिष्टपक्षे प्रकृतसाध्यतावच्छेदकावच्छिन्नतद्व्याप्तिविशिष्टप्रकृतहे-तुतावच्छेदकावच्छिन्नप्रकारताकानुमितिसामान्यपरमित्यर्थः । एवं च तादृशसमूहालम्बनानुमितेर्व्याप्त्यादिविषयकतया व्यभिचारज्ञा-नादिप्रतिबध्यत्वात् न व्यभिचाराद्यसङ्ग्रहः । दर्शितसमूहालम्बनानु-मितिप्रतिबन्धकतामादाय दर्शितातिप्रसङ्गवारणाय सामान्यपदम् । तथाच तादृशानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता-शालियथार्थज्ञानविषयत्वं पर्यवसितोर्थः । साध्यतावच्छेदकावच्छि-न्नादिप्रकारकानुमितिसामान्यान्तर्गतायां पर्वतो वह्निमान्वह्निव्याप्य-धूमवांश्चेत्याद्यनुमितौ ह्रदो न वह्निमानित्यादिनिश्चयस्याप्रतिबन्ध-कत्वान्नातिव्याप्तिरिति भावः । बाधसत्प्रतिपक्षस्वरूपासिद्ध्याश्रया-सिद्धिष्वतिव्याप्तिवारणाय प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षविशे-ष्यकत्वनिवेशः । द्रव्यत्वादिना ह्रदादिविशेष्यकानुमितौ तथाविध-निश्चयस्याप्रतिबन्धकत्वात्तद्दोषतादवस्थ्यमतः पक्षतावच्छेदकावच्छि-न्नत्वोपादानम् । अवच्छेदकत्वं च तत्पर्याप्त्यधिकरणत्वम्, तेनाते-जस्वी पर्वतो वह्निमानित्यादौ विशिष्टपर्वतत्वादिमति वह्न्यभावरूप-बाधस्य काञ्चनमयः पर्वतो वह्निमानित्यादौ पक्षाप्रसिद्धेः शुद्धप-र्वतत्वावच्छिन्नपक्षकानुमित्यविरोधित्वेपि नासङ्ग्रहः । एवमग्रेपि बोध्यम् । साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारकत्वानिवेशे परा-मर्शाविरोधितया बाधसत्प्रतिपक्षयोरव्याप्तिः । तत्र प्रकृतसाध्यता-वच्छेदकावच्छिन्नत्वस्यानुपादानेपि तद्दोषतादवस्थ्यम्-वह्नित्वा-वच्छिन्नाभावादिनिश्चयस्य धूमजनकतेजस्वी वह्निव्याप्यधूमवांश्च ह्रद इत्याद्यनुमित्यविरोधित्वात् । साध्याप्रसिद्ध्यव्याप्तिवारणप्रयो-जनकत्वं तदुपादानस्येति तु न सत्-वह्निर्न कांचनमय इत्यादिनि-र्णयस्य शुद्धवह्नित्वादिना वह्न्याद्यनुमित्यविरोधित्वेपि द्वितीयदले प्र-कृतसाध्यतावच्छेदकावच्छिन्नान्तर्भावसत्त्वात्, तस्य कांचनमयव-ह्निव्याप्यधूमवानयं पर्वत इत्यनुमितिविरोधितया तत्र लक्षणगमनात् । द्वितीयदलप्रवेशात् व्यभिचारविरोधसाधनाप्रसिद्धिस्वरूपासिद्धिषु नाव्याप्तिः तत्रापि साध्यतावच्छेदकावच्छिन्ननिरूपितव्याप्तिविशिष्ट-

त्वनिवेशाद्व्यभिचारविरोधयोर्नाव्याप्तिः । वह्निर्धूमव्यभिचारीत्यादि-
ज्ञानदशायामपि द्रव्यत्वादिना धूमादिनिरूपितव्याप्तेर्भानसम्भवात्त-
द्दोषतादवस्थ्यमतो व्याप्तौ साध्यतावच्छेदकावच्छिन्नीयत्वनिवे-
शः । अन्वयव्याप्तिव्यतिरेकव्याप्ती विशिष्योपादाय तदुभयवि-
शिष्टहेतुप्रकारकत्वमेव निवेश्यम । एकतरमात्रव्याप्त्युपादाने सा-
धारण्यानुपसंहारित्वयोरेकतरासङ्ग्रहप्रसङ्गादित्यग्रे व्यक्तीभविष्य-
ति । तादृशव्याप्तिद्वयप्रकारतानिरूपितहेतुप्रकारतायास्तत्साध्यकत-
द्धेतुकानुमितिजनकतावच्छदकप्रकारतात्वेनानुगमय्य निवेशस्तु न
संभवति-साध्याभाववद्वृत्तित्वज्ञानदशायां केवलव्यतिरेकव्याप्त्या-
दिप्रकारकहेतुमत्ताज्ञानोत्पत्त्या साधारण्यादेस्तादृशप्रकारताशाल्य-
नुमितिसामान्याविरोधित्वाभावात् । तादृशव्याप्तिविशिष्टविषयकत्व-
मात्रस्य तद्विशिष्टहेतुतावच्छेकावच्छिन्नविषयकत्वमात्रस्य वा निवेशे
स्वरूपासिद्धावव्याप्तिः, अतः पक्षांशे तादृशव्याप्तिविशिष्टहेतुता-
वच्छेदकावच्छिन्नत्वानिवेशः । पक्षांशे व्याप्तिविशिष्टहेतुप्रकारकत्व-
मात्रस्य निवेशेपि तद्दोषतादवस्थ्यम, धूमाभाववान् ह्रद इत्यादि-
ज्ञानस्य द्रव्यत्वादिना हेतुमत्ताज्ञानाविरोधित्वात्साधारण्याद्यव्या-
प्तिश्च वह्नित्वावच्छिन्ने धूमाभाववद्वृत्तित्वग्रहस्य धूमादिव्याप्ति-
विशिष्टतद्व्यक्तित्वावच्छिन्नप्रकारकज्ञानाविरोधादतो हेतुतावच्छे-
दकावच्छिन्नत्वानिवेशः । पक्षांशे साध्यादिप्रकारकस्य सं-
स्कारादेराहार्यज्ञानस्य च बाधादिज्ञानाप्रतिबध्यत्वात् असम्भव
इत्यतस्तादृशानुमितित्वनिवेशः । साध्यव्याप्यहेतुधर्मितावच्छेदक-
कसाध्यवत्ताज्ञानस्यैव साध्यव्याप्यहेतुमान्पक्षः साध्यवानित्याका-
रकतया तादृशाकारालिखनस्वरसात्तादृशहेतुविशिष्टपक्षतावच्छेद-
कावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्नप्रकारकानुमितित्व-
व्यापकप्रतिबध्यतानिरुपितप्रतिबन्धकत्वस्य लक्षणघटकत्वोपगमे तु
पर्वतत्वाद्यवच्छेदेन वह्नेः साध्यत्वे तत्सामानाधिकरण्येन साध्याभा-
वादेरदोषत्वप्रसङ्गः सामानाधिकरण्यमात्रावगाहिबाधादिज्ञानस्य
शुद्धपर्वतत्वाद्यवच्छेदेन वन्ह्यादिज्ञानं प्रत्येव प्रतिबन्धकतया धूमवि-
शिष्टपर्वतत्वाद्यवच्छिन्नधर्मिकवह्न्यादिज्ञानाप्रतिबन्धकत्वादिति त-
दुपेक्षितम् । न च विशेष्यतावच्छेदककोटौ धूमादेरधिकस्य भानेपि
शुद्धपर्वतत्वाद्यवच्छिन्नसंयोगादेर्यत्र संसर्गता तत्र पर्वतत्वसामा-

धिकरण्येन वह्न्यभावादिज्ञानस्य प्रतिबन्धकत्वमावश्यकम् तादृशा-
नुमितेरपि शुद्धपर्वतत्वावच्छेदेन वह्न्याद्यवगाहित्वादिति वा-
च्यम। धर्मितावच्छेदकावच्छेदेन विशिष्टबुद्धौ धर्मितावच्छेदतापर्या-
प्त्यधिकरणधर्मावच्छिन्नत्वमेव संसर्गांशे भासते न तु तदेकदेशाव-
च्छिन्नत्वमपि तद्धर्मावच्छिन्नविशेष्यतानिरूपिततदेकदेशव्यापकत्वा-
वच्छिन्नसंसर्गताया आप्रामाणिकत्वात् ॥

अथ लिङ्गोपधानमते हेतोः सर्वत्रैव धर्मितावच्छेदकतया भाना-
त्तादृशसंसर्गताभ्युपगम आवश्यकः, अन्यथा शुद्धपर्वतत्वावच्छेदेन
हेतुमत्ताज्ञानस्थलेपि विशिष्टपर्वतत्वाद्यवच्छिन्नसंयोगादिसंसर्गकानु-
मितेरेव मानत्वाभ्युपगमे पर्वतत्वादिसामाधिकरण्यमात्रावगाहिबा-
धादिग्रहकालेपि तथाविधसाध्यनिश्चयवतो अनुमित्यापत्तेः, न हि
सामानाधिकरण्येन बाधासिद्ध्योरनुमितिं कश्चिदुपैति तादृशबाधा-
दिग्रहस्य क्वचिदप्यनुमितिप्रतिबन्धकत्वासंभवात् तेषां हेत्वाभास-
ताविलायापत्तिश्च इति चेत्। एवमपि लिङ्गानुपधानमते तादृशविष-
यतायां मानाभाव एव, प्रकृतग्रन्थस्तु न लिङ्गोपधानमताभिप्रायकः-
तन्मतेऽनुमितेः सर्वत्रैव तदाकारतया तादृशाकारत्वस्याव्यावर्तकत-
याऽनुमितिपदस्य तादृशाकारानुमितिपरत्वप्रदर्शनासंगतेः।

केचित्तु लिंगानुपधानमतेऽनुमितिपदस्य तदुभयपरत्वं व्या-
ख्याय यथाश्रुतार्थपरतानिर्वाहाय लिङ्गोपधानमतमाश्रयते—सा-
ध्यव्याप्येत्यादिना। इत्याकारकानुमितिपरम्-अनुमितेरित्याका-
रकतामताभिप्रायकमिति व्याचक्षते। एतादृशव्याख्यानप्रयोजनं स्फु-
टयति—तेनेति। एकत्र-वह्नित्वाद्येकधर्मावच्छिन्ने। व्यभिचारादित्या-
दिना स्वरूपासिद्धिपरिग्रहः। अन्यस्य परामर्शात्-तद्वह्नित्वादि-
रूपापरधर्मावच्छिन्ने व्याप्तिपक्षधर्मताद्यवगाहिज्ञानात्। व्यभिचारा-
दित्यादिहेतोरनुमितिजनकत्वेपीत्यनेन सम्बन्धः। यत्र यद्रूपावच्छिन्ने
व्यभिचारज्ञानोत्पत्तिद्वितीयक्षणे कथंचित्तद्रूपावच्छिन्नलिङ्गकपरा-
मर्शस्तत्रैकक्षणाविलम्बेनानुमित्युपगमे व्यभिचारासंभवान्न तत्र व्य-
भिचारो दर्शितः।

ननु तद्धर्मावच्छिन्नलिङ्गकानुमितौ तद्धर्मावच्छिन्नधार्मिकव्यभि-
चारज्ञानाभावस्य हेतुत्वोपगमान्न व्यभिचारः। तद्धर्मावच्छिन्नलि-
ङ्गकत्वं चाव्यवहितोत्तरत्वसम्बन्धेन तद्रूपावच्छिन्नधार्मिकव्याप्त्या-

दिज्ञानविशिष्टत्वम् तादृशसम्बन्धेन व्यभिचारज्ञानविशिष्टं यत्तदन्यत्व-मेव वा जन्यतावच्छेदकं वाच्यम्, तेन धूमव्याप्यवह्निमानयमित्याकारकशाब्दादिपरामर्शोत्पत्तिद्वितीयक्षणे यत्र लौकिकसन्निकर्षजन्यो धूमव्यभिचारी वह्निः धूमव्याप्येन्धनवानित्याकारकसमूहालम्बनग्रहस्तत्र तज्जन्यानुमितेरुक्तसम्बन्धेन वह्नित्वावच्छिन्नधर्मिकव्याप्त्यादिज्ञानाविशिष्टत्वेपि न क्षतिरित्यत आह व्याप्त्यादीति । फलप्रकारणताकव्याप्त्यादिज्ञानसत्त्वे व्यभिचारज्ञानाद्यभावव्यतिरेकेणानुमितिव्यतिरेकस्यासिद्धत्वादिति भावः । व्याप्तिज्ञानादेर्व्यभिचारज्ञानाभावेनान्यथासिद्धत्वशङ्का प्रागेव निराकृता । न क्षतिः—व्यभिचारादौ नाव्याप्तिः । यत्रासद्धेतुविशेषेऽनुमितिरप्रसिद्धा तत्रत्यदोषेष्वव्याप्तेर्वक्ष्यमाणतया एतादृशयथाश्रुतव्याख्यायामनिर्भरसूचनाय वदन्तीति ॥

(दी०) पर्वतो निर्वह्निर्धूमो वह्नेरभिधेयत्वं वा मेयत्वस्य व्यभिचारीत्यादि भ्रमादनुमितिप्रतिबन्धादाह यथार्थेति । ननु प्रतिबन्धकज्ञानाविषयव्यभिचारादिघटकसाध्यादेरपि प्रत्येकं हेत्वाभासतापत्तिः । अथ विशिष्टविषयकं ज्ञानं प्रतिबन्धकम् तद्घटकञ्च न विशिष्टमिति चेत्तर्हि यथार्थेति व्यर्थं भ्रमविषयविशिष्टस्याप्रसिद्धत्वादित्यनुशयेनाह यदिति ।

(गा० पर्वतो वह्निमान् धूमादित्यादिसद्धेतुस्थले बाधादिभ्रमविषयेष्वतिव्याप्तिवारकतया यथाश्रुतं यथार्थपदं सार्थकयति पर्वतो निर्वह्निरिति । अत्रेतिपदस्य त्रितयस्थले सम्बन्धाद्भ्रमत्रितयलाभः । प्रत्येकं भ्रमभादायैवातिप्रसङ्गसम्भवात्तादृशसमूहालम्बनभ्रमपर्यन्तानुधावनं वैकल्यात्तत्परत्वासङ्गतेरिति ध्येयम् । प्रथमभ्रमोऽनुमितौ विरोधी, अन्त्यौ च जनकज्ञाने, तथाच तयोरपि प्रथमे अन्यत्र प्रसिद्धस्य साध्याभाववद्वृत्तित्वस्य धूमाद्यंशे भ्रमत्वम् । अन्त्ये प्रमेयत्वाभाववद्वृत्तित्वस्याप्रसिद्ध्या न तद्भ्रमत्वं किन्त्वभावांशेऽनुयोगिताविशेषसम्बन्धेन साध्यस्य भ्रमत्वमित्येतादृशविशेषमादृत्य शिष्यव्युत्पादनायानेकविधभ्रमकथनम् ।

इदं त्ववधेयम् । अभिधेयत्वं प्रमेयत्वस्य व्यभिचारी-

त्वत्र स्वरूपसम्बन्धावच्छिन्नप्रमेयत्वत्वावच्छिन्नप्रतियोगिताकत्वस-म्बन्धेन प्रमेयत्वस्य भ्रमो वाच्यः प्रतियोगित्वांशे साध्यतावच्छेद-कधर्मसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वयोः साध्याभाववदवृत्ति-स्वरूपव्याप्तिघटकतया तदंशे तदुभयावगाहिव्यभिचारज्ञानस्यैव व्याप्तिज्ञानविरोधित्वात्। एवं च अंशादौ प्रमेयत्वत्वावच्छिन्नप्रति-योगिताकत्वस्य प्रसिद्धावपि स्वरूपसम्बन्धावच्छिन्नताद्दशप्रतियो-गित्वाप्रसिद्ध्या ताद्दशभ्रमानुपपत्तिः। प्रतियोगित्वांशे सम्बन्धवि-शेषावच्छिन्नत्वस्य भ्रम इत्यपि न युक्तम्—तस्य सम्बन्धघटकतया तत्प्रकारकत्वघटिततद्भ्रमत्वानुपपत्तेः। न च तेन रूपेण प्रतियोगि-ताप्रकारक एवात्र भ्रमो विवक्षितः, न तु तत्तदवच्छिन्नप्रतियोगि-ताकत्वसंसर्गक इति वाच्यम्। लाघवात् प्रतियोगितासंसर्गकव्या-प्तिज्ञानस्यैवानुमितिहेतुतया तत्प्रकारकव्यभिचारज्ञानस्याकिञ्चित्क-रत्वात्॥

अत्राहुः—स्वावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रति-योगिकत्वसम्बन्धेन साध्यतावच्छेदकवत्त्वमेवाभावस्य साध्याभा-ववदवृत्तिस्वरूपव्याप्तिघटकं लाघवात्। एवं च ताद्दशसम्बन्धेनाभा-वांशे साध्यतावच्छेदकप्रकारकव्यभिचारज्ञानस्य व्याप्तिग्रहविरोधि-तया घटत्वादेः प्रसिद्धेन ताद्दशसम्बन्धेन प्रमेयत्वत्वादेरेवाभावांशे भ्रमात्मक एव तथाविधग्रहो विवक्षित इति न किञ्चिदनुपपन्नम्।

अन्ये तु प्रथमे साध्याभाववदवृत्तित्वज्ञानविरोधी हेतौ साध्याभाव-वद्वृत्तित्वरूपव्यभिचारस्य भ्रमः। द्वितीये च तदप्रसिद्ध्या व्यापकसा-मानाधिकरण्यग्रहविरोधिसाध्यतावच्छेदके हेतुसमानाधिकरणाभाव-प्रतियोगितावच्छेदकत्वस्य भ्रमो अभिमतः। समानप्रकारकज्ञान-स्यैव विरोधितया द्विविधव्यभिचारसङ्ग्रहाय द्विविधव्याप्तिविषयक-समूहालम्बनस्यैव लक्षणे निवेश्यत्वात्। न च हेतुः साध्यस्य व्यभि-चारीत्यत्र साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रतियोगिता-वच्छेदकत्वस्य दुर्लभतया तदवगाहिज्ञानस्याभिधेयत्वं प्रमेयत्व-स्य व्यभिचारीत्याकारकता नोपयुज्यते इति वाच्यम्। यतः अभा-ववद्वृत्तित्वं समानाधिकरणाभावप्रतियोगितावच्छेदकत्वं चेति द्वय-मेव हेतुः साध्यस्य व्यभिचारीत्यत्र व्यभिचारपदार्थः। तत्रादिमव्य-भिचारतात्पर्यकस्थले व्यभिचारपदार्थैकदेशे अभावेऽनुयोगितारूप-

शष्ठ्यर्थस्य तत्र च प्रकृत्यर्थतावच्छेदकवह्नित्वाद्यवच्छिन्ननिरूपित-त्वसम्बन्धेन प्रकृत्यर्थस्यान्वयः । मत्वर्थीयार्थः स्वरूपसम्बन्धवा-न्तस्य चाभेदेन प्रथमान्तार्थेऽन्वयः । द्वितीयतत्पदार्थपरवाक्यस्थले च तदेकदेशसामानाधिकरण्ये हेतुपदार्थान्वितप्रथमार्थस्य निरूपि-तत्वस्यान्वयः षष्ठीप्रकृतेस्तद्धर्मपरतया षष्ठ्यन्तार्थस्य साध्यताव-च्छेदकनिष्ठत्वस्य तादृशान्वयबललभ्यहेतुसमानाधिकरणाभावप्र-तियोगितावच्छेदकत्वे तस्य तद्धितार्थीभूतसम्बन्धिनः एकदेश-घटकत्वरूपसम्बन्धे सम्बन्धिनश्चाभेदेन प्रथमार्थे अन्वयः । एवं चो-क्तवाक्यात्तत्र साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रतियोगि-तावच्छेदकत्वस्यापि लाभात्तत्र तदवगाहिभ्रमस्य दर्शिताकारता-सम्भव इत्यपि वदन्ति ॥

भ्रमादिति पञ्चम्यर्थः प्रयुक्तत्वं तस्य प्रतिबन्धपदार्थे अनुत्पादे-ऽन्वयः । यथार्थेतीति । यथार्थपददानेन स्वव्यधिकरणप्रकाराव-च्छिन्ना या या विषयता तत्तदनिरूपकत्वरूपस्य सर्वांशे प्रमात्वस्य विवक्षणीयतया दर्शितभ्रमाणां किञ्चिदंशे प्रमात्वेपि न तानादाय दोष इति भावः ॥

अत्र यथार्थपदेन सद्धेतुस्थलेऽनुमितिविरोधिभ्रमविषयसाध्या-भावादौ अतिप्रसङ्गवारणेऽप्यसद्धेतुस्थले तादृशप्रमाविषयदोषघ-टकसाध्यतदभावादेः प्रत्येकं दोषत्वापत्तिर्दुर्वारैवेति तदर्थं प्रकारा-न्तरानुसरणे च तत एव पूर्वदोषस्यापि वारणसम्भवे यथार्थपदं व्यर्थमिति दोषस्य दुरुद्धरतया तस्यैव यथार्थपदाघटितलक्षणान्त-रानुसरणे बीजत्वमाह नन्विति । एकदेशस्यापि विशिष्टघटकतया हेत्वाभासपदार्थत्वस्येष्टत्वादाह प्रत्येकमिति । प्रत्येकपदार्थपर्याप्त-साध्यतावच्छेदकावच्छिन्नेत्यर्थः । हेत्वाभासतापत्तिः–हेत्वाभासप-दार्थत्वापत्तिः । यद्रूपावच्छिन्नज्ञानस्यानुमित्यविरोधित्वं तद्रूपाव-च्छिन्ने हेत्वभासत्वव्यवहारस्य तद्रूपावच्छिन्नमात्रज्ञानाद्धेतोर्दुष्ट-त्वव्यवहारस्यानुदयेन चेष्टापत्तिर्न सम्भवतीति भावः ॥

यादृशविशिष्टविषयकत्वं तादृशानुमितिविरोधित्वानतिरिक्त-वृत्ति तत्त्वमिति विवक्षया न साध्यादावतिव्याप्तिरित्याशयेनाश-ङ्कते अथेति । विशिष्टविषयकं–साध्याभाववद्वृत्तित्वविशिष्टसाधना-दिविषयकमेव, तद्घटकं–तादृशविशिष्टघटकप्रत्येकपदार्थविषयकं, न

विशिष्टं–न तादृशविशिष्टनिरूपितम्,तथाच प्रत्येकपदार्थविषयकत्वस्य प्रतिबन्धकतया अतिरिक्तवृत्तित्वाज्ञातिव्याप्तिरिति भावः। व्यर्थमिति। यथार्थपदादानेपि सद्धेतुस्थलेऽतिव्याप्तिवारणसम्भवात्। ननु तत्र भ्रमविषयप्रत्येकपदार्थस्योक्तरीत्या वारणेपि तद्विशिष्टेतिव्याप्तिरत आह भ्रमविषयेति। अप्रसिद्धत्वादिति। तथाच काति-व्याप्तिरिति भावः॥

(दी०) केचित्तु दुष्टानामेव हेतूनामेतानि लक्षणानि तत्र तृतीयमिव प्रथममपि ज्ञायमानव्यभिचारादेः प्रतिबन्धकत्वमभ्युपेत्य। तदर्थश्च तादृशाभावप्रतियोगिनो ये व्यभिचारादयस्तत्प्रकारकयथार्थज्ञानविषयत्वमग्रे च तत्त्वमिस्रस्य तद्वत्त्वमित्यर्थः। आद्यस्यैव वा दुष्टहेतुलक्षणत्वमिति प्राहुः।

(गा०)केचित्त्विति। नन्वस्य दुष्टहेतुलक्षणत्वे दोषेष्वतिव्याप्तिः–तेषामपि अनुमितिविरोधियथार्थज्ञानविषयत्वात्। न च ह्रदत्वावच्छिन्नपक्षकवन्ह्यादिसाध्यकस्थले वन्ह्यभाववद्ध्रदादिरूपदोषाणामपि दुष्टहेतुत्वमिष्टमेवेति वाच्यम्। तद्रूपावच्छिन्नपक्षकतद्रूपावच्छिन्नसाध्यकतद्रूपावच्छिन्नहेतुकस्थले तेन रूपेण दुष्टस्य लक्षणं यदि तद्रूपावच्छिन्नपक्षसाध्यहेतुकानुमितिविरोधियथार्थज्ञानविषयत्वमात्रम् तदा ह्रदत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकानुमितिप्रतिबन्धकप्रमाविषयवन्ह्यभाववद्ध्रदादीनां धूमत्वादिना दुष्टहेतुत्वाभावादतिव्याप्तिरित्याशंकां परिजिहीर्षुस्तादृशाभावप्रतियोगिनां यथार्थज्ञानमिति षष्ठीसमासमाश्रित्य तादृशाभावप्रतियोगिप्रकारकयथार्थज्ञानविषयत्वमर्थं व्याख्यास्यति। तच्च ज्ञायमानदोषस्य प्रतिबन्धकतामत एव सङ्गच्छतेऽतस्तन्मतमेवालम्ब्याह तत्रेति। तेषु लक्षणेषु मध्य इत्यर्थः। तृतीयलक्षणस्य सर्वमत एव ज्ञायमानदोषप्रतिबन्धकत्वाभिप्रायकतया दृष्टान्तत्वेनोपन्यासः। तदर्थश्चेति। प्रतियोग्यन्तेन दोषानादाय लक्षणं सङ्गमनीयमिति दर्शयितुं व्यभिचारादय इति न तु तेन रूपेण घटकत्वमित्यवधेयम्॥

यद्यपि पर्वतत्वावच्छिन्ने वह्नित्वावच्छिन्नसाधने धूमत्वाद्यवच्छिन्नो दुष्ट इत्यादेः सद्धेतौ दुष्टत्वव्यवहारस्य नापत्तिः तत्र तत्साध्य-

पक्षहेतुकानुमितिप्रतिबन्धकरूपदोषप्रकारकज्ञानविषयत्वस्यैव प्रत्येतव्यत्वात्, तादृशानुमितिप्रतिबन्धकबाधव्यभिचारादेश्चाप्रसिद्धत्वात् ह्रदादौ वन्ह्यादिसाधनमादाय सर्वत्रैव दुष्टव्यवहार इष्टः । तथापि धूमसाधने वन्हित्वेनायं दुष्ट इत्यादौ वह्नित्वावच्छिन्नहेतुकधूमाद्यनुमितिप्रतिबन्धकदोषप्रकारकज्ञानविषयत्वस्य प्रत्येतव्यत्वात् । वक्ष्यमाणसम्बन्धावच्छिन्नतादृशानुमितिप्रतिबन्धकधूमाभाववद्वृत्तित्वविशिष्टवन्ह्यादिरूपप्रसिद्धदोषप्रकारताशालिभ्रममादाय रासभादितात्पर्येणापि तथा व्यवहारः स्यात् । न च तत्र विशेष्ये तृतीयान्तार्थवह्नित्ववैशिष्ट्यभानाद्रासभे तद्बाधेन नायमतिप्रसङ्ग इति वाच्यम् । तथासति दोषपदार्थघटकानुमितौ वह्नित्वावच्छिन्नहेतुकत्वालाभात्, तल्लाभानुरोधेन हेतुप्रकारकज्ञानजन्यानुमितिप्रतिबन्धकरूपदोषपदार्थघटकहेतौ वह्नित्ववैशिष्ट्यरूपतृतीयान्तार्थस्य तत्प्रकारतायां वाऽवच्छिन्नत्वार्थकतृतीयान्तलभ्यवन्हित्वावच्छिन्नत्वस्याप्यन्वय इत्येवोपगन्तव्यत्वात् । न च विशेष्ये वह्नित्वादिधर्मवैशिष्ट्यबोधकसमभिव्याहारस्थले दोषार्थकधातोरेव वह्नित्वावच्छिन्नहेतुकानुमितिप्रतिबन्धकोऽर्थः ।

अथवाऽनुमित्यर्थकसाधनशब्दस्यैव वह्नित्वावच्छिन्नहेतुकानुमितिरूपविशेषे लक्षणिकत्वं दुषधात्वर्थे अनुमित्यर्थान्तर्भावे साधनपदार्थानन्वयप्रसङ्गात् । तथाच विशेष्ये एव तृतीयार्थवैशिष्ट्यान्वयोपगमात् नोक्तातिप्रसङ्ग इति वाच्यम् । एवमपि वह्निना धूमसाधने रासभो दुष्ट इत्यादिव्यवहारस्य भ्रममादायातिप्रसङ्गादिति ॥

अथवा इतरभेदानुमापकमेवेदम् लक्षणम् । तथाच पर्वतपक्षकधूमसाध्यकवह्निहेतुकदुष्टलक्षणस्य तथाविधानुमितिविरोधिज्ञानविषयव्यभिचारादिभ्रममादाय सद्धेताावितरभेदव्यभिचारित्वाद्यथार्थपदं सार्थकम् । ज्ञानं चात्र स्वज्ञानविषयप्रकृतहेतुतावच्छेदकवत्वसम्बन्धावगाहि ग्राह्यम्, तेन प्रकृतहेतुभिन्नस्यापि सम्बन्धान्तरेण दोषप्रमाविषयत्वेपि नातिप्रसङ्गः । अग्रेपीदृशसम्बन्धेनैव तद्वत्त्वं बोध्यम् ।

अथ ज्ञायमानपक्षादिनिष्ठसाध्याभावत्वादिना बाधादिदोषाणां प्रतिबन्धकता न सम्भवति साध्याभावत्वादिना पदार्थान्तरस्यैव यत्र ज्ञानं तत्र दोषाणामज्ञायमानतयाऽविरोधत्वेनाऽनुमित्यापत्तेः, कि-

न्तु ज्ञानीयपक्षतावच्छेदकाद्यवच्छिन्नविषयतानिरूपितसाध्याभावत्वा-वच्छिन्नविषयतावत्त्वेन तादृशविषयताज्ञानविशिष्टत्वेन वा, तच्च रूपं तादृशभ्रमविषयपदार्थान्तरसाधारणमेवेति तेषामेव भ्रमदशायां विरोधित्वान्नोक्तापत्तिः। एवं च सद्धेतूनामपि प्रतिबन्धकतावच्छेद-कनिरुक्तविषयताश्रयवह्न्यभावादिप्रमाविशेष्यत्वादतिव्याप्तिरिति चेन्न। यद्रूपावच्छिन्नविषयतासामान्यमनुमितिप्रतिबन्धकतावच्छेदकं तद्रू-पविशिष्टप्रकारकप्रमाविशेष्यत्वमेव विवक्षणीयम्। ह्रदो वह्निमान् धूमा-दित्यादौ च तादृशरूपं ह्रदविशिष्टवन्ह्यभावत्वादिकं ह्रदे वह्निर्नास्ती-त्यादिज्ञाननिरूपिततद्रूपावच्छिन्नविषयतासामान्यस्यैव ह्रदत्वावच्छि-न्नविषयतानिरूपितवन्ह्यभावत्वाद्यवच्छिन्नविषयतात्वेन दोषनिष्ठानु-मितिप्रतिबन्धकतायामवच्छेदकत्वात्। सद्धेतुस्थले च केवलवन्ह्य-भावत्वादिकं न तथा तदवच्छिन्नविषयतासामान्यान्तर्गतधर्म्यविषय-कज्ञाननिरूपिततादृशविषयतानामनुमितिप्रतिबन्धकतानवच्छेदक-त्वात्। पर्वतविशिष्टवन्ह्यभावत्वादिविशिष्टं न किंचिद्वस्तुप्रसिद्ध-मिति नातिप्रसङ्गः। तृतीयमपि लक्षणमनयैव रीत्या परिष्कार्यम्। यद्यप्यस्य दुष्टहेतुलक्षणत्वे ज्ञायमानदोषप्रतिबन्धकतामतानाश्रयणेपि तद्रूपावच्छिन्नपक्षसाध्यहेतुकानुमितिप्रतिबन्धकप्रमाविषयतद्धेतुताव-च्छेदकवत्त्वं तद्रूपावच्छिन्नपक्षसाध्यहेतुकस्थले तेनैव रूपेण दुष्टत्व-मित्यर्थकतामुपगम्य यथार्थपदसार्थक्यमुपपादयितुं शक्यते, तथापि दुष्टलक्षणस्य दोषघटितत्वानुरोधेन तन्मतमवलंब्य षष्ठीसमास आदृ-त इति॥

ननु द्वितीयतृतीयलक्षणयोर्दोषेतिव्याप्तिरव्याप्तिश्च कचिद्धेतौ यत्पदेन दोषस्यैवोपादेयतया तत्त्वस्य तन्मात्रवृत्तित्वादत आह तत्त्वमित्य-स्येति। प्रथममात्रस्य दुष्टहेतुलक्षणत्वेनैवोपपत्तौ चरमयोर्दोषलक्षण-त्वमेवोचितं तत्त्वमित्यस्य यथाश्रुतार्थानुरोधकत्वादतस्तथैवाह आ-द्यस्यैवेति। ईदृशव्याख्याया निर्दोषत्वात्प्राहुरित्युक्तम्।

(दी०)लिङ्गमविवक्षितम्, यद्विषयत्वेन—यादृशविशिष्टविषय-त्वेन, तेनानुमितिप्रतिबन्धकपक्षविशेष्यकभ्रमविषये साध्याभा-वादौ सद्धेत्वादिनिष्ठ नातिप्रसङ्गः। अवच्छेदकत्वञ्चेहानतिरिक्त-वृत्तित्वं, तेन विशिष्टस्यासत्त्वेऽपि भ्रमात् प्रतिबन्धेऽपि न क्ष-

तिः । विशेषणीयश्च तादृशविशिष्टान्तराघटितत्वेन, तन प्रमेयत्वादिविशिष्टे सव्यभिचारादौ नातिप्रसङ्गः । एवञ्च पक्षतावच्छेदकादिविरहविशिष्टः पक्षः पक्षनिष्ठस्तद्विरहो वा साध्याभाववद्वृत्ति साधनं साधनवद्वृत्तिसाध्याभावो वा हेतुदोषः, येन केनापि सम्बन्धेन तद्वांश्च प्रकृतो हेतुर्दुष्टः ।

(गा०)लिंगज्ञानस्येतिमूले लिंगांशनिवेशस्य निष्प्रयोजनकतया तस्या विवक्षितत्वमाह लिंगमिति। यद्विषयकत्वेनेति तृतीयार्थो अवच्छेदकत्वम् । तच्चेदमनतिरिक्तवृत्तित्वमिदानीं निवेश्यते तदाऽसम्भवः विशिष्टस्यानतिरिक्ततया वन्ह्यभावविशिष्टह्रदादिरूपदोषविषयकत्वस्य शुद्धह्रदत्वाद्यवच्छिन्नविषयकज्ञानेपि सत्त्वेनानुमितिप्रतिबन्धकत्वातिरिक्तत्वादतः स्वरूपसम्बन्धरूपमेव तद्वाच्यम्–तथाच पर्वतो वह्निमानित्याद्यनुमितिप्रतिबन्धकभ्रमाविषयवन्ह्यभावादावतिव्याप्तिः तद्विषयकत्वस्यापि प्रतिबन्धकतावच्छेदकघटकत्वादसंभवभयेन चावच्छेदकतापर्याप्तिनिवेशासंभवादतो यद्विषयकत्वेनेति पदं व्याचष्टे यादृशविशिष्टविषयकत्वेनेति । यादृशविशिष्टविषयकत्वेन–यद्रूपावच्छिन्नविशिष्टविषयकत्वेन। एवञ्च तत्त्वमित्यस्य तद्रूपावच्छिन्नत्वमर्थः ।

व्याख्याबीजं प्रकाशयति तेनेति । यत्प्रकारकत्वेनानुमितिप्रतिबन्धकत्वमित्युक्तौ पक्षविशेषणकभ्रममादाय वह्न्यभावादौ नातिप्रसङ्गः । पर्वतादावतिप्रसङ्गसम्भवेपि यत्सम्बन्धावच्छिन्नयन्निष्ठप्रकारताकत्वेनानुमितिप्रतिबन्धकत्वं तेन सम्बन्धेन तद्वत्त्वस्य दुष्टताव्यवहारनियामकत्वोपगमे पर्वतविशेषणकवह्न्यभावज्ञानस्य विशेषणताविशेषावच्छिन्नाधेयतासंसर्गावच्छिन्नपर्वतादिनिष्ठप्रकारताकत्वेन प्रतिबन्धकत्वात् । तेन सम्बन्धेन पर्वतादिमत्तायां पर्वतमहानसान्यत्वादिरूपसद्धेतौ सत्त्वेपि प्रसिद्धधूमादिरूपहेतावसत्त्वात्तत्र दुष्टताव्यवहारापत्तेरयोग इति तदनुरोधेन पक्षविशेष्यकेत्युक्तम् । भ्रमपदं निश्चयसामान्यपरम्, तेन सद्धेत्वादीत्यादिपदग्राह्यसाध्यशून्यपक्षकदुष्टहेतावनुमितिप्रतिबन्धकप्रमाविषयसाध्याभावादेव सत्त्वेपि नासङ्गतिः । नातिप्रसङ्ग इति । उक्तव्याख्यानेऽनतिरिक्तवृत्तित्वमेव

अवच्छेदकत्वं विवक्षणीयम्, विशेषणीभूतवह्न्यभावाद्यविषयके शुद्ध-ह्रदत्वादिना वह्न्यभावविशिष्टह्रदादिविषयकज्ञाने वह्न्यभावविशि-ष्टह्रदत्वाद्यवच्छिन्नविलक्षणविषयतानिरूपकत्वस्यासत्त्वेनोक्तासम्भ-वानवकाशात्। तथा केवलवह्न्यभावत्वाद्यवच्छिन्नविषयकत्वस्य प्र-तिबन्धकत्वातिरिक्तत्वान्नातिप्रसङ्ग इत्यर्थः।

ननु स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशेऽयमेवातिप्रसङ्गो दु-र्वारः। अप्रामाण्यज्ञानाभावविशिष्टयद्रूपावच्छिन्नविषयकत्वं प्रतिब-न्धकतावच्छेदकतापर्याप्त्यधिकरणमित्येतादृशविवक्षया तादृशाति-प्रसङ्गवारणे पुनरसम्भवः। वह्न्यभावत्वादिना घटाद्यवगाहिनो व-ह्न्यभाववान्ह्रद इत्यादिज्ञानस्यापि प्रतिबन्धकतया तत्साधारण्यानु-रोधेन वह्नित्वाद्यवच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नविषयता-निरूपितह्रदत्वावच्छिन्नविशेष्यताकनिश्चयत्वेनैव प्रतिबन्धकता-या वक्तव्यतया वह्न्यभावविशिष्टह्रदत्वाद्यवच्छिन्नविषयता-यास्तादृशप्रकारतानिरूपितह्रदत्वाद्यवच्छिन्नविषयतात्वेनैवावच्छे-दकत्वेऽप्यप्रामाण्यज्ञानाभावविशिष्टह्रदत्वाद्यवच्छिन्नविषयताकनि-श्चयत्वस्यावच्छेदकतापर्याप्त्यनधिकरणत्वादित्यनस्तृतीयाया अ-तिरिक्तवृत्तित्वलक्षणावच्छेदकतार्थकत्वं स्फुटयति अवच्छे-दकत्वं चेति। इह लक्षणे घटकत्वं सप्तम्यर्थः। न च वि-शिष्टदोषविषयकत्वस्याप्रतिबन्धकसंशयादौ सत्त्वात्पुनरसम्भव इति वाच्यम्। ज्ञानस्येत्यत्र ज्ञानपदमनाहार्याप्रामाण्यज्ञानानास्कन्दि-तनिश्चयपरं षष्ठ्यर्थश्चाधेयत्वं तस्य यद्विषयकत्वेनेत्यन्वयः, एवं च तादृशनिश्चयवृत्तित्वविशिष्टं यादृशविशिष्टविषयकत्वमनुमितिप्रति-बन्धकतानतिरिक्तवृत्ति तादृशत्वस्य विवक्षणीयतया असम्भवानव-काशात्। अनतिरिक्तवृत्तित्वं च स्वव्यापकतत्कत्वं न तु तच्छून्यावृ-त्तित्वं विशिष्टस्य विशेष्यीभूतविशिष्टविषयकत्वानतिरिक्ततया त-स्यातिप्रसक्तत्वेन विशिष्टे तस्मिन्ननतिप्रसक्तत्वस्य दुर्घटत्वात्।

यत्तु प्रतिबन्धकताशून्यतादृशनिश्चयवृत्तित्वमेवानतिरिक्तवृत्ति-त्वमतो नोक्तरीत्याऽसम्भव इति। तदसत्। तथासति मूलोपात्तज्ञा-नस्येत्यस्य वैयर्थ्यप्रसङ्गात्। ह्रदत्वाद्यवच्छिन्ना या वह्न्यभाववि-शिष्टह्रदत्वाद्यवच्छिन्नविषयकयत्किञ्चिज्ज्ञानविषयता तन्निरूपकत्व-स्य प्रतिबन्धकताशून्यतादृशनिश्चयावृत्तित्वेन शुद्धह्रदत्वावच्छिन्ने

अतिप्रसङ्गाच्च । अस्मन्मतेऽनुमितिप्रतिबन्धकतायास्तादृशानिश्चयवृत्तित्वविशिष्टह्रदत्वाद्यवच्छिन्नविषयकत्वत्वावच्छिन्नव्यापकताविरहादातिप्रसङ्गानवकाशात् ।

अथैवमपि जातित्वादिना ह्रदत्वादिविषयकस्य जातिमान्वह्न्यभाववानित्यादिज्ञानस्यापि वह्न्यभावविशिष्टह्रदत्वावच्छिन्नविषयकतया तस्य च ह्रदो वह्निमानित्यनुमित्यविरोधितयाऽसंभवः, जलवान्वह्निमानित्यादिस्थलीयदोषासंग्रहेणाविशेषितधर्मावच्छिन्नपक्षकस्थलीयस्यापि किंचिद्विशिष्टतद्घटितदोषस्यासंग्रहेण च पक्षतावच्छेदकांशेऽन्याप्रकारकत्वनिवेशस्याशक्यत्वात्तादृशविशिष्टाघटकपदार्थाविषयकत्वस्य ज्ञानविशेषणत्वे सर्वमाकाशवदित्यादिस्थलीयबाधादौ तद्घटकाप्रसिद्ध्याऽव्याप्तिः । यद्यद्रूपावच्छिन्नस्य यस्य यस्य यादृशविशिष्टघटकता तत्तद्रूपावच्छिन्नतत्तन्निष्ठविषयताभिन्नकिञ्चिदवच्छिन्नविषयताभिन्नकिंचिदवच्छिन्नविषयताशून्यत्वं ज्ञाने निवेश्यम् । जातित्वाद्यवच्छिन्नस्य च ह्रदत्वादेर्न वन्ह्यभाववद्ध्रदत्वावच्छिन्नात्मकदोषघटकतेति जातित्वाद्यवच्छिन्नविषयता तादृशविषयताभिन्नैव तच्छून्यत्वं च नोक्तदोष इत्यपि न सत्-तथा सति ह्रदो जात्यभाववानित्यादिस्थलीयबाधादेरेव दुःसंग्रहत्वात् जातित्वादिना ह्रदत्वादिरूपधर्मितावच्छेदकावगाहिनो जातिमान् जातिमानित्यादिज्ञानस्य जातित्वाद्यवच्छिन्नह्रदत्वादिनिष्ठधर्मितावच्छेदकतारूपविषयताया निरुक्तविषयताभिन्नत्वविरहेण तादृशज्ञानस्यानुमित्यप्रतिबन्धकस्य शून्यत्वान्तेनावारणात् ।

मैवम् । यद्रूपावच्छिन्नविषयतात्वं तादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयताशून्यत्वस्य ज्ञानविशेषणतया सामञ्जस्यात् । अप्रतिबन्धकज्ञानविषयतावच्छेदकजातित्वादिविशेषितह्रदत्वादिघटिततद्रूपावच्छिन्नविषयतात्वावच्छिन्नाभावस्य दोषात्मकविशिष्टविषयतासमानाधिकरणत्वात् तज्ज्ञानव्यावृत्तिरिति । विशिष्टस्य-विशिष्टविषयताकत्वस्य, असत्त्वेपि-वह्न्यभावत्वादिना घटाद्यवगाहिभ्रमेऽसत्त्वेपि, तथाच विशिष्टविषयकत्वेन प्रतिबन्धकता न सम्भवतीति भावः । भ्रमात्प्रतिबन्धेपि तादृशभ्रमस्यानुमित्यनुत्पादप्रयोजकत्वेपि । न क्षतिः-नोक्तयुक्त्या पर्याप्तिनिवेशोऽसम्भवः, तदनिवेशे पूर्वातिऽप्रसङ्गो वा ॥

ननु विशिष्टदोषघटकीभूततदेकदेशविषयतायां स्वरूपसम्बन्धरूपावच्छेदकत्वसत्त्वेपि विशिष्टविषयतासामान्यस्य तादृशावच्छेदकत्वविवक्षयाऽतिप्रसङ्गवारणसम्भवात्तदेव कथं न विवक्षितमिति । न च सामान्यपदस्य व्यापकत्वार्थकतया प्रतिबन्धकतावच्छेदकतायां विशिष्टविषयतात्वव्यापकत्वं निवेश्यं तदपेक्षया प्रतिबन्धकतायां विशिष्टविषयताव्यापकत्वनिवेशनमेवोचितमिति वाच्यम् । यतो वह्न्यभावविशिष्टह्रदादिनिरूपितविषयिताया अनुमित्यप्रतिबन्धकसंशयाहार्यप्रामाण्यज्ञानास्कन्दितज्ञानसाधारणतया नानुमितिप्रतिबन्धकतायास्तद्व्यापकत्वमित्यनाहार्यप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टा या विषयता तद्व्यापकत्वं प्रतिबन्धकतायां भवता विवक्षणीयम् । तदपेक्षया लाघवेन च स्वरूपसम्बन्धरूपावच्छेदकतायां विशिष्टविषयतात्वव्यापकत्वमेव विवक्षितुमुचितम् । तथासति निश्चयत्वाद्यनिवेशात्समानाकारकज्ञानेषु विषयताभेदस्याप्रामाणिकतया संशयादिज्ञानीयविषयताया अपि निश्चयत्वादिविशिष्टीयतया प्रतिबन्धकतावच्छेदकतया प्रतिबन्धकतावच्छेदकतायां बाधादिरूपदोषनिरूपितविषयतात्वव्यापकताया अक्षतत्वात् । न च वह्न्यभाववान्ह्रदो वह्निमानित्याहार्यज्ञानीयवह्न्यभावविशिष्टह्रदादिविषयता नानाहार्यज्ञानसाधारणी तादृशाहार्यज्ञानसमानाकारकानाहार्यज्ञानाप्रसिद्धेः, ह्रदो वह्न्यभाववानित्याद्यनाहार्यज्ञानीयवह्न्यभावविशिष्टह्रदादिविषयतातो वह्न्यादिप्रकारतानिरूपिततादृशाहार्यज्ञानीयह्रदादिविषयताया भिन्नत्वात्, तथा चानाहार्यत्वविशिष्टविषयताया एव प्रतिबन्धकतावच्छेदकतया न दर्शिताहार्यज्ञानीयविषयितासाधारण्यविशिष्टविषयितात्वव्यापकत्वमिति वाच्यम् । एवं सत्यनाहार्यज्ञानीयविशिष्टविषयितात्वव्यापकताया एव विवक्षणीयत्वात्तावतापि संशयान्यत्वाप्रामाण्यज्ञानानास्कन्दितत्वयोरप्रवेशेन लाघवानपायात् ।

मैवम् । स्वरूपसम्बन्धरूपावच्छेदकत्वप्रवेशे पाषाणमयत्वाद्यवच्छेदेन वह्न्यभाववत्तानिश्चयविशिष्टस्य पाषाणमयत्वादिविशिष्टपक्षादेर्ज्ञानस्य वह्न्याद्यनुमितिप्रतिबन्धकतया तदवच्छेदकविषयताकपाषाणमयत्वादिविशिष्टपक्षादावतिव्याप्तेः । अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वानिवेशमते तादृशविशिष्टविषयता-

यः पाषाणमयत्वाद्यवच्छेदेन वह्न्यभाववत्तानिश्चयाविशिष्टज्ञानसाधारणतया अनुमितिप्रतिबन्धकतातिरिक्तवृत्तित्वेनातिप्रसङ्गानवकाशात् । न चानतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशेऽपि जलाद्यवच्छेदेन वह्न्यभाववत्ताघटितस्य वन्ह्याद्यभाववज्जलादिमद्वृत्तिजलादिविशिष्टस्य ह्रदादिरूपपक्षस्य जलवान्वह्न्यभाववानित्यादिज्ञानसहितस्य जलवांश्च ह्रद इत्यादिज्ञानस्य तादृशज्ञानाविशिष्टतादृशज्ञानत्वेनैव प्रतिबन्धकतया तादृशप्रतिबन्धकताशून्यज्ञानाविषयस्य सत्प्रतिपक्षानात्मकस्य वारणाय ज्ञानवैशिष्ट्यानवच्छिन्नत्वस्य प्रतिबन्धकतायामवश्यं निवेशनीयतया मन्मतेऽपि तत्रानातिप्रसङ्गादिति वाच्यम् । ज्ञानवैशिष्ट्यानवच्छिन्नत्वस्य प्रतिबन्धकताविशेषणत्वे प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणतद्धेतुमत्पक्षरूपसत्प्रतिपक्षाव्याप्तिः—साध्याभावांशे तद्व्यापकताग्रहविशिष्टतद्वत्ताज्ञानत्वेन स्वतन्त्रसाध्याभावधर्मिकतद्व्यापकताग्रहविशिष्टतद्वत्ताज्ञानसाधारण्यानुरोधेनावश्यकॢप्तप्रतिबन्धकतयैवोपपत्तेः । तादृशविशिष्टज्ञानस्य ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतान्तरे मानाभावात् । उक्तविशिष्टेऽतिप्रसङ्गस्तु विवक्षणीयविशिष्टान्तराघटितत्वविशेषणेनैव वारणीयः । न च ज्ञानद्वयसाधारणप्रतिबन्धकतायाः प्रत्येकज्ञानविषयविशिष्टविषयकत्वं नानतिरिक्तवृत्तित्वरूपावच्छेदकतावत्, तथा च दर्शितविशिष्टघटकस्य प्रत्येकज्ञानविषयस्य न निरुक्तविशिष्टात्मकतेति निरुक्तविशिष्टान्तराघटितत्वमुक्तविशिष्टस्याक्षतमेवेति वाच्यम् । वक्ष्यमाणविशिष्टान्तराघटितत्वस्यैव यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं प्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टद्वयाघटित(त्वे सति यादृशविशिष्टविषयकनिश्चयत्वं प्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टान्तराघटितत्व)स्यापि विवक्षणीतया उक्तविशिष्टवारणसम्भवात् । न चैवमुक्तसत्प्रतिपक्षाव्याप्तिः—तस्य प्रतिहेतुव्यापकताविशिष्टसाध्याभावप्रतिहेतुविशिष्टपक्षात्मकनिरुक्तविशिष्टद्वयघटितत्वादिति वाच्यम् । सत्प्रतिपक्षघटकतादृशदलद्वयविषयताभिन्ननिरुक्तविशिष्टद्वयाविषयिताशून्यप्रतीतिविषयत्वस्य विशिष्टद्वयाघटितार्थकत्वात् । यत्र सत्प्रतिपक्षाप्रसिद्धिस्तत्र भिन्नान्तमनुपादेयमेव । साध्यादिभेदेन लक्षणभेदात् भ्रमात्मकविषयतासाधारणरूपेणैव वा प्रतिहेतुव्यापकताविशिष्टसा-

ध्याभावादिविषयितोपादेया । न च दर्शितविशिष्टस्य सत्प्रतिपक्षता न स्वीक्रियते, अपि तु हेतुतावच्छेदकाघटितसाध्याभावाभाववद्वृत्ति-सत्पक्षात्मकाविशिष्टस्यैव व्यापकसामानाधिकरण्यरूपव्याप्तिविशिष्ट-हेतुमत्पक्षस्योक्तरीत्या सङ्ग्रहे तद्धर्मव्यापकसाध्याभावकालीनतद्ध-र्मविशिष्टपक्षादिव्यावृत्तिरप्यशक्या स्यात् इत्यविशेषण व्यापक-ताघटितविशिष्टमात्रस्यालक्ष्यताया एव युक्तत्वात्, तथा चोक्तप्र-यासमपेक्ष्य ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानिवेशनमेवोचि-तमिति वाच्यम् । एवमपि प्रकृतहेतुनिष्ठसाध्यव्यापकीभूताभावप्रति-योगित्वघटितस्य मतभेदेन साधारण्यविरोधरूपस्य विषयितायाः पक्षधर्मकप्रकृतहेतुमत्ताज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतायामेवा-वच्छेदकत्वात्, प्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशा-सम्भवात् । दर्शितातिप्रसङ्गवारणाय च निरुक्तविशिष्टद्वयाघटित-त्वस्यैव निवेशनीयत्वात् । न च पक्षविशेषितं प्रकृतहेतुनिष्ठसाध्य-व्यापकीभूताभावप्रतियोगित्वमेवासाधारण्यादिरूपं वाच्यम् । पक्ष-वृत्तित्वघटितविशिष्टविषयितायाः अप्रतिबन्धकज्ञानसाधारणतया प्रतिबन्धकतानवच्छेदकत्वात्तादृशस्य चासाधारणादेः पक्षवृत्तित्व-विशिष्टप्रकृतहेतुसाध्यव्यापकाभावप्रतियोगित्वाविशिष्टप्रकृतरूपनि-रुक्तविशिष्टद्वयघटिततया निरुक्तविशिष्टद्वयाघटितत्वनिवेशोऽपि न सम्भवतीति वाच्यम् । पक्षवृत्तित्वाघटितविशिष्टस्यैवासाधारण्यरू-पतया 'विरोधोपि फलतः प्रतिरोध एव तदन्यत्वेन वा विरोधि वि-शेषणीय'मिति पंक्तिव्याख्यानावसरे सम्पादनीयत्वात् ॥

नन्वनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशे व्यभिचारादिघ-टितपदार्थान्तरेऽतिव्याप्तिः तद्विषयकत्वस्यापि प्रतिबन्धकतानतिरि-क्तवृत्तित्वादत आह विशेषणीयं चेति । तादृशलक्षणमिति शेषः । तादृशविशिष्टेति । अनुमितिप्रतिबन्धकतायां यद्रूपावच्छिन्नविषयक-त्वमवच्छेदकं तद्रूपावच्छिन्नेत्यर्थः । व्यभिचारत्वाद्यवच्छिन्नस्य व्यभिचारत्वादिरूपतादृशरूपावच्छिन्नघटितत्वादसम्भव इत्यतो अ-न्तरेति । स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकावच्छिन्नार्थ-कम् । अतः शुद्धव्यभिचारादेर्मेयत्वविशिष्टव्यभिचाराभिन्नत्वेपि न क्षतिः । तदघटितत्वन्तदविषयकप्रतीतिविषयत्वम् । एवं च अनुमि-तिप्रतिबन्धकतायां यादृशरूपावच्छिन्नविषयकत्वमवच्छेदकं तादृ-

शं यत्स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं तदवच्छिन्नाविष-
यकप्रतीतिविषयतावच्छेदकं यत्तदवच्छिन्नत्वं समुदितार्थः । यद्रू-
पावच्छिन्ने लक्षणं सङ्गमनीयं तदेव स्वपदार्थः । भवन्ति हि व्यभि-
चारत्वाद्यवच्छिन्नाविषयप्रतीतिविषयतावच्छेदकीभूतबाधत्वादय-
स्तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं व्यभिचारत्वादी-
ति तदवच्छिन्ने लक्षणसमन्वयः । प्रमेयत्वविशिष्टव्यभिचारत्वा-
देः स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकव्यभिचारत्वाद्यव-
च्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वाभावान्न तदवच्छिन्ने अ-
तिव्याप्तिः । प्रमेयत्वविशिष्टव्यभिचारादेरपि मेयत्वादिना व्य-
भिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयत्वात्तद्दोषः स्यादतस्तादृ-
शरूपाश्रयधर्मिणं तदवच्छिन्नाविषयकप्रतीतिविषयत्वेनाविशिष्य
स्वमेव तादृशविषयतावच्छेदकत्वेन विशेषितम् । मेय-
त्वविशिष्टव्यभिचारत्वाश्रयाविषयकत्वस्य व्यभिचारत्वाद्यवच्छि-
न्नविषयकप्रतीतौ दुर्घटत्वाद्दोषः, अतः स्वाश्रयाविषयकत्वमुपेक्ष्य
स्वावच्छिन्नाविषयकत्वनिवेशः । स्वावच्छिन्नाविषयकप्रतीतिविष-
यवृत्तित्वस्य तादृशधर्मविशेषणत्वे व्यभिचारादेरपि प्रमेयत्वादिना
व्यभिचारत्वाद्यवच्छिन्नविषयकप्रतीतिविषये व्यभिचारादौ वर्तमा-
नत्वादसम्भव इत्यतस्तादृशविषयतावच्छेदकत्वेन धर्मो विशेषितः ।
प्रमेयं गगनवद्वाच्यत्वादित्यादौ व्यभिचारत्वाद्यवच्छिन्नाविषयकप्र-
तीतिविषयतावच्छेदकं यद्गगनाभाववन्मेयत्वादि तदाश्रयाविषयक-
प्रतीत्यप्रसिद्ध्या अव्याप्तिरतस्तदवच्छिन्नाविषयकत्वनिवेशः । अत्र
च तादृशविशिष्टान्तराविषयकप्रतीतिविषयतावच्छेदकत्वस्य दोष-
तावच्छेदकधर्मे विशेषणतापेक्षया ज्ञानस्येत्यत्र ज्ञानपदार्थे तादृशवि-
शिष्टान्तराविषयकत्वनिवेश एवोचितः । एवं च निष्कृष्टवक्ष्यमाणक-
ल्पे यद्विषयकनिश्चयस्येत्यत्र निश्चये एव तन्निवेश्यं लाघवादित्यव-
धेयम् ॥

अथ धूमव्यभिचारिवह्निमान्धूमवान्वह्नेरित्यादौ बाधादेर्व्यभिचा-
रादिघटिततया तत्राव्याप्तिः । न च यद्रूपावच्छिन्नविषयकत्व स्वा-
वच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकं तादृशा-
रूपान्तराघटितत्वस्य विवक्षितत्वान्न दोषः । व्यभिचारस्योक्तबा-
धविषयकत्वान्न्यूनवृत्तिव्याप्तिज्ञानप्रतिबन्धकतावच्छेदकविषयिता-

कत्वेपि तादृशप्रतिबन्धकतासामान्यान्तर्गतानुमितिप्रतिबन्धकताव-च्छेदकविषयकत्वविरहेण तद्घटितत्वस्य अकिञ्चित्करत्वादिति वा-च्यम् । व्यभिचारत्वादिरूपस्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिब-न्धकतासामान्यावच्छेदकविषयतानिरूपितावच्छेदकस्य तदवच्छि-न्नाविषयकप्रतीतिविषयतावच्छेदकस्याप्रसिद्ध्या असम्भवात् व्यभि-चारत्वमेयत्वविशिष्टव्यभिचारत्वादेरेव तथाविधविषयितानिरूप-कताकत्वात् तस्य च व्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविष-यतावच्छेदकत्वाभावात् । न च स्वावच्छिन्नविषयकत्वावच्छिन्नप्र-तिबन्धकतासामान्यावच्छेदकविषयतानिरूपकतावच्छेदकः कश्चि-त्स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदको यस्य एवंभूतं यत्स्वं प्रमेयत्वविशिष्टव्यभिचारत्वादि तदवच्छिन्नाविषयकप्र-तीतिविषयतावच्छेदकत्वस्य विवक्षणीयतया न दोष इति वाच्यम् । तथासति धूमव्यभिचारिवह्निमान्धूमवान्वह्नेरित्यादौ बाधत्वाद्यवच्छिन्नघटकतावच्छेदकस्य धूमव्यभिचारिवह्निमत्त्वादेः स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकीभूतस्वावच्छिन्नविषय-कत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयितानिरूपकता-वच्छेदकव्यभिचारत्वकत्वादव्याप्तेर्दुर्वारत्वात् । न च स्वावच्छि-न्नविषयित्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूतयत्किंचि-द्विषयित्वं यादृशधर्मावच्छिन्ननिरूपितं तादृशतादृशधर्मावच्छि-न्नाविषयकप्रतीतिविषयतावच्छेदकं यत्स्वं तद्रूपावच्छिन्नत्वमेव समुदितलक्षणार्थः । मेयत्वविशिष्टव्यभिचारत्वावच्छिन्नविषयकत्वा-वच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूतायाः शुद्धव्यभिचार-त्वाद्यवच्छिन्ननिरूपितविषयितायाः मेयत्वविशिष्टव्यभिचारत्वाद्यव-च्छिन्नानिरूपितत्वेन स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदक-त्वस्य च स्वस्मिन्नसत्त्वेन मेयत्वविशिष्टव्यभिचारत्वादेः स्वपदेनोपा-दातुमशक्यत्वात् (व्यभिचारत्वादिविशिष्टविषयकत्वावच्छिन्नप्रतिब-न्धकतासामान्यावच्छेदिकायाः कस्या अपि विषयिताया व्यभि-चारत्वादिविशिष्टानिरूपितत्वासम्भवात्तादृशविषयितायाः यादृशध-र्मविशिष्टानिरूपितत्वं घटत्वमेयत्वविशिष्टव्यभिचारत्वादेरेव तादृ-शत्वात् तदविषयकप्रतीतिविषयतावच्छेदकस्य व्यभिचारत्वादेः स्वपदेनोपादातुमशक्यत्वाच्च न कश्चिद्दोषः)।

अथवा यद्धर्मावच्छिन्नविषयित्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूतविषयितात्वं यद्धर्मावच्छिन्ननिरूपितत्वव्याप्यं तद्धर्मवत्त्वमेव समुदितार्थं इति वाच्यम्, बाधविशिष्टव्यभिचारत्वाद्यवच्छिन्ने अतिप्रसङ्गात् तादृशधर्मावच्छिन्नविषयकत्वावच्छिन्नबाधज्ञानप्रतिबन्धकतायां केवलव्यभिचारविषयताया अनवच्छेदकत्वेन बाधविशिष्टव्यभिचारत्वाद्यवच्छिन्नविषयताया एव तथाविधप्रतिबन्धकतासामान्यावच्छेदकत्वं तस्यास्तादृशविशिष्टनिरूपितत्वस्यावश्यकत्वात् प्रथमकल्पे स्वपदेन चरमकल्पे च यत्पदेन तस्योपादानसम्भवात् ।

यत्तु वह्न्यभावादिधर्मितावच्छेदककवह्न्यादिप्रकारकबुद्धेरिव धूमव्यभिचारविशिष्टवह्न्यादिधर्मितावच्छेदकस्य धूमव्याप्यतया वह्न्यादिप्रकारकग्रहस्यानाहार्यस्यासंभवेन तादृशपक्षतावच्छेदकावच्छिन्नपक्षकसमूहालम्बनानुमितेरप्रसिद्ध्या तादृशानुमितिप्रतिबन्धकताघटितयथाश्रुतलक्षणस्य तद्रूपावच्छिन्नपक्षकवह्न्यादिहेतुकदोषाव्याप्तिः स्वयमेव वक्ष्यते इति तद्वारणायासो वृथेति भवतु तावदेवम् । तथापि विशेषगुणवद्भिन्नो घटो गुणसामान्यवद्भिन्न इत्यादौ दर्शितसमूहालंबनानुमितिप्रसिध्या विशेषगुणवद्घटादिरूपाश्रयासिद्धेर्गुणवद्घटादिरूपबाधघटितायाः सङ्ग्रह आवश्यकः ।

यदि च तत्र घटत्वावच्छेदेन गुणवत्त्वबाधः आश्रयसिद्धिहेतु घटत्वसामानाधिकरण्येन घटत्वावच्छेदेन वा विशेषगुणवत्त्वं तस्यां च गुणत्वरूपसामान्यधर्मावच्छिन्नघटत्वव्यापकताघटितोक्तबाधस्य न प्रवेशः, विशेषगुणत्वेन घटत्वव्यापकतायास्तत्र प्रवेशेपि सामान्यरूपेण व्यापकतायास्तदनन्तर्भावादिति न तादृशासिद्ध्यसङ्ग्रह इत्युच्यते । तथापि विशेषगुणाभाववान्द्वितीयादिक्षणावच्छिन्नो घटो गुणसामान्याभाववानित्यादौ द्वितीयादिक्षणावच्छिन्ने घटे विशेषगुणवत्त्वरूपाश्रयासिद्धौ तदवच्छिन्ने घटे गुणवत्त्वरूपबाधप्रवेशावश्यकत्वात् यथाश्रुतलक्षणे च तत्सङ्ग्रहस्यावश्यकतया उक्तविशेषणानुपपत्तिः ।

वस्तुतस्त्वत्र वदन्तीत्यादिनिष्कृष्टकल्पेपि प्रमेयत्वविशिष्टव्यभिचारादिवारणाय विशिष्टान्तराघटितत्वस्य निवेशनीयतया तन्मते दर्शितबाधाद्यसङ्ग्रहो दोष एव ।

एतेन स्वावच्छिन्ननिरूपितविषयकत्वावच्छिन्नयत्किंचित्प्रतिबन्धकतावच्छेदकविषयताकविशिष्टनिरूपितविषयितात्वव्यापकस्वावच्छिन्ननिरूप्यताकधर्मवत्त्वं समुदितलक्षणार्थः । मेयत्वविशिष्टव्यभिचारत्वादिकं नैतादृशं स्वं-तदवच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतावच्छेदकविषयताकशुद्धव्यभिचारादिविषयितात्वस्य तदवच्छिन्ननिरूप्यत्वाव्यापत्वात् । उक्तस्थले विशेषगुणविशिष्टघटादिरूपाश्रयासिद्ध्यादिविषयकत्वावच्छिन्नविशिष्टपक्षग्रहादिनिरूपितयत्किंचित्प्रतिबन्धकतावच्छेदकविषयिताकविशिष्टनिरूपितविषयितात्वस्य तादृशाश्रयासिद्ध्यादिनिरूपितत्वव्याप्यत्वात्तत्र लक्षणसमन्वयः । प्रतिबन्धकतायां यावत्त्वानिवेशान्नोक्तरीत्या बाधविशिष्टव्यभिचारादावतिप्रसङ्गः । स्वावच्छिन्ननिरूपितविशिष्टविषयितानवच्छिन्नप्रतिबन्धकतावच्छेदकस्वावच्छिन्नविषयिताको यो धर्मस्तद्वत्त्वं वा समुदितलक्षणार्थः । मेयत्वविशिष्टव्यभिचारत्वं नैतादृशं स्वं तदवच्छिन्ननिरूपितशुद्धव्यभिचारत्वाद्यवच्छिन्नविषयित्वाद्यवच्छिन्नायामेव प्रतिबन्धकतायां तदवच्छिन्नविषयिताया अवच्छेदकत्वात् । उक्तस्थले च आश्रयासिद्धिविषयकत्वस्य तदनिरूपितबाधविषयितानवच्छिन्ना या विशिष्टपक्षग्रहप्रतिबन्धकता तदवच्छेदकत्वाल्लक्षणसमन्वय इति परास्तम् । यद्विषयकनिश्चयस्य विरोधिविषयितापयुक्त इत्यादिनिष्कृष्टे कल्पे अनुमितिप्रतिबन्धकतायाः अघटकत्वात् । प्रतिबन्धकतायां विशिष्टान्तराविषयकत्वानवच्छिन्नत्वविशेषणदानस्यासंभवेन यत्पदार्थस्यैव तादृशपदार्थान्तराघटितत्वेन विशेषणीयतया उक्तबाधाव्याप्तिशङ्कापरिहारत्वात् ।

अत्र केचित्—सजातीयाविशिष्टान्तराघटितत्वमेव यत्पदार्थे विशेषणं देयम् । साजात्यं च हेत्वाभासविभाजकरूपेण । तच्च रूपं बाधत्वव्यभिचारत्वादि तेन रूपेण व्यभिचारादेर्न बाधादिसाजात्यमिति व्यभिचारघटितबाधादौ नाव्याप्तिः । न चैवं यद्विषयकनिश्चयस्य विरोधिविषयताप्रयुक्त उभयाभावस्तत्त्वमित्यत्र विरोधिविषयताप्रयुक्तदलस्य वैयर्थ्यं घटादेस्तादृशरूपेण सजातीयत्वाप्रसिध्यैव नातिप्रसङ्ग इति वाच्यम । स्वसजातीयविशिष्टान्तरघटितं यत्स्वं तदविषयकप्रतीतिविषयत्वस्य विवक्षया अनुयोगिनि स्वत्वानन्तर्भावेन पदार्थान्तरेष्वतिप्रसङ्गवारकतया तद्दलसार्थक्यात् । न

हरिदाससंस्कृतग्रन्थमालासमाख्य-
काशीसंस्कृतसीरीज़ पुस्तकमालायां ।

इयं काशी—संस्कृतग्रन्थमाला विभागशः प्रकाशिता भवति । एतस्यां प्राचीनाः नवीनाश्च दुर्लभाः सुलभाश्च अत्युपयुक्ताः संस्कृतग्रन्थाः काशिकराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यैरपि विद्वद्भिः संशोधिताः क्रमेण संमुद्रिता भवन्ति । अस्यां प्रकाश्यमाणानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते । परं तु एतस्या नियमेनाऽविच्छिन्नतया निश्चितग्राहकमहाशयानां प्रतिमुद्राशतकं पञ्चविंशतिमुद्राः (कमिशन) परावर्तिता भवेयुः मार्गव्ययश्च न पृथक् दातव्यो भवेत् ।

तत्र मुद्रितग्रन्थनामानि ।		रु. आ. पा.
१ नलपाकः नलविरचितः । संपूर्णः	(पाकशास्त्रम् १)	१—८—०
२ संक्षेपशारीरकम् । रामतीर्थस्वामिकृताऽन्वयार्थबोधिनीटीकासहितम् ।	(वेदान्तं १)	१०—०—०
३ वैशेषिकदर्शनम् । सटीक-प्रशस्तपादभाष्योपस्काराभ्यां समन्वितम् ।	(वैशेषिकं १)	३—८—०
४ श्रीसूक्तम् । विद्यारण्यपृथ्वीधराद्याचार्यकृतभाष्यत्रयेण टिप्पण्या च समलङ्कृतम्	(वैदिकं १)	०—६—०
५ लघुशब्देन्दुशेखरः चन्द्रकलाटीकासहितः तत्पुरुषादिसमाप्तिपर्यन्तः ।	(व्याकरणं १)	१०—०—०
६ कारिकावली मुक्ता० दिन० राम० शब्दखण्डसहिता तथा "गुणनिरूपण" दिनकरीय महामहोपाध्याय पं० श्रीलक्ष्मणशास्त्रीव्याख्यासहिता ।	(न्यायं १)	६—०—०
७ पञ्चीकरणम् । वार्तिकाभरणालङ्कृतवार्तिकटीकया-तत्त्वचन्द्रिकासमवेतविवरणेन च समन्वितम् ।	(वेदान्तं २)	०—८—०
८ अलङ्कारप्रदीपः पण्डितवर विश्वेश्वरपाण्डेयनिर्मितः ।	(काव्यं १)	०—८—०
९ अनङ्गरङ्गः महाकविकल्याणमल्लविरचितः ।	(कामशास्त्रं १)	०—१२—०
१० जातकपारिजातः । श्रीवैद्यनाथशर्मणा विरचितः ।	[ज्यो० १]	२—०—०
११ पारस्करगृह्यसूत्रम् । कात्यायनसूत्रीयश्राद्ध-शौच-स्नान-भोजन-कल्पसहितम् ।	[कर्म० १]	०—८—०

तत्र मुद्रितग्रन्थनामानि		रु. आ. पा.
१२ पुरुषसूक्तम् । सायणभाष्य-महीधरभाष्य-मंगलभाष्य-निम्बार्कमतभाष्यचतुष्टयसहितम् ।	(वैदिकं २)	१--४--०
१३ श्रीमत्सनत्सुजातीयम्-श्रीमच्छङ्करभगवत्पादविरचितभाष्येण नीलकण्ठीव्याख्यया च संवलितम् ।	[वै०३]	१—४—०
१४ कुमारसंभवं महाकाव्यम् । महाकवि श्रीकालिदासवि० । सञ्जीवनी-शिशुहितैषिणी-टीकाद्वयोपेतम् सम्पूर्णम् ।	(काव्यं २)	२—०—०
१५ श्रुतबोधश्छन्दोग्रन्थः । आनन्दवर्द्धिनीतात्पर्यप्रकाशाख्यसंस्कृत-भाषाटीकासहितः	[छंदः १]	०—६—०
१६ कारिकावली मुक्तावली-न्यायचन्द्रिका-टीकाद्वयसहिता सटिप्पणा ।	(न्याय २)	१—०—०
१७ पारस्करगृह्यसूत्रं हरिहरभाष्य-गदाधरभाष्यद्वयसहितम् । (कर्मकाण्डं २)	सादीजिल्द	३—०—०
१८ संक्षेपशारीरकम्-मधूसूदनीटीका भाग १—२	(वेदान्तं ४)	१०—०— ०
१९ लघुजूटिका-अर्थात् अभिनवा परिभाषेन्दुशेखरपरिष्कृतिनिर्मितिः ।		०—८—०
२० कातीयेष्टिदीपकः । (दर्शपौर्णमासपद्धतिः)		१—०—०
२१ सप्तपाठि-श्रीशिवमहिम्नस्तोत्रम्	(स्तोत्रवि०)	१—०—०
२२ बौद्धाऽऽचार्य श्रीधर्मकीर्तिप्रणीतः सटीकन्यायबिन्दुः भाषाटीकासहितः	(बौद्धन्याय वि० १)	१—८—०
२३ सपरिष्कृत दर्पणसहित वैयाकरणभूषणसारः (व्याकरणं वि० ३)		४—०—०
२४ न्यायवार्त्तिकतात्पर्य्यटीका-श्रीवाचस्पतिमिश्रविरचिता । प्रथमाध्याय-प्रथमभागः । (न्यायविभाग ३)		४—०—०

पत्रादिप्रेषणस्थानम्
जयकृष्णदास—हरिदासगुप्तः,
चौखम्बा संस्कृत सीरीज आफीस,
विद्याविलास प्रेस, गोपालमंदिर लेन,
बनारस सिटी ।